पदं क्रियावाच्येव फलतीत्याशयेनाह। क्रियार्थोक्रियेति। स्थानिन इत्यस्यैवार्थकथनमप्रयुज्यमानस्येति तुमुन इति। एवं चोऽप्युपलक्षणम्। फलेभ्यो या
स्य फलान्याहारक इति विवरणे बाधकाभावात्। कर्मणीति। तथा च द्वितीयापवादोऽयमिति भावः। यत्तु प्रसादकृता व्याख्यातं। अप्रयुज्यमानस्यैव कर्म
णि स्यात्। प्रयुज्यमानस्य कर्मणि मा भूदिति नियमार्थं सूत्रमिति। तदसत्। अप्राप्तस्य नियमायोगात्। न चेह नाप्राप्तिरिति प्राप्तिः शंक्या। यानक्रियायाः फल

रणार्थं ह्रियान् क्रियायाम् आहरणं तु फलकर्मकमित्यन्यदेतत्। क्रियार्थोपपदस्य किं। प्रविश पिंडीं। गृहप्रवेशनेयपयपिभक्षणार्थं तथा विभक्तिप्रतिहृत्य मोप
ाम्। न च तु मुनः कर्मणोस्य क्रत्वा न भवति कर्मणि चतुर्थी। प्रसक्तिरेव नास्तीति प्रत्युदाहरणमिदं न संगच्छते इति नाशंक्यं। सति तु क्रियार्थोपपदस्येति परे तु मुन
ृत्यायामित्येतद्विषयकमेवेदं सूत्रमिति तुमुन् इति चाप्यनेनान्यथेति प्रत्युदाहरणस्यासंगतत्वाभावात्। तुमर्थात्। अव्ययकृतो भावे इति तुमुनो भा
वभानात् तदर्थस्य भाववचनेनेत्यस्य पुनर्भाववचनग्रहणं सूत्रविशेषपरिग्रहार्थमित्याह। भाववचनाश्चेतीति। न च नादर्थ्ये इत्येव गतार्थं तादर्थ्य
र्थोपपदकेन भाववचनाश्चेति घञादुत्पत्तौ चतुर्थ्यस्य द्योतितत्वात्। तिपदिकार्थमात्रे प्रथमा प्राप्ता चेत सूत्रारंभात्। यत्तु प्रसारकृतो क्रभावच
प्ययास्यात्। पाचको व्रजतीति ण्वुलंतान्मा भूदिति नियमार्थमिदं सूत्रमिति तन्न। ण्वुलः कर्तृवाचकतया तुमर्थकत्वाभावेन नियमार्थत्वायोगात् ण्वुलं
माधान्यात् कर्मणि मतिं च तादर्थ्याभावात् गुणीभूततया पाकं प्रति तादर्थ्यसंभवेपि पाकवाचकधातोस्तुमर्थ्ययोगाच्च तुमर्थात् किं। पचनं वनेति। भावव
कं। पाकः। त्यागः। अत्र च इति। क्रियार्थोपपदस्येत्यनुवर्त्यं पंचम्या विपरिणामय्य व्याख्यानेनापकाभावात् भाववचनादिति तन्न कुशकं। न चैवं तु मर्यादि
कव्यमिति वाच्यं। वर्णलाघवसंभवे गौरवाश्रयणायोगादिति। बलीयसीति। हरये नमस्करनत्रनुद्देशन क्रियाद्वारा हरिनमस्कारयोः संबंधः हर्ये इत्यकोन
इति। एवं चोद्देशन क्रिया वगतौ विलंब इति कारकविभक्तेर्बलीयस्त्वमित्यर्थः। अन्ये तूपपदविभक्त्या संबंधसामान्यमवगम्यते न दृशेषावगमस्त्वर्थप्र
दृपर्यालोचनाधीनः। कारकविभक्त्या तु कर्मत्वादिसंबंधविशेषो द्राक् इत्येवावगम्यते इति तस्या बलीयस्त्वमित्याहुः। षष्ठ्यपीति। ननु प्रभ्वादियोगे षष्ठ्येव
ते शब्दस्तु षष्ठीनरार्थक एव गृह्यतामित्याशंक्याह। न स्यै प्रभवतीति। नन्वां तृणामित्यादि। न च तृणादिवत् शुपश्च्छब्दादपि पक्षे चतुर्थी भाव्यं। मैवं। अन्ना
स्य कर्मविशेषणत्वेन अनादरद्योतकं यत् कर्मत्वं तत्र चतुर्थीति व्याख्यानात्। तृणं शुनानादरद्योतकं तत्तु पुश्चरथेः। स्यादेतत्। त्वां तृणं मन्ये तृणायवे तु
णं किमनेन नञः प्रयोगेण। अत्राहुः। प्रकृत्यकुत्सितनप्रहणं कर्तव्यमिति वार्तिकमस्ति तेन पश्चाचिनय तृतीयाविधीयते न तौ निकृष्टत्वेन पदकुत्सामाति
राचतुर्थी भवति नतु साम्यविवक्षायां। नादृशं च कुत्साप्रतीतिर्नञः प्रयोगे। दृष्टत्येव भवतीति नत्वामित्युक्तमिति। स्वानानिर्देशादिति। न च मन्य इति

हि तद्रूप्यभिधानात्। नहि यक्षयोगे ऽनभिहितं कर्म संभवति। यानपि दैवादिकधातूपलक्षणमात्रं न गृह्यते विवक्षितः। तेन तृणाय मन्ये ... नेन्नोपि चा
नुः पृथनादिवास्यिति भवि प्रयोगः संगच्छते। नौकाकान्नेति। व्यवस्थितविभाषाविज्ञानत्येति भावः॥ ४॥ गत्यर्थकर्मणि। मन्यर्थेति किं। ओदनं पचति। कर्मे
कं व्यन्येन व्रजति। अनध्वनीत्यत्राध्वनीति न स्वरूपग्रहणं तथाहि सत्यनध्वनरत्नेवाचक्षत। किन्तर्थग्रहणं सप्तमीनिर्देशात् कर्मणीत्यनेन सामानाधि
करण्यात्। अर्थस्य च हि कर्मत्वं संभवति न शब्दस्वरूपस्य तेनाध्ववाचिनां सर्वेषामेव निषेधः स्याद्वार्त्तिकमध्वन्यर्थग्रहणमिति। गन्त्राधिष्ठित एवेति। आस्थि
तेयो चक्रम्यश्वद्विनावार्तिकादिति भावः। आस्थितः संप्राप्तः अध्वानं गच्छतीत्यत्र हि पंथाः प्राप्तश्चेति न परश्चतुर्थीपरानमासमतेन विवक्षानसप्रयोभवत्येवमा

गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि। २।३।१२। अध्वभिन्ने गत्यर्थानां कर्मणि एते स्तश्चेष्टायां। ग्रामं ग्रामाय वा गच्छति। चेष्टा
यां किं। मनसा हरिं व्रजति। अनध्वनीति किं। पन्थानं गच्छति। गन्त्राधिष्ठितेऽध्वन्येवायं निषेधः। यदा तूत्पथात्पन्थानमेवाक्रमितुमिच्छ
ति तदा चतुर्थी भवत्येव। उत्पथेन पथे गच्छति॥ ध्रुवमपायेऽपादानं। १।४।२४। अपायो विश्लेषस्तस्मिन्साध्ये यद्ध्रुवमवधिभूतं कारकं
तदपादानं स्यात्। अपादाने पञ्चमी। २।३।२८। ग्रामादायाति। धावतोऽश्वात्पतति। कारकं किं। वृक्षस्य पर्णं पतति। जुगुप्साविरामप्रमादार्था
नामुपसंख्यानं। पापाज्जुगुप्सते विरमति। धर्मात्प्रमाद्यति। भीत्रार्थानां भयहेतुः। १।४।२५। भयार्थानां त्राणार्थानां च प्रयोगे भयहेतुर
पादानं स्यात्। चौराद्बिभेति। चौरात्त्रायते। भयहेतुः किं। अरण्ये बिभेति त्रायते वा॥

॥ ९॥ दृष्टत्वनध्वनीत्यपनीयासंप्राप्तदतिपूर्वतिते न द्विपं गच्छतीत्यत्र
भावितिनचतुर्थी अनभ्यासते। अजां नयति ग्राममित्यत्र तु भवत्येव चतुर्थी। अगत्यर्थत्वात्। आरोपादिनात्र प्रतीयते गतिर्नेन सौनयतेरर्थः। प्राप्तण
दिति। गत्यर्थकर्मणि चतुर्थीविति वक्तव्ये द्वितीयाग्रहणमपवादविषयेऽपि द्वितीया यथा स्यादित्येवमर्थं। तेन ग्रामं गन्तेत्यत्र कृद्योगलक्षणा षष्ठी न भवतीति ह
ीक्रं। इति चतुर्थी। ध्रुवमपाये। ध्रुव गतिस्थैर्ययोः। अस्मात्पचाद्यच् कुटादित्वान्ङित्वे उवङ्। ध्रुवस्थैर्ये इति केचित् पठन्ति। तन्मते गुपधलक्षणः कः। ध्रुवं स्थिरं अपायु
विवक्षितमाह। विश्लेषस्तमिति एवं च परस्परापायेऽपादानम् विभागाश्रयत्वेऽपि ध्रुवत्वमिति फलितं। नन्वावार्यावरवपिरेवेत्याह अवधिभूतमिति। धावत

स्यापायस्य प्रकृतधातूपात्तक्रियां प्रत्यवधिभावं न विरुध्यते परस्परस्मान्मेषावपसरत इत्यत्र तु स धातुनाऽनिरूप्यस्यापायस्यापादानादेकनिष्ठां गतिं प्रति इत्यत
पादानत्वं न विरुध्यते। उक्तं च हरिणा। अपाये यदुदासीनं चलं वा यदि वाऽचलं। ध्रुवमेवातदावेशात्तदपादानमुच्यते १ पततो ध्रुव एवाश्वो यस्मादश्वात्पत
तस्याप्यश्वस्य पतने कुड्यादि ध्रुवमिष्यते २ मेषान्तरक्रियापेक्षमवधित्वं पृथक् पृथक्। मेषयोः स्वक्रियापेक्षं कर्तृत्वं च पृथक् पृथक् इति ३। पततीना
अश्वात्पततीत्यत्र तु पर्वतादपि कपतनादयोः अश्वस्यावधिकं देवदत्तादिनिष्ठपतनमर्थः। पंचम्यर्थश्चावधीयभेदेन संसर्गेण प्रकृत्यर्थः पतनादिर्विशेषणं
यत्तु पतनक्रियायां। स चावधिरूपो धर्मो न तु धर्ममात्रं। उद्भूतोऽन्तरस्थानीयस्तेन कर्मकोद्रेणावधिभूतास्यासीति सामानाधिकरण्यदर्शनादेतत्
मायां स्थितं। नन्विह ध्रुवग्रहणं किमर्थं न च ग्रामादागच्छति शकटेनेत्यत्र शकटे निव्याप्तिवारणाय तदिति वाच्यं। परत्वात्तत्र करणसंज्ञाप्रवृत्तेः। न च सं
रेणार्थं ध्रुवग्रहणं कारकाधिकारात्कारकमिति चाभ्यत इति ध्रुवग्रहणं चिन्त्यप्रयोजनमिति चेत्। अत्र वदन्ति कारकत्वरूपव्यापकधर्ममात्रविव
यकृतमत्वेन विवक्षाभावदशायां करणसंज्ञाऽप्रसंगेन शकटस्यापादानत्वं स्यात्तन्माभूदित्येतदर्थं ध्रुवग्रहणमिति। जुगुप्सेति। जुगुप्सा निंदा
विरतिः। प्रमादोऽनवधानता एतदर्थकानां धातूनां कारकमपादानसंज्ञं स्यादित्यर्थः। संयोगपूर्वको विश्लेषो विभागः सचेह नास्ति तु हि तत्र गौणम
यते इति स्वेन राजा सौत्रातिकारंभः। भाष्यकारस्तु कारकप्रकरणे गौणमुख्यन्यायेनाप्राप्त इति समप्रग्रहणेन ज्ञापितत्वात्। जुगुप्सादीनां तत् पूर्वक
त्वाद्वाऽविनिमाश्रित्येदं वार्तिकं भीत्रार्थानामित्यादि च सू त्राणि प्रत्याचख्यौ। पूर्वं हि बुद्ध्यापायं संप्राप्य ततो दोषदर्शनान्निवर्तते। तुल्यमेतच्चान्यत्र बुद्धि
पूर्वकः। भीत्रा॥ कस्मिन्निमिर्त्त इति देवाद्यज्ञातोपयस्य संयोग इति। रामायणे तु कस्यैतस्य संयोगेनान्याय्याज्जातिभयहेतुत्वमिति षष्ठीप्रयोगः संगच्छते
संयुगस्यापादानत्वापत्तिरिति वाच्यं। परत्वादधिकरणसंज्ञया अपादानसंज्ञाया बाधात्। अधिकरणत्वाविवक्षायां तु इष्टापत्तेः भीत्रार्थेति किं। व्या
ति। न च कर्मत्वेन बाधः शंक्यः कर्मत्वाविवक्षायां षष्ठीबाधिका पंचमीप्रसंगादित्याहुः। भयहेतुग्रहणं चिन्त्यप्रयोजनं यदरण्ये बिभेतीत्यत्र परत्वादधि
संज्ञाप्रवृत्तेरिति चेन्न। अत्र वदन्ति भयहेतुग्रहणाभावे कारकशेषविवक्षायामतिप्रसंगः स्यात् तथा च अरण्यस्य चौरात्बिभेतीति प्रयोगो न स्यादिति पर

नानिरित्यर्थः। कारकशेषत्वेन न यष्ट्यां प्राप्तायामिदं। पराजयत इति। विपराभ्यां जेरिति तङ्। असोढ इति। क्रायार्थोऽभूतकालो न विवक्षित इत्यतो नाध्ययनात्पर
इत्यादि सिद्धं। न च सोढग्रहणं व्यर्थं। शत्रून् पराजयत इत्यत्र परत्वात् कर्मसंज्ञासिद्धेः। अत्रोपि वदंति। कर्मत्वाविवक्षायां शेषत्वविवक्षायां वापि नामं च मीत्वान
इति कर्तव्यमेवासोढग्रहणं। वारणार्थानां। यवेभ्य इति। यवसंयोगात् माषेभ्यो गा निवारयतीति ध्रुवमपाय इत्यनेनासिद्धावयमारंभः। क्षेत्रे पक्षिकल्पितापा
कुर्वतो भाष्यकारस्य मतेन तु वैयर्थ्यमेतस्य स्फुटमेव। गा वारयतीति। वृञ् वरणे चुरादिः। गामित्यत्र ईप्सितत्वमस्त्यपायाभावान्न संज्ञा न भवति। ईप्सिततमत्
यां परत्वात् कर्मसंज्ञा प्रवर्तते। नन्वेवमीप्सितग्रहणमेव व्यर्थं। क्षेत्रे वारयतीत्यत्र परत्वादधिकरणसंज्ञा प्रवर्तेत। सत्यं। अधिकरणस्य शेषत्वविवक्षाया

जेरसोढः।१।४।२६। पराजेः प्रयोगेऽसह्योऽर्थोऽपादानं स्यात्। अध्ययनात्पराजयते। ग्लायतीत्यर्थः। असोढः किं। शत्रून्पराजयते। अभि
भवतीत्यर्थः। वारणार्थानामीप्सितः।१।४।२७। प्रवृत्तिविघातो वारणम्। वारणार्थानां प्रयोगे ईप्सितोऽर्थोऽपादानं स्यात्। यवेभ्यो गां वारयति। ईप्सि
तः किं। यवेभ्यो गां वारयति क्षेत्रे। अन्तर्धौ येनादर्शनमिच्छति।१।४।२८। व्यवधाने सति यत्कर्तृकस्यात्मनो दर्शनस्याभावमिच्छति तदपा
दानं स्यात्। मातुर्निलीयते कृष्णः। अन्तर्धौ किं। चौरान्न दिदृक्षते। इच्छतिग्रहणं किं। अदर्शनेच्छायां सत्यां सत्यपि दर्शने यथा स्यात्। आख्यातोप
योगे।१।४।२९। नियमपूर्वकविद्यास्वीकारे वक्ता प्राक्संज्ञः स्यात्। उपाध्यायादधीते। उपयोगे किं। नटस्य गाथां शृणोति॥ ॥ मिदं प्रत्युदाहरणमिति
व्याप्य प्रयोजनस्येहापि कल्पयितुं शक्यत्वात्। अन्तर्धाविति। येनेति कर्तरि तृतीया। न च कृद्योगात् षष्ठीप्रसंगः उभयप्राप्तौ कर्मण्येवेति नियमात्। अत्र व्याख्यानं इति। गा
न्नादस्तूभयोः प्राप्तिः। निलीयत इति लीङ् श्लेषणे दैवादिकः। अन्तर्धाविति। अयं न दिदृक्षते चौरानित्यत्र परत्वात् कर्मसंज्ञासिद्धेः। अत्राहुः चौराः अस्मान्न मा द्रा
क्ष्यो चौरान्न दिदृक्षत इत्यत्र मर्यादाविवक्षितत्वात् कर्मणः शेषत्वविवक्षायामिदं प्रत्युदाहरणमिति शब्दकौस्तुभे त्वन्तर्धाविति त्यक्तं प्रयोजनमिति।
आख्यातोप। नियमपूर्वकेति। तत्रैवोपयोगशब्दो रूढ इति भावः। आख्यातेत्येतत् वक्तेत्यर्थाद् वक्तेति। उपाध्यायादिति उपेत्य अस्मादधीयत इति उपाध्यायः
श्चेति पञ्च। अध्ययने तु गुरुव्याहरणाच्चारणे नियमपूर्वकं नटस्येति। गाथाकर्मकं नटसंबंधि श्रवणमित्यर्थः नटस्य गाथायां तु कारकत्वाभावादेव

नि कर्तुः। जननं जनिरुत्पत्तिः। इण्जादिभ्य इति जनेर्भावे इण्। जनिवध्योश्चेति वृद्धिप्रतिषेधः। तस्याः कर्तेति शेषषष्ठ्या समासो न तु कारकषष्ठ्या। त
पामिति निषेधात्। एवं चोत्पत्त्याश्रयस्य यो हेतुरुपादानमित्यर्थोऽवतिष्ठते। तद्योगेऽप्यपादानत्वं भवत्येव। अंगादंगात्संभवसीति दर्शनादेतदाह। जायमानस्येति।
कर्तुरित्यस्य धातुनिर्देशेन तन्निर्देशोऽयं जनिरित्याश्रित्य गमकत्वेन सुपपादोपमयोः संगतिः। समासानुपपत्तिं चोद्भाव्य व्याकरणाधिकरणे राजेर्यं तेनो मीमांसकाः
ना दृत्ति भावः। इह प्रकृतिग्रहणं हेतुमात्रपरमिति वृत्तिकृन्मते। पुत्रात्प्रमोदो जायते इत्युदाहरणात् उपादानमात्रपरमिति तु भाष्यकैयटमतं तदुभयसा
माह ब्रह्मण इति। ब्रह्मा हिरण्यगर्भः। स च हेतुरेव न तूपादानं। किंच। मायोपहितं चैतन्यं ब्रह्म तदेव सर्वकार्योपादानमिति वेदान्तसिद्धान्तः॥ भुवः॥ भ
रिति। संपदादित्वाद्भावे क्विप्। पूर्वसूत्रे समासनिर्दिष्टमपि कर्तृग्रहणमनुवर्तते स्वरितत्वादित्याह। भूकर्तुरिति। प्रभवत्यस्मादिति प्रभवः अकर्तरि च कार

जनिकर्तुः प्रकृतिः। १।४।३०। जायमानस्य हेतुरपादानं स्यात्। ब्रह्मणः प्रजाः प्रजायन्ते। भुवः प्रभवः। १।४।३१। भवनं भूः। भूकर्तुः प्रभवस्त
था। हिमवतो गङ्गा प्रभवति। तत्र प्रकाशत इत्यर्थः। ल्यब्लोपे कर्मण्यधिकरणे च। प्रासादात्प्रेक्षते। आसनात्प्रेक्षते। प्रासादमारुह्य आसने उप
विश्य प्रेक्षत इत्यर्थः। श्वशुराज्जिह्रेति। श्वशुरं वीक्ष्येत्यर्थः। गम्यमानापि क्रिया कारकविभक्तीनां निमित्तमित्युक्तम्। कस्मात्त्वम्। नद्याः। यतश्चा
ध्वकालनिर्माणं तत्र पञ्चमी। तद्युक्तादध्वनः प्रथमासप्तम्यौ कालात्सप्तमी च वक्तव्या। वनाद्ग्रामो योजनं योजने वा। कार्त्तिक्या आग्रह
हायणी मासे॥

धिकारादपादानार्थं सूत्रारंभः। जनिकर्तुरित्येव सिद्धे निरर्थकमिदमित्याशंकां परिहरन्नाह। तत्र प्रकाशत इति। प्रथमं दृश्यत इत्यर्थः।
चार्थो धातूनामनेकार्थत्वाज्ज्ञेयः। तथा चाभूतप्रादुर्भावो जनिः। अन्यत्र सिद्धस्य प्रथममुपलंभः प्रभव इत्यर्थभेदोऽस्तीति भावः। भीत्रार्थानामित्यारंभे यं संस
ष्यप्रमत्तस्यानम्। न त्वेत्थमुपपत्तिसंभवः। चौरेभ्यो बिभेतीति भयान्निवर्तत इत्यर्थः। त्रायते रक्षणेन चौरेभ्यो निवर्तयतीत्यर्थः। पराजयते ग्लान्या निवर्तत इत्यर्थ
यति। प्रवृत्तिप्रतिबन्धात् निवर्तयतीत्यर्थः। निलीयते निलयनेन निवर्तत इत्यर्थः। अधीते। उपाध्यायान्निःसरन्तं शब्दं गृह्णातीत्यर्थः। ब्रह्मणः प्रपंचो जायत इत्य
तोपक्रामति निर्गच्छतीत्यर्थः। प्रभवतीत्यत्रापि भवनपूर्वकं निःसरणमर्थः। तथा च ध्रुवमपाय इत्यनेनैवेष्टरूपसिद्धिरिति। वस्तुतस्तु निवृत्तिनिःसरणादिधा

वाक्यं चित्तुक्तः प्रयोगाणां समर्थने पि तु स्वार्थं पुरस्कारेणास्य स्त्री प्रयोगो दुर्वारः। नटस्य शृणोमीति वत्। नन्द्युपाध्यायन दृष्टेः क्रियानुकूलव्यापारं शेवि
कुशाकः। यत्नभिधानत्वद्वाश्य माश्रित्य प्रत्यास्याने तु नातीव मनोरमं। एवं जुगुप्साविरामेत्यादि वार्तिकमवश्यारंभणीयं। तथा च सूत्रवातिक्रमनमेवेह प्र
याध्रुवंमपरैतुरसोढ दूरादिसंज्ञिनि देशोपि सार्थकः। परत्वात्तत्रैवेष्यसाव पिशेषलक्षिवृत्सायान मृगयाणामस्मीपादित्यादाविव पक्षाद्दश्नत्यान
हायावारणीयनात्। एतच्च शब्देकौ मुभेस्य शंसत्वचलोप इति। ल्यबंतस्य गम्यमानार्थत्वादप्रयोग इत्यर्थः। ल्यबलोपग्रहणमिहत्यब्वर्थ परं तेन कौपि
ति आसने स्थित्वा प्रेक्षते। आसनात् प्रेक्षत इति। यत इति। यस्त्वपि तेनाश्रित्या ध्वनः कालस्य चानिर्माणं परिच्छेदः प्रतिपाद्यते तेनः पंचमी इत्यर्थः।
न्यारादितरर्तेदिक्शब्दांचूत्तरपदाजाहियुक्ते।२।३।२९।। एतैर्योगे पंचमी स्यात्। अन्य इत्यर्थग्रहणं। इतरग्रहणं प्रपंचार्थं। अ
भिन्न इतरो वा कृष्णात्। आराद्वनात्। ऋते कृष्णात्। पूर्वो ग्रामात्। दिशि दृष्टः शब्दो दिग्शब्दः। तेन सम्प्रति देशकालवृत्तिना योगेऽपि भवति।
चात्पूर्वः फाल्गुनः। अवयववाचियोगे तु न। तस्य परमाम्रेडितमिति निर्देशात्। पूर्वं कायस्य। अञ्चूत्तरपदस्य तु दिक्शब्दत्वेपि षष्ठ्यतसर्थं
पष्ठीं बाधितुं पृथग्ग्रहणं। प्राक् प्रत्यग्वा ग्रामात्। आच् दक्षिणा ग्रामात्। आहि दक्षिणाहि ग्रामात्। अपादाने पंचमीति सूत्रे कार्तिक्याः प्रभृ
तिभाष्यप्रयोगात् प्रभृतियोगे पंचमी।। भवात्प्रभृति आरभ्य वा सेव्यो हरिः।। अपपरिबहिरिति समासविधानात् ज्ञापकाद्बहियोगे पंच
मीतार्थेनार्थद्वाराभुक्ता निर्मीयमाणाध्यवाचिनः प्रथमासप्तम्यौ स्तः कालादिति। इहापि तद्युक्तादित्यपेक्षते। आग्रहायणीति। अग्रेहायनमस्याः साम्प्रतार्थे
णत्वात् स्वार्थिकोणः। पूर्वपरान्यं चापाभिति। तिणालं। अन्यारा। अर्थग्रहणमिति। व्याख्यानादिति भावः। प्रपंचार्थमिति। न तु इतरस्यान्यनीचपीत्यमरोक्तं
सिद्धंग्रहणमस्तीति वाच्यं। असत्यार्थे मंद्रोवेति नियत्यंचमी विभक्त इत्यनेनैव सिद्धत्वात्। अन्योभिन्न इतरो वेति। न चैवं घटः पटो नेत्यत्रापि प्रसंगः। नञोपि भेद
ति वाच्यं। निपातानां द्योतकत्वेन न तु वाचकत्वमिति स्वीकारान्। आराद्वनादिति इह दूरान्तिकार्थैः पञ्चम्यन्तरस्यामिति प्राप्तं। ऋते कृष्णादिति। कथं त
नुरुचाराधनमृतेरतिप्रयोगइति चेत्। प्रमादोयमिति हरदत्तः। अन्ये तु ततोन्यत्रापि दृश्यत इति दर्शितग्रहणाचेत्तं पाचथीन मित्यादाविव ऋते योगे द्वितीयापि

वांदङ्मूत्रमनुकृत्वा दिग्विदिक्ष्वृत्तिः। स्त्रक्षेति शेषः। तेनैन्द्राद्रयो नात्र गृह्यन्ते। नन्वेवं ककुभादिग्रहणप्रसंग इति चेत्। अत्राहुः। अन्यतरसाहचर्यात्स्या
न्यत्र्यर्थे योनुदिष्टः सोत्र गृह्यत इति। दिक्शब्देभ्य इति। यद्यपि दिक्शब्दोऽप्युत्तरपरमपि स घ्यङि त्यादिस्तथापि दिक्शब्दसाहचर्यादुत्तरपदेनपाणिन्या दि
ङ्गत्वं गृह्यते तेन सध्र्यङ् देवदत्त इत्यत्र नातिप्रसंग इति भावः। दक्षिणा प्रोणादि ति। दिक्शब्दत्वेनैव सिद्धे आचानाद्दिग्रहणं चिन्त्यप्रयोजनमित्याहुः। मध्वादिभ्यो
न्यथैवोगहत्यर्थः। तथा च वार्त्तिकाः प्रभृती निभाष्य विदृष्य वताके पठेन ततआरभ्येत्यर्थ इति प्रयुक्तं। ग्रामाद्बहिरिति। ज्ञापकसिद्धं न सर्वत्र तेन कस्य
हिरिति सिद्धं॥७॥ अपपरी इति। वर्जने किं। परिषिञ्चति सर्वतइत्यर्थः। अत्रोपसर्गत्वात्षत्वं। वचनग्रहणादिति। विनोनेनेति मर्यादासहनेनेत्यभिविधिरि।

परीवर्ज्जने। १।४।८८। एतौ वर्ज्जने कर्मप्रवचनीयौ स्तः॥ आङ् मर्य्यादावचने। १।४।८९। आङ् मर्य्यादायामुक्तसंज्ञः स्यात्। वचनग्रहणादभि
विधावपि। पञ्चम्यपाङ्परिभिः २।३।१०। एतैः कर्म्मप्रवचनीयैर्योगे पञ्चमी स्यात्। अपहरेः। परिहरेः। संसारः। परिरत्र वर्ज्जने। लक्षणादौ तु हरिंस्प
आमुक्तेः संसारः। आ सकलाद्ब्रह्म। प्रतिः प्रतिनिधिप्रतिदानयोः। १।४।९२। एतयोरर्थयोः प्रतिरुक्तसंज्ञः स्यात्। प्रतिनिधिप्रतिदाने च य
तः २।३।११। अत्र कर्म्मप्रवचनीयैर्योगे पञ्चमी स्यात्। प्रद्युम्नः कृष्णात्प्रति। तिलेभ्यः प्रतियच्छति माषान्। अकर्त्तर्यृणे पञ्चमी। २।३।२४। क
र्त्तृवर्ज्जितं यद्दृणं हेतुभूतं ततः पञ्चमी स्यात्। शताद्बद्धः। अकर्त्तरि किं। शतेन बन्धितः। विभाषा गुणेऽस्त्रियां। २।३।२५। गुणे हेतावस्त्रीलिङ्गे। पञ्च
मी वा स्यात्। जाड्याज्जाड्येन वा बद्धः। गुणे किं। धनेन कुलं। अस्त्रियां किं। बुद्ध्या मुक्तः। विभाषेति योगविभागाद्गुणे स्त्रियां च क्वचित्। धूमा
पानो विशेषो विशेषणं गारूप्यः सोत्र न गृह्यते वचनग्रहणसामर्थ्यात् किन्तु अवधिमात्रं विवक्ष्यत इत्यर्थः इत्यसंग्रहः। प दग्निमान्। नास्ति घटोऽनु
गाङ्यो यस्मिन्नुच्यते तेन तु मर्यादावचने लादिः आङ् मर्यादाभिविध्योरिति सूत्रेन तन्त्रय आङ् इष्टः स उक्तसंज्ञ इत्यर्थः। परिहरेरिति। हरिं वर्जयित्वेत्यर्थः। पंचे
चन मिति वार्त्तिकात् पक्षे द्विर्वचनाभावः। परिरत्रेति। अत्र पंचमीविधौ वर्जनार्थेनापेन साहचर्यादिति भावः। आमुक्तेरिति। मुक्तिं मर्यादीकृत्येत्यर्थः। आ-
इति। सकलतम भिव्याप्येत्यर्थः। प्रतिनिधिप्रतिदाने। अस्मादेव निर्देशाज्ज्ञिगाराभ्यां योगे पंचमी। ज्ञापकसिद्धं न सर्वत्रेति कृष्णात्स प्रतिनिधिरित्यसिद्ध

स्याभावेसतितन्नारद्यः उपादीयतेनेसप्रतिनिधिः। इन्तुस्यप्रतिनिर्यातनंप्रतिदानं। अकर्तरि। हेतुभूतमिति। ऐनापिन्नुवर्तनेरतिभावः। पंचमीस्यादिति। तृती
र्थं। अनेनेति। शतेनमिह उत्तमर्णेप धार्यमाणानादर्शनात्पञ्चमी न कोहेतुश्चेतिचकारात्कर्तरि संज्ञा। पंचिता इति। एवंजेनचीजनककर्तुः युक्तस्यहेतुसंज्ञापत्ते
भ्युत्तस्यादेवांगोत्राकर्तरीत्युक्तमितिभावः। योगविभागादिति। एतत्सूत्रेहेतुमनुष्येभ्य इतिसूत्रेपरमंजर्थोस्यदर्शितंपंचेति। वाहुलकंप्रकृतेस्तदनुदर्शे तिताऽ
दूरोपीह्यापकः॥ ॥ पृथग्विना। नतुतृतीयाभावपक्षेएनपाद्वितीयेतिप्रकृताद्वितीयैवस्यात्। यदितुद्वितीयाविकल्पेनभवेत्। तदापंचम्यपिस्यात्। नानु
तस्यादिभक्तित्रयसमावेशोदुरुपपादइत्यतआह। अन्यतरस्यांग्रहणंसमुच्चयार्थमिति। निपातानामनेकार्थत्वादितिभावः। पंचमीति। नचमंडूकप्लुत्या
द्वितीयानुवृत्तिर्द्वितीयेन। इहपृथगर्थैरितिसूत्रयितव्येपर्याययोपादानंपर्यायांतरनिवृत्त्यर्थंतेनहिरुगादेरुत्तरसैन्यनेत्याहुः॥ पृथग्‍नानात्राभिस्तृतीया
यथ्विनानाभिस्तृतीयाऽन्यतरस्यां।२।३।३२। एभिर्योगेतृतीयास्यात्पञ्चमीद्वितीयेच। अन्यतरस्यांग्रहणंसमुच्चयार्थंपञ्चमीद्वितीयेच।
वार्जेति। पृथग्रामेण। रामात्। रामस्या। एवंविनानाना। करणेचस्तोकाऽल्पकृच्छ्रकतिपयस्यासत्ववचनस्य।२।३।३३। एभ्योद्रव्य
नेभ्यः करणेतृतीयापञ्चम्यौस्तः। स्तोकेनस्तोकाद्वामुक्तः। द्रव्येतुस्तोकेनविषेणहतः। दूरान्तिकार्थेभ्योद्वितीयाच।२।३।३५। एभ्योद्वितीया
द्वाभ्यांपञ्चमीतृतीयेस्तः। प्रातिपदिकार्थमात्रेविधिरयं। ग्रामस्यदूरंदूरात्दूरेणवा। अन्तिकं। अन्तिकात्। अन्तिकेनवा। असत्ववचनस्ये
स्यानितिसुवचं। नानाभिनितिमत्स्यप्रग्रहणेनरंतयोर्विनानानाशब्दयोर्लाभात्। नानेति। हिरुक्प्रानाचवर्जनेइत्यमरः। ((इत्यनुवृत्तेनैहदूरःपन्थाः॥
नारीनिष्कलालोकपावेतिप्रयोगः करणेच। अन्यतरस्यामितिवर्तनेपंचमीतिचतेनकरणेतृतीयापामाप्नापीपक्षेपंचमीतिधीयतेतयासुक्तेकरणान्
नीयानिहेत्याशयेनाह। तृतीयापंचम्यौस्तइति। स्तोकेनेति। अनायासेनमुक्तइत्यर्थः। दूरंदूराद्दूरेणवेति। इहसप्तम्यपिदृश्यते। किंचदूरांतिकार्थेभ्यइति
तसम्यधिकरणेचेत्युत्तरसूत्रेप्यनुवर्तनादधिकरणेप्येभ्योविभक्तिचतुष्टयंबोध्यं। तथाचप्रयुज्यते। दूरादावसथान्मूत्रंदूरात्पादावसेचनमिति। आवस
दूरेइत्यर्थः असत्ववचनस्येति। सत्ववचनत्वमिहसत्वविशेषकत्वं। सर्वथासामानाधिकरण्येनप्रातिपदिकार्थविशेषकत्वमुदस्यतेतदाहा दूरःपंथाइति।

वक्ष्ये केति सूत्रे करणे किं। क्रियाविशेषणे कर्मणि मा भूत्। स्तोकं पचतीति। क्रियायां द्रव्यमिति प्राचां ग्रन्थेऽपि व्याख्यानात्। नच क्रियाया विशेष्यत्वेन द्रव्यत्वावस्थाभाव
प्रत्युदाहरणं युक्तमिति वाच्यं। धातुवाच्यायाः क्रियायाः असत्त्वरूपत्वस्वाकारे प्रसिद्धत्वात्। नच विशेष्यत्वेन तदनुपपत्तिः। कर्तृकर्मेतरकारकलिंगानन्वयित
या सत्त्वरूपत्वोपपत्तेः। उक्तं च। क्रियान गुन्यते लिंगं क्रियानाधारकारकैः। असत्त्वरूपतानुस्वारूप्यमेवावधार्यतामिति। फलं व्यापारस्य क्रिया। फलाधारक
र्म। व्यापाराधारकारकं कर्तेति विवेकः॥ इति पंचमी॥ ॥ षष्ठी शेषे। उपयुक्तादन्यः शेषः। कर्मादयश्च प्रातिपदिकार्थपर्यन्ता उपयुक्तास्तत्र द्वितीयादीनां विधान
च्छेषः कारकप्रातिपदिकार्थव्यतिरिक्त इति। राज्ञः पुरुष इति। प्रत्ययार्थस्य प्रकृत्यर्थं प्रति प्राधान्यात् प्रधानादेव षष्ठी। प्रत्ययार्थस्त्विह पुरुषविशेषणं।

षष्ठी शेषे। २।३।५०। कारकप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावादिसंबन्धः शेषस्तत्र षष्ठी स्यात्। राज्ञः पुरुषः। कर्मादीनामपि संबं
धमात्रविवक्षायां षष्ठ्येव। सतां गतं। सर्पिषो जानीते। मातुः स्मरति। एधोदकस्योपस्कुरुते। भजे शंभोश्चरणयोः। फलितानां तृप्तः। षष्ठी हेतुप्रयो
गे। २।३।२६। हेतुशब्दप्रयोगे हेतौ द्योत्ये षष्ठी स्यात्। अन्नस्य हेतोर्वसति। सर्वनाम्नस्तृतीया च। २।३।२७। सर्वनाम्नो हेतुशब्दप्रयोगे हेतौ द्योत्ये
तृतीया स्यात् षष्ठी च। केन हेतुना वसति। कस्य हेतोः। निमित्तपर्यायप्रयोगे सर्वासां प्रायदर्शनं। किं निमित्तं वसति। केन निमित्तेन। कस्मै नि
मित्ताय इत्यादि। एवं कारणं। को हेतुः। किं प्रयोजनमित्यादि। प्रायग्रहणादसर्वनाम्नः प्रथमाद्वितीये न स्तः॥ ज्ञानेन निमित्तेन हरिः सेव्यः। ज्ञानाय
(निमित्तायेत्यादि॥

रूपितसेवकत्वसंबंधवान् पुरुष इत्यर्थविवक्षायां प्रधानात् पुरुषशब्दात्तु षष्ठी। उक्तत्वात् विरोधात्। शेषत्वाभावाच्च। राज्ञः
निरूपितस्वत्वादिपुरुषशब्दो हि प्रातिपदिकार्थमात्रवृत्तिः। राज्ञः पुरुषेणाकृतमित्यादौ कारकार्थकः। यदा तु पुरुषनिरूपितसेव्यत्वसंबंधवान् राजेति
विवक्षा तदा पुरुषशब्दादपि षष्ठी भवत्येव पुरुषस्य राजेति। यत्तु अप्रधानं शेष इति केचिदुक्तं तन्न। प्रातिपदिकार्थमात्रे प्रथमापरः स्यात्तदा
गौणषष्ठीप्रसंगात्। नच प्रथमपाठापत्तः अस्याः प्रधानेन विनार्थत्वात्। कर्मादीनामपीति। यथा विशेष्याविवक्षायां रूपता निमित्तप्रयुज्यते विशेषविवक्षा
पीत इत्यादि तथा इदमपि न्यायसिद्धमिति भावः। सतां गतमिति। सतां पुरुषसंबंधिगमनमित्यर्थः। संबोधनार्थं नीत्यत्र न्याख्यानेन कर्तृत्वसंबंधस्यो

मात्रविवक्षायां कर्तुं न शक्यतइति षष्ठी न भवति। किं तु प्रातिपदिकार्थमात्रे प्रथमैवेत्याहुः। सर्पिषो जानीतेइति। वस्तुतः करणत्वसंबंधमात्रविवक्षा
सर्पिः संबंधिप्रवर्तनमित्यर्थः। अकर्मकाच्चेत्यनुपसर्गादित्यनेन चाजानातेस्तङ्। अन्ये तु व्याचक्षते कर्मणः शेषत्वविवक्षायां षष्ठी। सर्पिःसंबंधिज्ञानमि
ति। एधोदकस्येति। एधाश्च उदकं च तेषां समाहारः एधोदकं। जातिरप्राणिनामित्येकवद्भावः षष्ठ्या। एधांसि च दकं चेति विग्रहे पूर्ववदेकवद्भावः। उ
र्वी धोदकशब्दोऽप्यस्ति। तथा च। हलायुधः। भुवनममृतं जीवनीयं दकं चेति। उपस्कुरुतेइति। गंधनादिसूत्रेणात्मनेपदं उपात्प्रतियत्नेति सुट्। ना
विदर्थस्य करणे। अधीगर्थदयेशां कर्मणि। कृञः प्रतियत्ने। रुजार्थानां भाववचनानामज्वरेः। आशिषि नाथः। जासिनिप्रहणनाटक्राथपिषां
मि। व्यवहृपणोः समर्थयोः। कृत्वोऽर्थप्रयोगे कालेधिकरणेइति शेषषष्ठीविधानार्थेयमष्टसूत्री निष्फला स्यादिति वाच्यं। सर्पिषो ज्ञानमित्यादौ तत्स
निवृत्तिफलकत्वात्। तथा हि। ज्ञोविदर्थस्येत्यादौ शेषइत्यननुवर्तने। शेषत्वे विवक्षिते तु करणादौ षष्ठी सिद्धैव तस्य समर्थः। इहपक्षे वचनमनुवादकं। तथा
प्रयोजकीभूतस्य समास एव न भवतीति। न चाष्टसूत्र्याः शुद्धमात्रनिवृत्तिफलकत्वमेवास्तु समासस्तु स्त्रीकिपतामिति वाच्यं। इष्टापत्तौ रोपेन समासएव न
तेष्वास्थानस्यौचित्यात्। तथा च वार्तिकं प्रतिपदविधाना षष्ठी न समस्यतइति। हविषो ह्यकारकेन्यपरिवृतं च स्तूयमानाक्रियैपुनः। ओक्ता प्रतिपदं ष
स्य निवृत्तयेइति। एवं च शेषत्वविवक्षायां सर्पिषो ज्ञानं मातुःस्मरणमित्यादीन्यसमस्तान्येव साधूनि। हरिस्मरणमित्यादीनि तु शेषत्वाविवक्षायां कर्मणि
समासे बोध्यानि तत्र च कारकपूर्वकत्वात् गतिकारकेत्यादिना कृदुत्तरपदप्रकृतिस्वरेणाद्युदात्तत्वं भवति। शेषषष्ठ्यासमासे तु अन्तोदात्तत्वं स्यात्
तथा च स्वरार्थेयमष्टसूत्रीति निष्कर्षः। किंच मातुःस्मृतमित्यादौ समासाभावोऽपि फलं न हि तत्र कारकषष्ठी लभ्यते नलोकेति निषेधात्। आह च। नि
कर्मविषयाषष्ठी च प्रतिषिध्यते। शेषलक्षणया षष्ठ्या समासस्तत्र नेष्यतइति। एतच्च मनोरमायां स्थितं। षष्ठी हेतुप्रयोगे। अत्र हेतावित्यनुवर्तनेनाह हेतौ द्यो
अन्नस्येति। हेताविति तृतीयायां प्राप्तायामनेन षष्ठी। हेतुप्रयोगे किं। अन्नेन वसति। हेतौ द्योत्ये किं। अन्नशब्दान्न षष्ठी यथा स्यादित्येके। अन्नस्य हेतोर्भुं
प्रत्युपद्शब्दान्माभूदित्यन्ये। सर्वनाम्नस्तृतीया च। इह सर्वनाम्नइति प्रयोगापेक्षया षष्ठी। पंचम्यां तु हेतुशब्दात् षष्ठ्येवेति यीयेन स्यातामित्याशयेनाह।

भवतीत्यपेक्षायां अर्थात् सर्वनाम्नो हेतुभ्यामिति संबध्यते। अत्र व्याचख्युः। यद्यपि सर्वनाम इति पदस्य पंचम्यंतत्वेपि हेतुशब्दस्य विशेषणत्वे सामानाधि
करण्यमुपपद्यत इति तथापि विशेष्यत्वेनान्वयं विधिर्न स्यादिति बोध्यमिति। निमित्तपर्यायेति। पर्यायग्रहणस्य फलमाह। एवमित्यादिना। एतत्सर्वं के
हेतुप्रयोगे सर्वनाम्नस्तृतीया चेति सिद्धं तदर्थं गणनार्थमिति बोध्यं॥ ०॥ षष्ठ्यतसर्थ सार्दक्षिणोत्तराभ्यामतसुजिति चास्य योगे दिक्शब्देभ्यः सप्तमी
ः तसर्थप्रत्ययः अस्तातिप्रभृतिरयं चतद्योगेन योगे इत्यर्थः। अतसुचोऽस्तात्प्रत्ययेनांतरत्वेपि पृथगुपादानं स्पष्टार्थमिति नोक्तमित्याहुः। पंचम्या अपवादः
ः पश्चात् स्रंसते ध्वंसते चेति भाष्यप्रयोगात् पश्चात् शब्दयोगेतु पंचम्यपि साधु। अस्मादेव भाष्यप्रयोगात् पश्चाच्छब्देनाव्ययीभावो न भवतीति न्यस

तसर्थप्रत्ययेन।२।३।३०।एतद्योगे षष्ठी स्यात्। दिक्शब्देति पंचम्याः अपवादः। ग्रामस्य दक्षिणतः। पुरः पुरस्तात् उपरि उपरिष्टात्। एन
द्वितीया।२।३।३१। एनबंतेन योगे द्वितीया स्यात्। एनपेति योगविभागात् षष्ठ्यपि। दक्षिणेन ग्रामं ग्रामस्य वा। एवमुत्तरेण। दूरान्तिकार्थैः ष
ष्ठ्यन्यतरस्यां।२।३।३४। एतैर्योगे षष्ठी स्यात् पंचमी च। दूरं निकटं ग्रामस्य ग्रामाद्वा। ज्ञोऽविदर्थस्य करणे।२।३।५१। जानातेरज्ञानार्थस्य
करणे शेषत्वेन विवक्षिते षष्ठी स्यात्। सर्पिषो ज्ञानं॥ अधीगर्थदयेशां कर्मणि।२।३।५२। एषां कर्मणि शेषे षष्ठी स्यात्। मातुः स्मरणं।
सर्पिषो दयनं ईशनं वा॥ कृञः प्रतियत्ने।२।३।५३॥ कृञः कर्मणि शेषे षष्ठी गुणाधाने। एधोदकस्योपस्करणं॥ ००तो। प्रत्ययग्रहणं किं। स्वस्त्या

मात् प्रत्यस्य प्रामाणात्। कृतेपि प्रत्ययग्रहणे कृतो नेति चेत् अत्राहुः। केचिद्व्याख्यायः प्रत्ययग्रहणं अपि कं क्रियमाणं प्रत्ययग्रहणार्थं विज्ञायत
पुरस्तादिति पद्यमानावः। अन्यारादितरर्त्ते इत्युत्तरपदस्यापीदं प्रयोजनमुक्तं। तत्रान्यतरस्य कमवकुमेकं प्रयोजनं नास्तीति। प्रत्ययग्रहणं चिंत्यप्रयोजनमिति।
रमायां स्थितं। पुर इति। पूर्वाधरावराणामसिपुरधवश्चैषां इति प्रत्यये पुरादेशः। पुरस्तादिति। दिक्शब्देभ्यः सप्तमीपंचमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः। अस्तातीति चेति पूर्वस्य पुरादेशः
। कथं तर्हि तत्रागारं धनपतिगृहादुत्तरेणास्मदीयमिति। उत्तरेणेत्येनन्। दूरादस्य सुरचेति धनुश्चारुत्वान्तोरणेनेति तोरणासमानाधिकरणत्वेनीपा
त्वंतमित्याहुः। धनपतिगृहादुत्तरेणेति किंचित्पद्यते तेन दानं सम्यगेव। दक्षिणेनेति। दक्षिणादाजित्यर्थे एनबन्यतरस्यामित्यादिना एनप्। दूरान्ति

ायांपरेऽपिपंचम्यर्थेवचनं इहान्यतरस्यांग्रहणंसत्सु व्यवहार्थं। तेनविप्रकृष्टस्यापि पंचमीसमुच्चीयते व्याख्यानात्। ननुसन्निहितेऽपिद्वितीयान्तमीये नन्वे
न्मीनेति। सर्पिषोज्ञानमिति। वस्तुतः करणीभूतस्य स्मार्थः तत्संबंधिनी प्र। वृत्तिरित्यर्थः। ज्ञानपूर्विकायांप्रवृत्तौजानातेर्लभ्यते। अधीगर्थ॥ अपिशब्दो
ऽडिःकायवृपसर्गेनव्यभिचरतरति ज्ञापनार्थं अन्यथास्व्यर्थदयेशामिति तेन च वृणात्स्मरार्थेतियावद्दः शेनेदंज्ञापकमिति येनहिंगेरद्रेशेगोरध्याय।
पत्राभिशब्दोचारणंज्ञापकमस्तु। अत्र व्याचक्षते। कर्मणि किं। करणे शेषत्वविवक्षायां माभूत्। मातुर्गुणैःस्मरणे। अत्र माताकर्म गुणास्तु करणं। उभ

र्थानाम्भाववचनानामज्वरेः। २।३।५४। भावकर्तृकाणांज्वरिवर्जितानां रुजार्थानां कर्मणि शेषे षष्ठी स्यात्। चौरस्य रोगस्य रुजा। अ
न्तापोऽपीति वाच्यं। रोगस्य चौरसंतापः। चौरस्य संतापो वा। रोगकर्तृकं चौरसम्बन्धि ज्वरादिकमित्यर्थः। आशिषि नाथः। २।३।५५। आशिरर्थ
स्यनेः शेषे कर्मणि षष्ठी स्यात्। सर्पिषो नाथनं। आशिषीति किं। माणवकनाथनं। तत्सम्बन्धिनी याच्ञेत्यर्थः। जासिनिप्रहणनाटक्रा
थपिषां हिंसायां। २।३।५६। हिंसार्थानामेषां शेषे कर्मणि षष्ठी स्यात्। चौरस्योज्जासनं। निप्रौ संहतौ विपर्यस्तौ व्यस्तौ वा। चौरस्य निप्रहणनं। प्र
णिहननं। निहननं। प्रहणनं वा। नट अवस्कन्दने चुरादिः। चौरस्योन्नाटनं। चौरस्य क्राथनं। वृषलस्य पेषणं। हिंसायां किं। धानापेषणं। व्य
वहृपणोः समर्थयोः। २।३।५७। शेषे कर्मणि षष्ठी स्यात्। द्यूते क्रयविक्रयव्यवहारे चानयोस्तुल्यार्थता। शतस्य व्यवहरणं। पणनं वा। स
मर्थयोः किं। शलाकाव्यवहारः। गणनेत्यर्थः। ब्राह्मणपणनं स्तुतिरित्यर्थः॥ ११ यत्र शेषत्वविवक्षायामपि मातृशब्दादेवानेन नसत्त्रेणापष्ठी गुणशब्दात्तु प
कृतेन। तेन गुणस्मरणमिति समासो भवतीति॥ ✻ ॥ रुजार्थानां। रुजो भंगे। भिदादिषु पाठादङन्त एव निपातनाद्वा अङ्टाप्। रुजा व्याधिरर्थो येषां तेषां
तो धातूनां भाववाचकत्वाव्यभिचारात् भावशब्देनात्र घञादिवाच्यः सिद्धरूपो भाव उच्यते। वक्तीति वचनः बाहुलकात्कर्तरि ल्युट्। प्रकृत्यर्थस्तु न।
नः। नहि भावो वक्ता संभवति तस्मात्प्रत्ययस्य साधुत्वनिर्वाहार्थं वचिरिति बोध्यत्वाद्वाचकमर्थः। भावो वचनः कर्ता येषां तेषां भाववचनानामिति न
वेषे॥ भावकर्तृकाणामिति। रुजार्थानां भावकर्तृकाणामित्येव सूत्रयितुमुक्तं। चौरस्येति। चुराशीलमस्य चौरः। अत्र कर्मणः शेषत्वविवक्षायामनेन ष

ारोगो भावोऽभिधीयते सच रुजार्थानां कर्ता। कर्तृकर्मणोरिति शेषत्वान्न षष्ठी। भावकर्तृकाणां किं। श्लेष्मणा चौरं रुजा। मातुःपितं कञ्चन्यै चेत्यमरः। चौरं ज्वरयति
ज्वरयत्यन्तरुजार्थानामिति षष्ठ्यां प्रवृत्तौ षष्ठीशेषे सन्नेनेन षष्ठी षष्ठीति समासो न भवत्येवेति भावः। सर्पिषो नाथनमिति। सर्पिर्मे भूयादित्याशासनमित्यर्थ
व कनाथनमिति। यद्यपि कर्मत्वविवक्षायां कर्तृकर्मणोरिति षष्ठ्यासिद्धा तथापि शेषे विधिस्समासोऽत्र नतथापि तन्नगतिकारकोपपदानां कृदिति कृदुत्तरपदप्र
कृतिस्वरः समासान्तोदात्तत्वं तु यातश्रूयतेऽतस्तन्न शिष्यीति निष्कर्षः इति कौमुद्यां स्थितं। जासि। जसु ताडने नसुहिंसायामिति चुरादिस्सस्य ग्रहणं न तु दैवादिक
मुमोक्षणाङ्गुल्यसमासोऽत्रिनिर्देशाद्धिंसायामिति पञ्चनाञ्चानिप्रहणनमिति हन्तेरनु पूर्वस्येति गान्तं। प्रणीति। नेर्गदेति ... णत्वं। चुरादिरिति नटनाञ्चाविनि
तैरीर्यनिर्देशादिति भावः। क्राथनमिति। क्रथ हिंसायामिति घटादिरयमतस्तस्य मित्वे मितां ह्रस्वनिपातनाद्वृद्धिः। मित्वफलन्तु निपातनान्नास्त्यत्राचिण्णमुलोरिति

वृत्तदर्थस्य। २।३।५८। द्यूतार्थं क्रयविक्रयरूपव्यवहारार्थस्य च दिवः कर्मणि षष्ठी स्यात्। शतस्य दीव्यति। तदर्थस्य किं। ब्राह्मणान्दीव्यति
स्तौतीत्यर्थः। विभाषोपसर्गे। २।३।५९। पूर्वयोगापवादः। शतस्य शतं वा प्रतिदीव्यति। प्रेष्यब्रुवोर्हविषो देवतासम्प्रदाने। २।३।६१। देवतासम्प्र
दानकेऽर्थे वर्तमानयोः प्रेष्यब्रुवोः कर्मणो हविर्विशेषस्य वाचकाच्छब्दात्षष्ठी स्यात्। अग्नये छागस्य हविषो वपाया मेदसः प्रेष्य अनुब्रूहि
ितार्थमिति घयादेव स्थिति। यत्तु हरदत्तेनोक्तं। घवादिपाठोपयादयः पितृत्यातिदेशिकत्वेऽप्यङ्गपवाद्या दिसेतदर्थं इति। तन्न। घटादयः पित इति हि
तेन पूर्वेषां नन्तरत्वेनानामेषवित्वं तेतु त्वरादीनां परत्वमिति। अतएवा न रत्वं तास्वपोदशानुदात्तेतः पित इत्येति घयादेरेवस्थिति। पराणमिति। सुनातेवेतिवि
ादिषस्याभावः। ब्राह्मणाणमिति। आयादय आर्द्धधातुके वेत्यायस्य विकल्पः॥३॥ दिवस्तदर्थस्य। तच्छब्देनानन्तरप्रयोगे परामृश्यते नेतो च द्यूतेत्यर्थ
व्यवहारे च तु त्यार्थौ पूर्वसूत्रे गृहीतौ विवक्षाशयेनाह। द्यूतेति। पूर्वसूत्रएवविदिः पाठे तदर्थस्येति न कर्तव्यमिति यद्यपि लाघवं तथापि योगविभाग उत्तरार्थः
ीति। एकत्र पद इति न सम्बध्यते उत्तरसूत्रे विकल्पारम्भसामर्थ्यात्। अन्यथा पक्षे विकल्पितापोलयानुक्रोशेऽथ विभक्त्यन्तरसम्प्राप्त्यादृथैव विकल्प पा
दिति भावः। अन्ये त्वाहुः। लाघवात् पूर्वसूत्रेणैव दिवो ग्रहणे कर्तव्ये पृथग्योगकरणसामर्थ्यादत्र शेष इति न सम्बध्यते॥ नचोत्तरार्थं तत्ताद्दृथग्योगस्तेनोत्तरार्थ

ानाभावेन फलस्य ह्रस्वस्यापि सुवचत्वादिति शेषः स्वस्यासंबंधादिह निरूस्यांतिङंतमुदाहरति। शतस्य दीव्यतीति। प्रेष्यब्रुवोः ह्रस्यतेर्देवादिकस्य लोये म
ह्वैकवचनं प्रेष्येति। तस्मा हवचयोः हविरपि तथाभूतएव गृह्यते। अतएव हरिशेषप्रहणं न संबध्यते तिङ्गेन सह समासस्याप्रसक्तत्वात्। प्रेष्यब्रुवोः किं। अग्न
ास्य हविर्वपामेदोनुब्रूहि। हविषः किं। अग्नये गोमयानि प्रेष्य देवतासंप्रदाने किं। माणवकाय पुरोडाशान् प्रेष्य। हविषः प्रस्थितस्येन निरोधः एवं प्रतिषेधो
रंद्राग्निभ्यां छागस्य हविर्वपामेदः प्रस्थितं प्रेष्य॥ ॥ कृत्वोर्थ। कृत्वसुचोर्थः इवार्थः येषां प्रत्ययानां ते कृत्वोर्थाः शेषे इति। इह हि विवक्षार्थं सुत्वादिकृत्य
कृत्वमपि शेषग्रहणमनुवर्तते व्याख्यानात्। पंचकृत्वश्चरति। संख्यायाः क्रियेत्यादिना कृत्वसुच्। द्विरिति। द्वित्रिचतुर्भ्यः सुच्। कर्तृकर्मणोः कृति। शेषद
ार्थं प्रयोगे कालेऽधिकरणे। २।३।६४। कृत्वोर्थानां प्रयोगे कालवाचिन्यधिकरणे शेषे षष्ठी स्यात्। पञ्चकृत्वोह्नो भोजनं। द्विरह्नो भोज
पि किं। द्विरहन्यध्ययनं। कर्तृकर्मणोः कृति। २।३।६५। कृद्योगे कर्तरि कर्मणि च षष्ठी स्यात्। कृतस्य कृतिः। जगतः कर्ता कृष्णः। गुणकर्म
ण्यते। नेताऽश्वस्य स्रुघ्नं स्रुघ्नस्य वा। कृतीति किं। तद्धिते माभूत्। कृतपूर्वी कटं। उभयप्राप्तौ कर्मणि। २।३।६६। उभयोः प्राप्तिर्यस्मिन् कृति तत्र कर्म
ण्येव षष्ठी स्यात्। आश्चर्यो गवां दोहोऽगोपेन। स्त्रीप्रत्यययोरकाकारयोर्नायं नियमः। भेदिका बिभित्सा वा रुद्रस्य जगतः। शेषे विभाषा। स्त्रीप्रत्य
य इत्येके॥ विचित्रा जगतः कृतिर्हरेर्हरिणा वा। केचिदविशेषेण विभाषामिच्छन्ति। शब्दानामनुशासनमाचार्येणाचार्यस्य वा॥ क्तस्य च व
र्तमाने। २।३।६७। वर्तमानार्थस्य क्तस्य योगे षष्ठी स्यात्। न लोकेति निषेधस्यापवादः। राज्ञां मतो बुद्धः पूजितो वा॥ ॥ तिनिष्ठनं कर्तरि च कृतीति
ते चकारेणाधीगर्थेति सूत्राच्च तुर्थ्यर्थे बहुलं छंदसीति पर्यंतमनुवर्तमानस्य कर्मणीत्यस्यानुकर्षणसंभवेपि पुनरत्र कर्मग्रहणादित्याहुः
सन्निहितस्याधिकरणस्यानुकर्षणप्रसंगेन न तन्निहितेषु कर्मग्रहणासंभवात् तस्मात् व्याख्यानमेवात्र शरणमित्यपरे। कर्तृकर्मणोः किं। शस्त्रेण भे
त्तिरिति करणे कृतिः। स्वेषां किंतु कृष्णोऽत्र कर्ता कर्मण्युदाहरति जगत इति। कृष्णस्य तु वाभिहितत्वात् ततः षष्ठी न भवति। कृतीति किं। ननु इह कर्तृ
क्रियाया आश्रित्यत्वे न तद्वाचीनु धातुरेव। धातोश्च द्वये प्रत्ययाः। कृतस्तिङश्च तत्र तिङ् प्रयोगे कटं करोतीत्यादौ न लोकेति प्रतिषेधेन भाव्यं तत्तत्परिशेषा

तेन स्यात्किं कृद्ग्रहणेनेति प्रश्नः। कृतपूर्वी कटमिति। अत्र करोतिक्रियापेक्षमनभिहितं कर्मत्वं कटस्येति वेति षष्ठी स्यात्तद्धिताभिधेये तु सामान्ये
न्ग्रहणमिति भावः। ननु कृतः कटः पूर्वमनेनेत्यस्मिन्विग्रहे कटस्य कर्मणि विधानात्तेनैवाभिहितं कर्मेति नैव द्वितीया प्राप्नोति नापि तदपवादस्तन्नाप्य
प्यनभिहिताधिकारात्। किं च। कृतशब्दस्य कटसापेक्षत्वात्समासो दुर्लभ एव तद्धितोऽपीति चेदत्राहुः। पूर्वं कृतमनेनेति विग्रहेऽविवक्षितकर्मकत्वा
त्प्रत्यये कृते कृतशब्दस्य कटसापेक्षत्वाभावात्। समासस्तद्धितो भवतस्तथा च कृतपूर्वीत्ययं पूर्वं कृतवानित्यनेन समासार्थः संपद्यते गुणभूतयापि
कारकाणां संबन्धस्य कृदन्तवाच्यत्वादर्शनादत्रापि करोतिक्रियापेक्षं कर्मत्वं कटस्याभ्युपगम्यते। न च कर्मत्वं केनाप्यभिहितं भावे क्तस्य कर्तरि
प्रत्ययस्य च विधानात्। अतोऽसति कृद्ग्रहणे षष्ठी स्यादेवेति। एवं च ओदनस्य पाचकतम इत्यत्र षष्ठ्याः साधुत्वे दुष्टापत्तिरेव शरणम्। कृतपूर्वीत्य
त्र तद्धितो भवत एवेत्युक्तं। तत्र समासः सुप्सुपेति बोध्यः। तद्धितस्तु पूर्वादिनिः सपूर्वाच्चेति कर्तरि इनिः। तद्धितो श्राद्धमनेनेति सूत्रादनेनेत्यनुवृत्तेः। स्या
देतत्। पर्यायार्हर्णोत्पत्तिषु ण्वुजिति ण्वुचि भेदिका यज्ञदत्तस्य देवदत्तस्य काष्ठानामित्युभाभ्यामप्यनेन कृद्योगषष्ठी जायते। तत्र मुख्यामुख्यसन्निधौ
च कार्यसंप्रत्ययात् प्रयोजककर्तृवाचकादेव स्यादन्यथा पाचयत्योदनं देवदत्तेन यज्ञदत्त इत्यत्र प्रयोज्यप्रयोजकयोरुभयोरपि लकारवाच्यत्वे उभा
कर्तृवाचकाभ्यां प्रथमा स्यात्। मैवं। प्रयोज्यप्रयोजकवाचकाभ्यां भेदेन षष्ठी जायते न त्वेकैवेति नेह मुख्यामुख्यन्यायप्रवृत्तिः। तत्र तु लकारस्यैकत्वा
त्तद्वाच्यत्वकल्पनायां मुख्यन्यायः प्रवर्तत इति वैषम्यात्। एवं च ओदनः पाच्यते देवदत्तेन यज्ञदत्तेनेत्यादावुभाभ्यामपि तृतीया स्यादेवेति बोध्यम्। अत्र
ना तदर्हमिति निर्देशात् कर्तृकर्मणोः कृतीत्येतदनित्यं तथा च पयैराशीदमुतमिति भट्टिप्रयोगः संगच्छत इति। उभयप्राप्तौ कृतीत्यनुवर्तते। ते।
दार्थत्वाभावाद्बहुव्रीहिरित्याह। उभयोः प्राप्तिर्यस्मिन्निति। उभयशब्देन कर्तृकर्मणी परामृश्येते। नैकस्मिन्कृति कर्तृकर्मणोः प्राप्तिरिति लाभायास्य
रनस्य पाको ब्राह्मणानां च प्रादुर्भाव इत्यत्र नायं नियमः प्रवर्तते तेन ननु पुरुष्येत्तु स्यादेवा चातिप्रसंग इति भावः। पूर्वसूत्रेणैव सिद्धे नियमार्थमिदमिति ध्व
कर्मण्येवेति। एवं च कर्तरि षष्ठीप्रतिषेधोऽयमस्य सूत्रस्य फलं न तु कर्मणि षष्ठीविधानमिति स्थितं। स्त्रीप्रत्यययोरिति। स्त्रियां क्तिन्नित्यधिकारे विहितयोः

णीकर्मण्येव षष्ठी न तु कर्तरीति यो नियम उक्तस्स न प्रवर्तते किंतु कर्तर्येव षष्ठी प्रवर्तत इति फलितोऽर्थः। कथं तर्हि सुदर्शनियो विनिवृत्ते सुरासीप्सितेवापे
नेः। अत्राहुः। कर्तुः करणत्वविवक्षायां तृतीयायां वा ध्यति। भेदिकेति। भेदनं भेदिका। पर्यायार्हणोत्पत्तिषु ण्वुच्। धात्वर्थनिर्देशे ण्वुल् वक्तव्य इत्यनेन ण्वुल्। निर्
रना कौ स्त्रियां दापि प्रत्ययस्थादिति इत्वं। बिभित्सेति। भेत्तुमिच्छा। भिदेस्सन्निहलन्ताच्चेति कित्वाद्गुणाभावः। अप्रत्ययादिति अकारप्रत्ययेऽप्रा। शेषे
ष्वकाः। काराभ्यामन्यस्मिन् कित्वादावित्यर्थः। कर्तरि षष्ठीनिषेधफलकस्योभयप्राप्ताविति सूत्रस्य तत्रैव कर्मणि षष्ठीसंपादनफलकस्य स्त्रीप्रत्यय
कारयोरिति वचनस्य च प्राक् स्थितत्वात् कर्तर्येव विभाषा। अनेन शेषवचनेन क्रियते न तु कर्मणीत्याशयेनोदाहरति। जगतः कर्ता इह रहरिणा वे
अकरणवाचिनश्च। २।३।६८। क्तस्य योगे षष्ठी स्यात्। इदमेषामासितं। न लोकाव्ययनिष्ठाखलर्थतृनां। २।३।६९। एषां प्रयोगे षष्ठी न स्यात्
देशाः। कुर्वन् कुर्वाणः सृष्टिं हरिः। उ। हरिर्दिदृक्षुः अलङ्करिष्णुर्वा। उक। दैत्यान् घातुको हरिः। कमेरनिषेधः। लक्ष्म्याः कामुको हरिः। अ
। जगत्। सृष्ट्वा। सुखं कर्तुम्। निष्ठा। विष्णुना हता दैत्याः। दैत्यान् हतवान् विष्णुः। खलर्थः। ईषत्करः प्रपञ्चो हरिणा। तृन्। निन्दितारः शत्रून्
न्नाविति तृन्शब्दाद्दारारभ्य तृनो नकारात्। शानन्। सोमं पवमानः। चानश्। आत्मानं मण्डयमानः। शतृ। वेदमधीयन्। तृन्। कर्ता लोका
द्विषः शतुर्वा। मुरस्य मुरं वा द्विषन्। सर्वोऽयं कारकषष्ठ्याः प्रतिषेधः। शेषे षष्ठी तु स्यादेव। ब्राह्मणस्य कुर्वन्। नरकस्य जिष्णुः॥ ९॥
विशेषेणेति। अककारभिन्नेत्कृत्स्वित्यर्थः। अनुशासनमिति। अनुशिष्यन्ते असाधुशब्देभ्यः प्रविभज्य बोध्यन्ते येनेति करणे ल्युट्। सतां ज्ञानमत।
। मतिबुद्धिपूजार्थेभ्यश्चेति वर्तमाने क्तः। पूजितो यः सुरासुरैरित्यादौ तु भूते क्तो न तु वर्तमाने तेन तृतीया न चोपपद्यते। न च मतिबुद्धीति सूत्रेण बाधः शङ्क्य
अधिकारे उपपदानि इति लिङ्गेनाबाधकत्वापनात्॥ ॐ॥ अधिकरण। अयमपि निषेधापवादः। आसितमिति। आस्यतेऽस्मिन्नित्यासितं क्तोऽधिकरणे च।
करणे क्तः। इदमेषामिति। कर्तरि षष्ठीयं। सकर्मकेभ्यस्त्वधिकरणे क्तेऽनेककर्तृकर्मणोर्द्वयोरपि षष्ठी अनभिहितत्वाविशेषात्। इदमेषां भुक्तमोदन।
य षष्ठी कर्मण्येवेत्ययं नियमस्तु नेह प्रवर्तते कर्तृकर्मणोः कृतीत्यनन्तरस्यास्य एव षष्ठ्यास्तन्नियमाभ्युपगमात्। एतच्च कौस्तुभे स्पष्टं। न लोका। ॥ ९॥

श्रित स्य विनाशप्रसंगात् तृनामित्यत्र णत्वं न कृतं। उष्ट्र उक्थर्ईकौ नस्थ ऊर्कौ चेति विग्रहः तृ इति लडादीनां सामान्यग्रहणं तेषां च साक्षात्प्रयोगेन संभव
देशाग्रहणं तदित्याह। लादेशा इति। उदाहृियंत इति शेषः। कटं कारयांचकार इत्यत्र लस्य अकलिङ्गता यं तेनानुप्रयोगेपि कटस्य कर्मणोः कृतीति षष्ठी न भवति
जुको पि तारेश न्यादित्याह। ननु एवमपि चक्रि वर्धनपपि सोमं ददिर्गौ इत्यत्र नतो वैतिनिषेधप्रसक्तौ यक्षी दुर्वारैव। नहि किकिनौ लकारेणापि नराशैव
न। ककिनौ लिट् चेत्यनेन लिट्कार्यातिदेशः क्रियते न तु लिट् संज्ञा न याच विशेषातिदेशेन सामान्यमप्यतिदिश्यत इति नानुपपत्तिः। इति दर्शयितुं सना
कृ। उकारेण कृतौ विशेषणान्तरं नमपि लभ्यत इत्याशयेनाह। अलंकरिष्णुरिति। अलंकृञ्निराकृञ् इत्यादिना इष्णुच्। चानुकर्षति। न पतेत्यादि
त्रार्थ इत्करइति। ईषदुत्सुचिन्त्यादिना खल्। अर्थग्रहणादीषत्पानः सोमो भवतेत्यत्र पूराहार्यं। अथापि परिहर्तुमाह। अन्याहार इति। पचमान इति पूर्व
कृकेनोर्भविष्यदाधमर्ण्ययोः। २। ३। ७०। भविष्यत्यकस्य भविष्यदाधमर्ण्यार्थेनयोगे षष्ठी न स्यात्। सतः पालकोऽवतरति। व्रजं ग्रामी शत
प्री। कृत्यानां कर्तरि वा। २। ३। ७१। षष्ठी वा स्यात्। मया मम वा सेव्यो हरिः। कर्तरीति किं। गेयो माणवकः साम्नां। भव्यगेयेति कर्तरि यद्विधानादनभि
हितत्रकर्म। अर्थयोगो विभज्यते। कृत्यानां उभयप्राप्तौ विति नेति निषेधानुवर्तते। नेननेन भव्या ग्रजक्षावः कृतेन। ततः कर्तरि वा उक्तोर्थः॥
प्रानन्तं मंडमान इति। अधि भूषायामिति दिन्यात्युम्। तान्छील्यवयोवचनेति चानश्। अधीयन्निति। इडधावौ रिति शतृ तान्तं नात्र्दिपुलटरत्यनतुर्त्वात्।
पञ्चिष्ठः प्रत्याहारग्रहणमाश्रीयत इति भावः। तृन्निति। तन्छीलादिषु तृन्निति विहित तृनुत्पन्यः। तृचि इति प्रत्याहारग्रहणाच्छितृं मि पै पेमासे विकल्पमाह
इति दिश्य प्रीताविन्यस्मात् द्विषोः मित्र इति विद्विषोपः शतृप्रत्ययः न नप्रयोगे वा षष्ठी निषेध प्रत्यर्थः स्व वीयमिति। अनेनतरस्येति न्यापादि निशेषः। शेषु
शब्दो धेवैत्तरण्यमस्तीति भावः। एवं चास्य योग वाद्रोहोः गोपेनेत्यत्र शेष नुविवक्षायां कर्मणि षष्ठी भवत्येवेति बोध्यं॥ ॥ अकेनोः। अधमर्ण्य
स्यासंभवाद्राह। भविष्यत्यकस्येति। इन स्तु उभयोः संभवादाह। भविष्यदाधमर्ण्यार्थेनयोगे इति षष्ठ्यां संख्यानुनभवति। भाव्ये अकस्य भविष्यतीति इन
चेतियो गं विभज्य व्याख्यानात्। इह भविष्यदिति स्वरूपेनेन भविष्यति गम्यादयः इत्यधिकारे विहितस्तुमुन्ण्वुलादि निरस्तुलेवगृह्यत इत्याशयेनोदाह इति

तोऽत्र तं यत्स्तु कालसामान्येण लुलत्वा विनिष्ठलुनः स्वतन्ननिषेधः। ओदनस्य पाचकः पुत्रपौत्राणां दर्शकः इति भावः। व्रजं गामीति। आवश्यकाधम
र्णीनि इत्यावश्यके णिनिः। भविष्यत्काल सामान्येवि हितत्वाद्वाधिभविष्यति गम्यादय इत्यनेन भविष्यदर्थकः। गम्यादयः केचित् उणादयः केचित् स्था
ऽइति हृद्दनः। ननु गत्यर्थकर्मणि चतुर्थी चेत्येव सिद्धे द्वितीयाग्रहणमपवादविषयेऽपि द्वितीया प्रवृत्त्यर्थमिति व्रजं गामीति सिध्यत्येवेति चेदत्राहुः
सूत्रे ग्रामं गामीति भाष्योदाहरणानन्तसूत्रं नागोजि क्रियते तेन ग्रामस्य गन्तेति षष्ठ्येव साध्वी। ननु ग्रामं गन्तेति द्वितीयेति। शतं दायीति आवश्यके ण्यु
निः। भविष्यदाधमर्ण्यार्थेन स्य योगात् इत्युक्तत्वाच्चेद्दति निषेधः। अवश्यं करी अवश्यंकारी कटस्य। गम्यादिना भावात् वर्तमाने ण्यु। कृत्यानां कर्तरि वा। कर्तृकर्मणो
न्तेत्याप्ते विभाष्येयं। सेव्य रभिषेत्रसेवायो। भवद्गलौ रिति। कर्मणि णिष्पन्नत्वाभो गौ विभज्यन्त इति भाष्यकारैरिति शेषः। उभयप्राप्तौ विभज्यते नेन कर्तरि निषे

तुल्यार्थैरतुलोपमाभ्यां तृतीयाऽन्यतरस्यां। २।३।७२। तुल्यार्थैर्योगे तृतीया वा स्यात् शेषे षष्ठी। तुल्यः सदृशः समो वा कृष्णस्य कृष्णेन वा। अ
तुलोपमाभ्यां किं। तुला उपमा वा कृष्णस्य नास्ति। चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः। २।३।७३। एतदर्थैर्योगे चतुर्थी वा स्यात्
शेषे षष्ठी आशिषि। आयुष्यं चिरं जीवितं कृष्णाय कृष्णस्य वा भूयात्। एवं मद्रं भद्रं कुशलं निरामयं सुखं शं अर्थः प्रयोजनं हितं पथ्यं
भूयात्। आशिषि किं। देवदत्तस्यायुष्यमस्ति। व्याख्यानात्सर्वत्रार्थग्रहणं मद्रभद्रयोः पर्यायत्वादन्यतरेण पठनीयं।। (क्रि)देकर्मणि निषेधायोगी
कर्मणि चेत्यत्र इति नभयप्राप्तिरहितस्थले नेनाष्यस्थेत्यादौ च विनायामिति दिक्।। ॐ।। तुल्यार्थैः। शेषपक्षं प्रायशो नित्यकृत्सेन चतुर्थ्या अनेन विधी
युक्तेषु पक्षे च भवेदिति तत्त्वं।। पक्षे षष्ठीति — बहुवचननिर्देशादेव पर्यायग्रहणे सिद्धे तुल्यार्थैरित्यर्थग्रहणं पर्यायान्तरैरपि स्याच्छाये तुल्यार्थौ स्तो वा ग्रहण
गौरिव गवय इत्यादौ नेष्यते। कथं तर्हि तुलां यदारोहति दन्तवाससेति कालिदासः। स्तुवे पञ्चमे स्तुतिभिर्नरास्तुनेति भाष्यम्। उच्यते। सहशब्दे प्रधानत्वे
चाच सहशब्दयोगे न तृतीया विना पितृयोगं तृतीयेत्यभ्युपगमात्। वर्तमाने चान्यतरस्यां ग्रहणात् तु नरस्त्रे चकारेणास्त्रस्यातु कर्मण्यार्थे। अन्यथा हि। न
तु कथ्येत सविहितत्वात्। तुल्य इति। तुला यासंमितं स्तुतः। गौ वयौ धर्मेणादिनायत्तात्। तुलोपमा वेति। तोलनं तुला। अस्मिन्नेव सूत्रे निपातन

ातश्चोपसर्गद्वयम्। हितमिति। हितयोगे चेत्यनाशिषि। विच्छिन्नतार्थमित्याशिष्यत्वं विकल्प इति भावः। व्याख्यानादिति। सूत्रे अर्थशब्दोऽपृथक् निमित्तं तथा
ायं नन्वर्थशब्देन चतुर्थी ह्रियते इति भावः। इति षष्ठी॥ ॥आधारः। कार्यप्रयत्ने सिध्यतीत्याधारः। अध्यायपूर्णायेति सूत्रेणैव सूत्राधारे तूपसंख्यानाद्धिकरणेषु
ारः कस्मिन्नाकरणे का पाकारकाधिकारात् क्रियायामिति लभ्यते। एवं च संज्ञासामर्थ्यात् क्रियाधारत्वेनैव समन्वयेति परम्पराकर्तृकर्मसंज्ञाभ्यां न्यायविनमत्ता यत्तो
कर्तृकर्मद्वारेति। एवं च स्थालेपचत्यादौ व्यक्तीति क्रियाया व्याहारो बोध्यः। त्रिधेति। एतच्च संहितायामिति सूत्रे भाष्ये स्पष्टं। नयामाश्वे इत्यादावप्ये सामीपि
करणं चतुर्थमपि केचिदिच्छन्ति। कटे आस्त इति। कर्तृद्वारा क्रियाधारस्योदाहरणमिदं। कर्मद्वारा क्रियाधारस्तु स्थाल्यां पचतीति। वैषयिकाधारस्त्वाह इति
ारोऽधिकरणम्। १।४।४५। कर्तृकर्मद्वारा तन्निष्ठक्रियाया आधारः कारकमधिकरणसंज्ञं स्यात्। सप्तम्यधिकरणे च। २।३।३६। अधिकरणे
ी स्यात्। चकाराद्दूरान्तिकार्थेभ्यः। औपश्लेषिको वैषयिकोऽभिव्यापकश्चेत्याधारस्त्रिधा। कटे आस्ते। स्थाल्यां पचति। मोक्षे इच्छास्ति। सर्वस्मि
न्नात्मास्ति। वनस्य दूरे अन्तिके वा। दूरान्तिकार्थेभ्य इति विभक्तित्रयेण सह चतस्रोऽत्र विभक्तयः फलिताः। क्तस्येन्विषयस्य कर्मण्यु
पसंख्यानं। अधीती व्याकरणे। अधीतमनेनेति विग्रहे इष्टादिभ्यश्चेति कर्तरीनिः। साध्वसाधुप्रयोगे च। साधुः कृष्णो मातरि। असाधुर्मातुले। निमि
त्तात्कर्मयोगे। निमित्तमिह फलं। योगः संयोगसमवायात्मकः। चर्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुञ्जरं। केशेषु चमरीं हन्ति सीम्नि पुष्कलको ह
तः॥ हेतौ तृतीयाऽत्र प्राप्ता तन्निवारणार्थं। सीमाऽण्डकोशः। पुष्कलको गन्धमृगः। योगविशेषे किं। वेतनेन धान्यं लुनाति॥ मोक्षे इच्छास्तीत्यभि
व्यापकस्तु सर्वस्मिन्निति। तिलेषु तैलमित्याद्यप्यभिव्यापकस्योदाहरणमाहुः। वनस्य इति। प्रातिपदिकार्थमात्रे इत्यर्थः। दूरान्तिकार्थेभ्य इत्यस्योदाहृत्तु चतुर्
करणेष्वेते बोध्याः। क्तस्येन्विषयस्येति। इन् इन्नन्तः शब्दो विषयो वर्तते यस्य तस्य क्तान्तस्येत्यर्थः। अन्ये त्वाहुः। इनो विषय इति षष्ठीसमासः। विषयशब्दे
ति रूप्यते क्तान्तस्येनः प्रकृतत्वादिति। अधीती व्याकरणे इति। भावे क्तप्रत्यये तत इष्टादिभ्यश्चेति कर्तरीनो ज्ञाने पश्चाद्गुणभूतक्रियया सम्बध्यमानं व्याकरणं
तं कर्मेति कृतपूर्वी कटमितिवद्द्वितीया प्राप्ता समासमधीती व्याकरणे इत्यादौ तु कर्मकर्तृयोगनिमित्तकस्य कालकर्मणो बहिरङ्गत्वादिहाग्रहणमिति सह

तुरीयेणेन द्वितीयाविधानेऽप्यभिप्रायसाम्यप्रयुक्तान्। साध्वसाधुप्रयोगे च। अत्रार्चनविवक्षितायां किंतु न तु कथनमात्रं तत्रापि सप्तम्यर्थं वार्तिकेऽस्मिन् साधुग्रहणं। सा
नाचीनादिव्यवायात् पुनिपुणाभ्यामिति सूत्रे साधुग्रहणं न तु यां विवक्षितायां प्रतियोगे सप्तमी निरूपणार्थमिति विवेकः। निमित्तमिह फलमिति। यदि तु कारणमित्यु
ङ्गेनाहोनेन वद्दत्वारावनिप्रसंगः स्यादिति भावः। चर्मणीति। चर्मणि द्वीपादीनां समवायः संबंधः। हेतुतृतीयेति। तादर्थ्ये चतुर्थ्यपि बोध्यं। सीमाऽडकोशे इति नपुं
रिनीकारः। सीमाघाटस्थितिस्त्रियामित्यमरः। अथ पुष्कलकौ गंधमृगे स्यात्कीलये इति च हरदत्तस्तु पुष्कलकः शंकुः। सीमा स्त्री मर्या
हतोऽनिहतः निर्बानरत्वात्। अस्मिंस्तु पक्षे सीमपुष्कलकयोः संयोगसंबंधः॥ ॥ यस्य च। निर्ज्ञातकालाद्धि क्रियान्तरं निर्ज्ञातकालाया क्रियायाः
रिच्छेदकत्वात् लक्षणं तत्र प्रसिद्धक्रियाश्रययोः कर्तृकर्मणोर्वाचकात्। ब्राह्मणादिशब्दात् लक्ष्यलक्षणभावसंबंधे षष्ठ्यां प्राप्तायामियं सप्तमी। ननु कर्त

स्य च भावेन भावलक्षणं। २।३।३७। यस्य क्रियया क्रियान्तरं लक्ष्यते ततः सप्तमी स्यात्। गोषु दुह्यमानासु गतः। अर्हाणां कर्तृत्वेऽन
र्हाणामकर्तृत्वे तद्वैपरीत्ये च। सत्सु तरत्सु असत्स्वासते। असत्सु तिष्ठत्सु सत्सु तरन्ति। सत्सु तिष्ठत्सु असत्सु तरन्ति। असत्सु तरत्सु सत्सु ति
ष्ठन्ति। षष्ठी चानादरे। २।३।३८। अनादराधिके भावलक्षणे षष्ठीसप्तम्यौ स्तः। रुदति रुदतो वा प्राव्राजीत्। रुदन्तं पुत्रादिकमनादृत्य संन्यस्तवा
नित्यर्थः॥

पाः साक्षादाश्रयस्तु ब्राह्मणादेः क्रियाद्वारेणेति बोध्यं। ब्राह्मणेष्वधीयानेषु गत इति कर्तृत्वोदाहरणं। कर्मण्याह। गोष्विति। अर्हाणां
त्यादि। यस्यां क्रियायां येऽर्हाः तेषां कर्तृत्वे विवक्षिते सति तत्र सप्तमी वाच्या। तथा यस्यां क्रियायां येषां कर्तृत्वमनुचितं तेषामकर्तृत्वे विवक्षि
ते सप्तमी वाच्या। तथा तद्वैपरीत्ये येषां कर्तृत्वमनुचितं तेषामकर्तृत्वे येषां तु नोचितं तेषां कर्तृत्वे च सप्तमी वाच्येत्यर्थः। आद्यमुदाहरति। सत्सु तरत्सु इति। संतो हि
क्रियार्हाः कर्तारश्च द्वितीयमुदाहरति। असत्सु तिष्ठत्सु इति। अत्र तरणक्रियायां असतामनर्हत्वमकर्तृत्वं च तिष्ठत्स्विति अनेन प्रतीयते तद्वैपरीत्ये प्रथ
हरति। सत्सु तिष्ठत्स्विति। सतां हि तरणमनुचितं तेषां चाकर्तृत्वं तिष्ठत्स्विति अनेन बोध्यते द्वितीयमुदाहरति असत्सु तरत्स्विति असतां हि तरणमनुचि
कर्तृत्वं तरत्स्विति अनेन गम्यते॥ यद्यपीदं यस्य च भावेनेत्येव सिद्धं तथापि लक्ष्यलक्षणभावाविवक्षायां सप्तम्यर्थमिदमिति कैयटादयः। तन्न तत्त्वार्थ

ापष्ठी चानादरे। अनादर इति। यस्य च भावेनेत्यनेन सप्तमी। अनादरे सति योऽभावः स वध्यपतीति। न रेतत्फलितमाह। अनादराधिक्य इति। केवलभावलक्षणे सप्तमे
दराधिक्ये तु षष्ठीसप्तम्याविति निष्कर्षः॥ ३८॥ स्वामीश्वर। स्वाम्यं चैतिच्च तत्स्वाम्यादित्रयग्रहणं पर्यायान्तरनिवृत्त्यर्थम्। विरूपाणामपि समानार्थानामिति किं शेषो
ति स्वरूपपरत्वेन समानार्थत्वाभावात्। दायमादत्त इति दायादः। सोपसर्गाद्दानात् अत एव निपातनात् कः। गवां गोषु वा स्यादित्यत्र पृथगपि गवामि
मुदायस्य विशेषणत्वं नाविदीयते। सो दायद इति सुत्यन्तानामन्वयार्थभूतमंशं स्पृशत्येव तथा चात्र गवात्मकस्वांशस्य आदानेति फलितोऽर्थः पंचमीविभक्ते। भेद

मीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च। २।३।३९। एतैः सप्तभिर्योगे षष्ठीसप्तम्यौ स्तः। षष्ठ्यामेव प्राप्तायां पाक्षिकसप्तम्यर्थं वचनं। ग
षु वा स्वामी। गवां गोषु वा प्रसूतः। गा एवानुभवितुं जात इत्यर्थः॥ आयुक्तकुशलाभ्यां चासेवायां। २।३।४०। आभ्यां योगे षष्ठीसप्तम्यौ स्त
स्तात्पर्ये। आयुक्तो व्यापारितः। आयुक्तः कुशलो वा हरिपूजने हरिपूजनस्य वा। आसेवायां किं। आयुक्तो गौः शकटे। ईषद्युक्त इत्यर्थः। यतश्च
निर्धारणं। २।३।४१। जातिगुणक्रियासंज्ञाभिः समुदायादेकदेशस्य पृथक्करणं निर्धारणं यतस्ततः षष्ठीसप्तम्यौ स्तः। नृणां नृषु वा ब्राह्मणः श्रेष्ठः। गवां
गोषु वा कृष्णा बहुक्षीरा। गच्छतां गच्छत्सु वा धावन्तः शीघ्रः। छात्राणां छात्रेषु वा मैत्रः पटुः। पञ्चमी विभक्ते। २।३।४२। विभागो विभक्तं निर्धा
रणाश्रयस्य यत्र भेद एव तत्र पञ्चमी स्यात्। माथुराः पाटलिपुत्रकेभ्य आढ्यतराः। साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः। २।३।४३। आभ्यां
योगे सप्तमी स्यादर्चायां न तु प्रतेः प्रयोगे। मातरि साधुर्निपुणो वा। अर्चायां किं। निपुणो राज्ञो भृत्यः। इह तत्त्वकथने तात्पर्यं। अप्रत्या
दिभिरिति वक्तव्यं। साधुर्निपुणो वा मातरं प्रति पर्यनु वा॥

४१ यतश्चेति। नृणां ब्राह्मणः श्रेष्ठ इति। नृत्वं तदन्तरोपात्तसामान्यात्कं तन्नेति भावः। तत्र पंचमी स्यादिति। ननु नैवं मा
त्वापि पंचमी स्यात्। नैवं। पूर्वसूत्रमिहानुवर्तनीयेन यतो निर्धार्यते न एव तन्न यतो निर्धारणावधेरेव पंचमीप्रवृत्तेः। अतमभिहितापि स्यादन्यथा माथुरा इत्यत्र तत्ता
दत्यन्ते। माथुरा इति। नन्वत्र निर्धारणावधेर्निर्धार्यमाणस्य च गवां कृष्णेत्यादाविव सामान्यविशेषभावो नास्ति। किंतु एकदेशोपात्तयोर्भेदयोर्विरोध एव। एवं च
दृष्टपरिकल्पितनाशायमाश्रित्यापादानमुक्तं दोषाभावः प्रतीतावस्थानात्। साधुनिपुणाभ्यामर्चायां प्रशंसकर्मणि शुभेश्च स्यादिपूर्वादिरुपपदलक्षणः कः॥ ॥

यामस्याद्रौ वा दिकान् गुरौ स्वहत्वरूपप्रत्ययेनाप्। चौरादिका गुणया सप्तम्यं यद्वनिपुणं वर्तनेनिस्यात्। निपुणो राज्ञइति। साधुशब्दप्रयोगेनर्चा विनासप्तमीभ
ज्ञका धुप्रयोगे चेति वार्तिकात्। अप्रत्यादिभिरिति। जनरोगोन्यभिनिसङ्गोपाना: प्रत्यादयः॥ ४४॥ प्रसितोत्सुकाभ्यां तन्यरे प्रसितासक्तावित्यमरः। उत्सुक
न् मसितोपितत् परस्त्वेवेहत्यस्यतेरुक्ता चनेनमकर्तृणसितः सुक्तरत्यर्थेनभवति। नक्षत्रेचलुपि॥ लुप्शब्दो वार्थविशेषेवा तशिकरत्वाशयेनाह॥
त्र येत्यादि। अधिकरणइति। एतच्च सप्तम्यधिकरणे चेत्यतो मंडूकप्लुत्यानुवर्तनमिति भावः। अधिकरणे किं। मूलप्रतीशानेमूलापस्यह्यति। मूलेनेति। न

सितोत्सुकाभ्यां तृतीया च। २।३।४४। आभ्यां योगे तृतीयास्यात्सप्तमी। प्रसितउत्सुकोवा हरिणा हरौ वा। नक्षत्रे च लुपि। २।३।४५। नक्षत्रेप्र
यर्थे योलुप्संज्ञया लुप्यमानप्रत्ययस्यार्थेस्तत्र वर्तमानात्तृतीयासप्तम्यौ स्तोऽधिकरणे। मूलेनावाहयेद्देवीं श्रवणेन विसर्जयेत्॥ मू
वणेइति वा। लुपि किं। पुष्ये शनिः। सप्तमीपञ्चम्यौ कारकमध्ये। २।३।७। शक्तिद्वयमध्ये यौ कालाध्वानौ ताभ्यामेते स्तः। अद्य भुक्त्वायं
द्व्यहाद्द्व्यहे वा भोक्ता। कर्तृशक्त्योर्मध्ये यं कालः। इहस्थोऽयमिष्वासः क्रोशात्क्रोशे वा लक्ष्यं विध्येत्। कर्तृकर्मशक्त्योर्मध्येऽयं देशः। अधिकशब्देन योगे स
प्तमीपञ्चम्याविष्येते। तदस्मिन्नधिकमिति यस्मादधिकमिति च सूत्रनिर्देशात्। लोके लोकाद्वाधिको हरिः। अधिरीश्वरे। १।४।९७। स्व
स्वामिभावसम्बन्धेऽधिः कर्मप्रवचनीयसंज्ञः स्यात्। यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी। २।३।९। अत्र कर्मप्रवचनीययुक्ते सप्तमी।
त्। उपपरार्द्धे हरेर्गुणाः। परार्द्धादधिका इत्यर्थः। ऐश्वर्ये तु स्वस्वामिभ्यां पर्यायेण सप्तमी। अधिभुवि रामः। अधिरामे भूः। सप्तमी शौण्डैरिति समा

कः कालस्य योऽवयवविशेषे इतिलुप्। नक्षत्र इति किं। पंचालेषु वसति इहजनपदे लुविति लुप्। सप्तमीपंचम्यौ। कालाध्वनोरु ((सप्तसोत्तु·॥९
योग इत्यतः कालाध्वनोरित्यनुवर्तते तच्च पंचम्या विपरिणम्यते तदाह। यौ कालाध्वानौ ताभ्यामिति। इह कालाध्वभ्यां विभक्त्योर्विधानं स्वं न भवत्यस्वति
त्यद्य भुक्त्वायमिति। ननु त्र कर्ता एक एव तत्कथं कारकयोर्मध्ये कालः। सत्यं। नात्र शक्ता अयं इत्यं कारकमिति न्यवह्रियते किंतु शक्तिरेव। सा च का
भेदनरएव। एकाहि अद्य भुजेः साधनेऽपराह्ने द्वितीये भुजेस्त्वेतत्याचष्टे कर्तृशक्त्योर्मध्येऽयं काल इति। यस्मादधिकं। उपपरार्द्धे इति उपोऽधिके चेत्यनेन उपेत्य

श्वरवचनमित्यस्यतंत्रादिना अर्थद्वयंविवक्षितं। तथाहि। यस्येत्यनेनस्वंनिर्दिश्यतेयस्यस्वस्यसंबंधीईश्वरउच्यतेततः सप्तमीतिव्याख्यानेस्ववाच
प्तमीत्येकोऽर्थः। ईश्वरशब्दोभावप्रधानः। यन्निष्ठमीश्वरत्वमुच्यतेततः सप्तमीतिव्याख्यानेस्वामिवाचकात् सप्तमीत्यपरः। एवंस्थितेफलितमाह॥
मिभ्यांपर्यायेणेति। अन्यतरस्यामित्यनुवृत्त्यैव सप्तम्याद्वयोरपि संबंधस्याप्युक्तत्वा युगपदुभाभ्यां न सप्तमी स्यादिति भावः। विभक्त्यर्थः। व्ययीभावेना

माधीनः। अपडक्षेत्यादिना खः॥ विभाषाकृञि। १।४।९८। अधिः करोतौ प्राक्संज्ञो वा स्यादीश्वरार्थे यदत्र मामधिकरिष्यति विनियोक्ष्य
इत्यर्थः। इह विनियोक्तुरीश्वरत्वं गम्यते। अगतित्वात्तिङि चोदात्तवतीति निघातो न॥ ॥ इति विभक्त्यर्थाः॥ ॥

।यदत्रेति। यो मामधिकरिष्यति विनियोक्ष्यते तस्मिन् विनियोक्तुरीश्वरत्वं गम्यत इत्यर्थः॥ तिङि चोदात्तवतीति। उदात्तवति तिङि परे गतिर्निह
न्यतेति सूत्रार्थः। अत्र करिष्यतीति तिङ् नउदात्तवान्। तिङ्ङतिङ इति निघातस्तु निपातैर्यद्यदीत्यादिना निषेधात्। निघातो नेति। मामिति द्वितीया तु
कर्मणि द्वितीयेत्यनेनैव सिध्यतीति भावः॥ ॥ इति सप्तमी ॥ ॥

दविधिः ॥ सामर्थ्यं च द्विविधं व्यपेक्षालक्षणमेकार्थीभावलक्षणं चेति। तत्र स्वार्थपर्यवसायिनां पदानामाकांक्षादिवशाद्यः परस्परसंबंधः सा व्यपेक्षा सि
रूपवत्त्वं। सेन तत्र व्यपेक्षायां सत्यां योयं संनिहितो योग्यश्च तेन तेनार्थं बोधयति येषां शब्दानां पुरुषो यथा राज्ञो विशेषणत्वेन पुरुष इत्येकार्थीभावसूत्रेण पुरु
त्रासेव। तत्र प्रक्रियादशायां पृथगर्थत्वेन प्रथममुपस्थितानां विशिष्टैकार्थत्वरूपम्॥ अतएव राजपुरुष इत्यत्र ऋद्धस्य राज्ञ इति विशेषणं नान्वेति पदार्थैकदेशत्वा
द्देवदत्तस्य गुरुकुलमित्यादावनन्वयापत्तिः। तत्रापि देवदत्तोत्तरषष्ठ्यर्थस्य गुरुणान्वयादिति वाच्यं। देवदत्तस्य प्रधानभूतकुलेनैवान्वयात्। संबंधसामान्यस्य
कस्यचवस्तुनश्चयोनत्तु न दित रः उक्तं च। समुदायेन संबंधो येषां गुरुकुलादिना। संस्पृश्यावयवांस्ते तु युज्यन्ते न हुता सह इति। यद्वा। स संबंधिकपदार्थस्यैकदेश
त्वविशेषणानान्वयः उक्तं च। संबंधिशब्दः सापेक्षो नित्यं सर्वः समस्यते। वाक्यवत्सा व्यपेक्षा हि वृत्तावपि न हीयत इति। नन्वेवं राज्ञोपि नित्यमापेक्षत्वादेकदेशान्वे

ः पदविधिः।२।१।१। पदसम्बन्धी यो विधिः स समर्थाश्रितो बोध्यः। प्राक्कडारात्समासः।२।१।३। कडाराः कर्मधारय इत्यतः प्राक् समास इत्य
धिक्रियते। सह सुपा।२।१।४। सहेति योगो विभज्यते। सुबन्तं समर्थेन सह समस्यते। योगविभागस्येष्टसिद्ध्यर्थत्वात्क्वचित्तिङन्तेनोत्तरपदे
समासश्च हस्तेव। पर्यभूषयत्। अनुव्यचलत्। सुपा।२।१।४। सुप्सुपा सह समस्यते। समासत्वात्प्रातिपदिकत्वं। सुपो धातुप्रातिपदिकयोः।
मासेनोक्तनिर्देशोपपत्तेः। नेह तृजिति। न चोत्तरार्थं तच्छंक्यं। इह क्रीडाजीविकयोर्नास्तीति जयादित्येनोक्तत्वादिति भावः। वामनस्तु अके जीविकार्थे
क इति किं रमणीयकर्तेति प्रत्युदाहरन् जीविकायां तृचमिच्छति। भावे ण्वुलिति। भंजनं भंजिका। पुष्पाणामिति कर्मणि षष्ठी। भावव्युत्पत्तिपक्षे
करणे ण्वुलस्त्वपि वा धनाभावादिनिमित्ता संज्ञायामिति सूत्रे हरदत्तेन मनोरमायामुक्तं उद्दालकः श्लेष्मातकस्तस्य पुष्पाणि भज्यन्ते यस्यां क्रीडायां सा
उद्दालकपुष्पभंजिकेति॥ १६१ ॥ २ ॥ १ ॥

।एकदेशशब्दोवयववचनः अनन्यवचनत्वकर्मधारयत्वेपिनतेनमनर्थापि। हलसर्पवानित्यत्रेवनकर्मधारयान्नानर्थायइति निषेधस्यरूढेष्वप्रवृत्तेः।पदार्थ
पूर्वादिभिरिदंसमानाधिकरणत्वेनैवसादिनिसर्वेनरादि अवयविनेति। ननु दंतूर्व्यं पूर्वकायइत्यादिप्रयोगेणकर्मधारयेसिद्धे। ऊर्ध्वकायइत्यादि
हितत्वाः शब्दाअवयववेष्वपिप्रवर्तन्तइत्याशयादेतदाह। षष्ठीसमासापवादइति। नचाचकायपूर्वइत्यादौनिष्ठप्रयोगनिवृत्त्यर्थेसूत्रमितिभावः।पूर्वंकायस्येति।
र्धः परापरोत्तरमेकदेशिनैकाधिकरणे।२।२।१। अवयविनासहपूर्वादयःसमस्यन्तेएकत्वसंख्याविशिष्टश्चेदवयवी।षष्ठीसमासापवादः।पूर्व
मस्यपूर्वकायः।अपरकायः।एकदेशिनाकिं।पूर्वंनाभेःकायस्य।एकाधिकरणेकिं।पूर्वश्छात्राणां।सर्वोप्येकदेशोह्नासमस्यतेसंख्याविसायेतिज्ञापका
।मध्याह्नः।सायाह्नः। केचित्तुसर्वएकदेशःकालेनसमस्यतेनत्वहर्वज्ञापकस्यसामान्यापेक्षत्वात्।तेनमध्यरात्रःउपररात्रःपश्चिमरात्रोवरात्रस्यादि
दमित्याहुः। अर्धंनपुंसकं।२।२।२। समांशवाच्यर्धशब्दोनित्यंक्लीबेप्राग्वत्।एकविभक्तावपूर्वनिपातनवचनमेकदेशिसमासविषयकोयमुपसर्जनस
निषेधः।तेनपञ्चखट्वीत्यादिसिध्यति।अर्धंपिप्पल्याः।अर्धपिप्पली।क्लीबेकिं।ग्रामार्धः।द्रव्यैकत्वएव।अर्धंपिप्पलीनां।द्वितीयतृतीयचतुर्थतुर्याण्य
न्यतरस्यां।२।२।३।एतान्येकदेशिनासहप्राग्वद्वा।द्वितीयंभिक्षायाद्वितीयभिक्षा।एकदेशिनाकिं।द्वितीयंभिक्षायाभिक्षुकस्य।अन्यतरस्यांग्रह
सामर्थ्यात्पूरणगुणेतिनिषेधंबाधित्वापक्षेषष्ठीसमासः।भिक्षाद्वितीयं।प्राप्तापन्नेचद्वितीयया।२।२।४।पक्षेद्वितीयाश्रितेतिसमासः।प्राप्तोजी
विकां।प्राप्तजीविकः।जीविकाम्प्राप्तः।जीविकाप्राप्तः।आपन्नजीविकः।जीविकापन्नः। इहसूत्रेद्वितीययाअइतिच्छित्वाअकारोऽपिविधीयते।
तेनजीविकाम्प्राप्ता स्त्रीप्राप्तजीविका। आपन्नजीविका॥ ११ चयन्नाराविति सूत्रेदिशिदृष्टःशब्दोदिक्‌शब्दइतिव्याख्यानेनसंप्रत्यदिग्वृत्तिनामपि
ग्रीलो कृतेनियमस्तीहदुर्लभानयापिनस्यपरमात्रेडिनमितिलिंगात्दूरपवयवाचिदिक्‌शब्दयोगेपंचमीनेत्युक्तत्वात् षष्ठ्येवभवतीतिभावः।पूर्वंनाभेरितिनाभेर्यः
ःसकायस्यावयवइत्यर्थः।नाभेरितिदिग्योगलक्षणपंचमीनेनात्रपूर्वस्यभागस्यनाभिरवधिर्नत्वेकदेशिनेतिनाभ्यासमासोनेत्यर्थः।कायेनतुस्यादेवपूर्वकायं
नाभेरिति।पूर्वशब्दस्यनित्यसापेक्षत्वात्प्रधानत्वाच्चापूर्वश्छात्रा॥ ११ ॥

ति। नासौ निर्द्धारणे षष्ठी किंतु समुदायसमुदायिसंबंधे। बहुवचनं तूत्तावयवभेदसमुदायविवक्षया। ततश्छात्राणामेकदेशित्वेऽसत्यपि कालवैशिष्ट्यान्मा।
मासः। सर्वोऽपीति। पूर्वादिभिन्नोऽपीत्यर्थः। ज्ञापकादिति। मध्याह्नस्य सायम्पूर्वाह्णत्वस्यादिति भावः। मध्याह्नादिरपि तन्मात्रस्य विशेष्यत्वादिति हृदि। अन्ये
त्वाहुः। अयं चादेशः मध्याह्नशब्दयोरूर्ध्वकायवत्कर्मधारयेण निर्वहति। तस्यैकदेशिसमासप्रयुक्तत्वादतो ज्ञापकमप्ययं युक्तमेवेति वाच्यं। न
तीनत्वेवं दिनमध्यो रात्रिमध्यमित्यादि न सिद्ध्येदिति वाच्यं। ज्ञापकसिद्धस्यासार्वत्रिकत्वात्। अर्द्धं नपुंसकं। खंडवाच्यर्द्धशब्दोऽत्र नित्यनपुंसकः। ग्रामार्द्धं न
ति यथा समांशवाची तु नित्यनपुंसकः स एवेह गृह्यते। पूर्वापरेति। पूर्वसूत्रगणपाद्यर्द्धशब्दे पठनीये अर्द्धमिति योगविभागेन निर्देशाच्च पुंसकमेव लभ्यो।
सकग्रहणादित्याशयेनाह च शेनित्यं क्लीबे स इति। यो नित्यनपुंसकलिङ्गस्स इत्यर्थः। प्राग्वदिति। एकत्वविशिष्टेनावयविना समस्यत इत्यर्थः। अ
र्द्धस्थुरम्पमिति निर्देशादेव नपुंसकत्वे सिद्धे नपुंसकग्रहणं सूत्रेषु लिङ्गनिर्देशो न विवक्षित इति ज्ञापयितुं तेन नतस्येदमित्यादि लिङ्गत्रयेऽपि भवतीति॥
नीत्यत्रैकविभक्तिचापूर्वनिपात इत्युपसर्जनसंज्ञायां गोस्त्रियोरिति ह्रस्वः स्यादित्याशंकां समाधत्ते। अर्द्धं नपुंसकमिति। तेन पिप्पलीशब्दस्यानुपस
र्जनत्वमिति भावः। नन्वेवं पंचानां खट्वानां समाहारः पंचखट्वीति न सिध्येदुपसर्जनसंज्ञानिषेधेन स्त्रीत्वाकारे ह्रस्वाप्रवृत्तेरदंतत्वाभावेन द्विगोरिति ङीपोऽप्र
ाहा। एकदेशिसमासविषयकोऽयमिति पंचखट्वीति भाष्योदाहरणमेवत्र अपर्ध्वं तेन समांशको चेल्लिङ्गमिति भावः। । अर्द्धपिप्पलीति। परवल्लिं-
गं। अर्द्धपिप्पलीनामिति। समासे अर्द्धपिप्पलीत्येव स्यात्। विशेष्यत्वात् परवल्लिङ्गमिति लिङ्गातिदेशेऽपि वचनातिदेशाभावादेति भावः। अर्द्धपिप्पल्य इति प्रयोग-
ति पिप्पलीनामिति विग्रहे असाधुरेव। पि खंडसमुदाये साधुरेव अर्द्धपिप्पल्यः। अर्द्धपिप्पली। अर्द्धपिप्पलीच अर्द्धपिप्पलीचेत्यादि विग्रहान्तरकांडेशिनाकिं॥
देवदत्तस्य। अत्र देवदत्तः स्वामी न त्ववयवीति न तेन समासः। द्वंद्वतत्पुरुषयोरुत्तरपदवल्लिंगमित्यत्र भाष्ये प्रत्याख्यानेन यथा। अर्द्धपिप्पलीति द्विकर्मधारयेण सिद्धं। स
र्वाः शब्दाः अवयवे वर्तन्त इति न्यायात्। समप्रविभागादन्यत्र न तथ्ये एव गतिः। अर्द्धोहारः अर्द्धोक्तमर्द्धं विलोकितमित्यादिप्रयोगदर्शनात्। न च सम
प्रविभागसंख्यापि तु निर्देशसूत्रमिति वाच्यं चर्चासमासस्यापीष्टत्वात् नएवकानिरासः भाष्युक्त्या प्रेम्णा शरीरार्द्धहरो हरस्येति। द्वितीयतृतीयचतुर्थी समासापवादो

समयुक्तमिति ध्वनयन्नाह निषेधं बाधित्वेति। प्राप्तमिति करइति। गोस्त्रियोरित्युपसर्जनह्रस्वः द्विगुप्राप्तापन्नेति परवल्लिंगनिषेधः। ननु द्वंद्वबहुव्रीहि
वीकरणं। ह्रस्वत्वविधानात्। प्राप्तसु सन्न्याये नित्यत्वं तस्य जातिकालसुखादिभ्य इति परनिपातापन्ने प्राप्तापन्ने चेति चकारेण निषेधः सप्तमपादे
नानत्प्राप्तापन्ने समस्ते तेष्वेव चकारवचनयोः स्यादिति भाष्ये स्थितं। तत्र च कारणानुक्तमेवाकारं द्वित्वात्सौत्रनान्तरीकृतभावेनेति विवेचनः इत्यनेकेशः परिहरन्नाह इति
इति। मासमयीति। एकादेशस्य पूर्वान्तत्वेन ग्रहणात् लिंगविशिष्टपरिभाषया वा तयोरपि प्राप्तापन्नयोः समासः॥ ४॥ कालाः परिमाणिना। परिच्छेद्यते
येनेन तन्मपरिमाणं परिच्छेदकं तद्वान्परिमाणीति तदाह। परिच्छेद्यवाचिनेति। कालवाचकइति। कालविशेषवाचका इत्यर्थः। सत्त्वेव बहुवचननिर्देशात्कालसामान्य
रकत्वात्। मासोजातस्येति। षष्ठीसमासप्राप्ते वचनं। ननु जातः पुरुषस्तस्य तु हर्त्तुवितत्त्वादिकं परिच्छेदकं चतुर्वर्णजन्मसम्बन्धिमासमात्रपरिच्छेदकत्वादिति

कालाः परिमाणिना। २।२।५। परिच्छेद्यवाचिना सुबन्तेन सह कालवाचकाः समस्यन्ते। मासोजातस्य यस्य स मासजातः। द्व्यहजातः। द्वयोरह्नोः
समाहारो द्व्यहः। द्व्यहो जातस्य यस्येति विग्रहे। उत्तरपदेन परिमाणिना द्विगोः सिद्धये बहूनां तत्पुरुषस्यापि संख्यानम्। द्वे अहनी जातस्य यस्य स
द्व्यहजातः। अह्नोऽह्न इति वक्ष्यमाणो ह्नादेशः। पूर्ववत्तु न संख्यादेः समाहार इति तन्निषेधः॥ ५ इत्याहुः सामान्यविशेषपरिच्छेदत्वविकालेन त्वहारादेवदत्तं
न नियुक्तद्विजननादूर्ध्वं मासोगतः समासजातइति व्यवह्रियते। तत्र त्वयं हारेस्य जनननाशयोरंतरालभावी मासो जननद्वारा जातसंपिण्डितमिति। द्व्यहु
स्य षष्ठीनिर्दिष्टस्यापि वृत्तौ प्राधान्यं प्रतीयते तु परस्परसंस्तुके। अन्यो किंतु प्रक्रियायां कोनास्य प्रवेशः। एवं बहुव्रीहावपीति बोध्यं। ननु जातस्य मास इति विग्रहेऽस्तु
शब्दस्य पूर्वनिपातार्थमेतत्सूत्रारंभस्यावश्यकत्वेऽपि मासविशेष्यकबोधस्य वा चोद्यमिति किमनेन जातस्य मास इति कथनेनेति चेदत्राहुः मासजातो मृ
त् प्रयोगानुरोधेन विग्रहस्य स्थितिरिति। मासजातइति। यद्यपि मासो जातो यस्येति बहुव्रीहिणापीदं सिध्यति जातिकालसुखादिभ्यः परा निष्ठा वा
वचनात्। नच स्वरे विशेषः जातेरन्तोदात्तत्वस्यापि सिद्धत्वात् अपि षष्ठीसमासापवादार्थमिदमारंभणीयमेव। किंच मासो जातवतो यस्य स मासजातवानित्यत्र
समस्यारंभणीयमिति दिक्। उत्तरपदेनेति। परिमाण्युत्तरपदहेतुकद्विगुसिद्धये त्रिपदतत्पुरुषोपि वक्तव्य इत्यर्थः। सुसुपेत्येकत्वस्य विवक्षितत्वाद्वचनं

न्वितमिति ज्ञायते। अन्तादेश इति। त्रिपदतत्पुरुषे सत्युत्तरपदे परतस्तद्धितार्थे न्यभ्यांतर द्विगोः सतीति भावः। पूर्वत्रेति। ग्रहणात इत्यत्रेत्यर्थः॥ ॥ सप्त-
मी॰ः। बहुवचननिर्देशाद्गणपाठसामर्थ्याच्च आकृतिगणोऽयमित्यभिप्रेत्याह शौण्डादिभिरिति। अक्षशौण्ड इति। शौण्डः प्रवीणः इहाक्षशब्देन रूपक्रिया हस्ताव-
निनहार कं च सामर्थ्यं पयादर्थ्योः दना उदपानादौ उपसेचनमिश्रीकरणादि द्रव्यसामर्थ्यं। तेन कारकपर्यायं किं पदेन संबंध इति नियम स्तन ...
इति। आधेयप्रधान इति शेषः। अधिकरणप्रधानस्त्वव्ययीभावः स्यात्। अधिहरीति यथा। स इति नित्यमिति शेषः। विभाषा चेति विभाषाग्रहणसाम-

मी शौण्डैः। २।१।४०। सप्तम्यन्तं शौण्डादिभिः प्राग्वत्। अक्षेषु शौण्डः अक्षशौण्डः। अधिशब्दोऽत्र पठ्यते। अध्युत्तरपदादिति खः। ईश्वरा-
धीनः। सिद्धशुष्कपक्वबन्धैश्च। २।१।४१। एतैः सप्तम्यन्तं प्राग्वत्। सांकाश्यसिद्धः। आतपशुष्कः। स्थालीपक्वः। चक्रबन्धः। ध्वाङ्क्षेण क्षेपे। २।१।
४२। ध्वाङ्क्षवाचिना सह सप्तम्यन्तं समस्यते निन्दायां। तीर्थे ध्वाङ्क्ष इव तीर्थध्वाङ्क्षः॥ तीर्थकाकः। कृत्यैर्ऋणे। २।१।४३। सप्तम्यन्तं कृत्यप्रत्ययान्तैः
प्राग्वत् आवश्यके। मासे देयमृणं। ऋणग्रहणं नियोगोपलक्षणार्थम् पूर्वाह्णे गेयं साम। संज्ञायां। २।१।४४। सप्तम्यन्तं सुपा प्राग्वत् संज्ञायां।
क्येन संज्ञानवगमान्नित्यसमासोऽयं। अरण्येतिलकाः। वनेकसेरुकाः। हलदन्तात्सप्तम्याः संज्ञायामित्यलुक्। क्तेनाहोरात्रावयवाः। २।१।४५। अह्नो-
रात्रावयवाः सप्तम्यन्ताः क्तान्तेन सह प्राग्वत्। पूर्वाह्णकृतं। अपररात्रकृतं। अवयवग्रहणं किं। अह्नि दृष्टं। तत्र। २।१।४६। तत्रेत्येतत्सप्तम्यन्तं क्ता-
न्तेन सह प्राग्वत्। तत्रभुक्तं। क्षेपे। २।१।४७। सप्तम्यन्तं क्तान्तेन प्राग्वत् निन्दायां। अवतप्तेनकुलस्थितं त एतत्॥ अधीति वक्ष्यमाणत्वात्। अंतरव्ययं प-

चाधिकरणप्रधानः। मध्ये गङ्गाया इत्यर्थात्। तद्योगे अव्ययविनः आधारस्य विवक्षायां समीपयादृशेण देवेति। वनेत्यंतर्वणो नार्थे सति। पक्षेऽधिकरणमात्रवृत्तेरंत-
स्तु विभक्त्यर्थे इति नित्यमव्ययीभावः। अन्तरिन्तः शारीरितृणान्तं वने रति अन्तर्वणं। यत्तु तत्पुरुषस्यैव वैकल्पिकत्वात् सोऽव्ययीभाव इति ... नित्यं
विकल्पितेऽपि अव्ययीभावस्य नित्यत्वाह्न्ने अन्तरिति तु ... पदविग्रहस्यायोगात्। किं च विभक्त्यर्थमात्रवृत्तेरव्ययीभावः च चेन ग्रहणसामर्थ्यादन्य-
स्योपरीत्याद्यावति प्रसंगात् तत्र मध्यवाचिनः प्रसंगस्य वनालीनिति दिक्। शौण्ड। धूर्त। कितव। व्याड। प्रवीण। संवीत। अन्तर। अधि। पटु। पण्डित। कुशल। चपल।

यां तेनैव समास इष्यते। अन्यस्य शब्दस्य त्वित्यनुवृत्तेः। बहुवचनं तु प्रकृतिभेदाभिप्रायं। तथैवोदाहरति। मासेदेयमिति। ननु कथं कृत्येकतीन्यस्तु कृत्ये ह मासे देयानव्यं नियो
गणार्थमिति। नियोगेन निर्देशात्। अनुपकारिणार्थमिति न्यर्थः। नित्यसमासोऽयमिति। अत्र गम्यपूरणेऽपि कृतमयूरव्यंसकादिपक्षे संगतमन्यत्र वा नाम
तिनकुतस्त्येन स्थितेन कुतस्थितेन। कार्यकरणेऽनेनेति समासः। कुतस्त्यपरिभाषया नकुलस्थितशब्दोऽपि क्तान्त इति तेन सह समस्य तस्य समासः कुतस्त्ये
समस्याऽस्तु क्त। अव्ययस्थितं तत्प्रतिपन्त्यात्र निराबाध्यते॥ * ॥ पात्रेसमितादयश्च। संपूर्वादिगाः क्तः। गेहेनर्दीति। नर्दशब्दं स्मरन्नास्तु पजानातीति।
घटकतया प्रवेशो नेति। परमाः पात्रेसमिता इति वाक्यमेव भवति। ननु सन्महदित्यादिना समासान्तरमिति भावः। एतच्च शब्दकौस्तुभे स्थितं। अ

पात्रेसमितादयश्च। २।१।४८। एते निपात्यन्ते क्षेपे। पात्रेसमिताः। भोजनसमय एव संगताः न तु कार्ये। गेहेशूरः। गेहेनर्दी। आकृतिगणोऽयं। चकारोऽवधारणार्थः। तेनैषां समासान्तरे घटकतया प्रवेशो न। परमाः पात्रेसमिताः॥ पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन। २।१।४९। विशेषणं विशेष्येणेति सिद्धे पूर्वनिपातनियमार्थं सूत्रं। एकशब्दस्य दिक्संख्ये संज्ञायामिति नियमबाधनार्थं च। पूर्वं स्नातः पश्चादनुलिप्तः स्नातानुलिप्तः। एकनाथः। सर्वयाज्ञिकाः। जरन्नैयायिकाः। पुराणमीमांसकाः। नवपाठकाः। केवलवैयाकरणाः॥ ९ ॥

लाः पात्रेसमिता इति वाक्यमेव। ननु पूर्वकालैकेत्यादिना समासान्तरमित्याहुः। पूर्वकालेक। पूर्वकालत्वमर्थनिर्देशः। इतरेषां तु पञ्चानां स्वरूपग्रहणं।
समसंबंधिकत्वात्पूर्वकालोऽपरकालेन समस्यते। तथैवोदाहरति। स्नातानुलिप्त इति। अत्र क्रियाशब्दत्वात्पाचकपाठकवत्पर्यायः प्राप्तः। याज्ञिकाः
यज्ञमधीयते विदन्ति वा याज्ञिकाः क्रतूक्थादिसूत्रान्तात् ठक्। एवं नैयायिकाः। जीर्यतेरतृन्निति भूतेऽर्थे अतृन्। जरंश्चासौ नैयायिकश्च। जीर्णो नैयायिक इत्यर्थः। मी
मांसकाः नवकर्मादिभ्यो वुन्। नवपाठका इति। पठन्तीति पाठकाः। ण्वुल्तृचाविति ण्वुल्। संख्यावाची नवशब्दो न गृह्यते। दिक्संख्ये संज्ञायामिति नियमात्। समा
नाधिकरणेनेति किं। एकस्याः शौक्ल्यं षष्ठीसमासोऽपि इह न भवति। पूरणगुणेति निषेधात्॥ ॥

ह्यायां। नियमार्थमिति। तत्पुरुषे संज्ञायामेव दिक्संख्ये समस्येते इति नियमशरीरं तेन पंचगुणितादिशि न सिध्यति। कथं तर्हि त्रिलोकनाथः पितृसद्मगोचर इति कालिदा
सवाक्यस्य संगतिः। न च समाहारे द्विगुर्हि सो विलिति पक्षं संगतं न च पात्रादित्वं स्यात् यदि त्रिलोकी गणनापरस्यादित्वात् रूपं गणा मसंगत्यापतेः नत्वत्तरपदे इति समास
पुरुषस्य दुर्लभत्वात्। अत्राहुः। लोकशब्दोऽत्र लोकसमुदायपरः। अवयवे लोकत्रिलोकः। शाकपार्थिवादित्वादुत्तरपदलोपः इति पंचपात्र्यादयः इतिवत् त्रिलोकनाथ इति पि
विशेषेणान्वितया पिविभक्त्यंतरे पंचभिर्नाभिः प्रसिद्धा रीतिविशेषो बोध्यः। तद्धितार्थे। अस्य संज्ञार्थं वचनं। एकापि समुद्रमी विषयभेदाद्वित्रत्वाद्येना हन तद्धितार्थविषये द्वन्द्वा
तद्धितार्थे वाच्ये इति व्याख्याये तर्हि पौर्वशालस्यासेन द्वितीयेन स्यात्। तदर्थस्य समासेनैवोक्तत्वात्। द्विगोर्लुगनपत्ये इति ज्ञापकाद् द्वितीयेनि तद्धितार्थे तद्धितोऽभवतीति कल्पना।

ख्ये संज्ञायां २।१।५० समानाधिकरणेनेत्यापादपरिसमाप्तेरधिकारः। संज्ञायामेवेति नियमार्थं सूत्रं। पूर्वेषुकामशमी। सप्तर्षयः। नेह उत्तरा वृक्षाः। पञ्च ब्रा
तद्धितार्थोत्तरपदसमाहारे च २।१।५१ तद्धितार्थे विषये उत्तरपदे च परतः समाहारे च वाच्ये दिक्संख्ये प्राग्वत्। पूर्वस्यां शालायां भवः। पौर्वशालः। समासे कृ
ते पूर्वपदात्संज्ञायामग इति णः। सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः। आपरशालः। पूर्वा शाला प्रिया यस्येति त्रिपदे बहुव्रीहौ कृते प्रियाशब्दे उत्तरपदे पूर्वयो
रूपः। तेन शालाशब्दे आकार उदात्तः। पूर्वशालाप्रियः। दिक्समाहारो नास्त्यनभिधानात्। संख्यायास्तद्धितार्थे। पण्णां मातृणामपत्यं। षाण्मातुरः।
बोधनं यस्येति त्रिपदे बहुव्रीहौ। द्वावचानन्तरतत्पुरुषस्य विकल्पे प्राप्ते द्वन्द्वतत्पुरुषयोरुत्तरपदे नित्यसमासवचनं। ॥ पंचगवधन इति। पञ्चनिपत्ति गोरचमिति भावः। तद्धिते प
रे स्त्रीप्रत्ययमेवात तद्धिते परतः। समासः समासे कृते दिक्पूर्वपरादित्वात् तद्धिते तद्धितन्नेत्यन्त संगात् समाहारे साचोरिति तेन पंचगवमित्यादौ समासेनैव समा
हारस्य मुख्यार्थे प्रत्ययो नोत्पद्यते। अन्यथा त्वत्र गोरतद्धितलुकीति स्त्रीत्वसामर्थ्ये हि कप्रत्ययस्य द्विगोर्लुगनपत्ये इति लुक्प्रसङ्गेनेति भावः। सर्वनाम्न इति। एतच्च पु
रस्तान्त्यिधि पिस्त्रियाः पुंवदित्यनेनापि सिद्धत्वात् रूपसिद्धिस्तथापि तु उत्तरपूर्वेत्यादावर्थे सर्वनाम्न इति वचनमात्रस्य प्रतिपदे कन्यादिदृष्टिपितु पत्या सौत्याय इतिभा
त्रेरिति। तद्धितार्थे समासे च नोचेति केऽपरः। आकारस्य उदात्त इति। असमासेन वा तत्पुरुषे पूर्वपदप्रकृतिस्वरेण पूर्वशब्दस्याद्युदात्तत्वमेवस्यादिति भावः। षाण्मातु
र इति संख्यासंभद्रपूर्वायाः इत्युदात्तत्वाद्देशः। अनपत्ये इत्युक्ते द्विगोर्लुगिति लुक् नाविकल्पे प्राप्ते तु इति। महाविभाषयेति शेषः। तत्र अनत्तत्पुरुषे प्राप्त उकार्त्वं भावे पंच

नभावः। मनोरमायांतुविकल्पेप्राप्तेनित्यसमासार्थं द्वंद्वतत्पुरुषयोरित्येतद्वचनमितिप्राचांग्रंथमनुसृत्योक्तं वस्तुतस्तुतयोरप्राप्तौ समासेकृतेऽन्यपदार्थोप-
रस्थापरसंचयाद्याभानात् द्वंद्वतत्पुरुषयोरप्राप्तौसत्यांवचनमिदमित्याद्रिश्चितं। द्वंद्वस्योदाहरणंतुवाक्कूपवल्लप्रिये चक्रस्याग्रपदप्रियश्चक्रोपानहप्रि
त्रिपदेबहुव्रीहौकृतेपूर्वयोर्नित्यंद्वंद्वस्तेनद्वंद्वाच्चुदषहान्तादितिसमासान्तष्टजपिनित्यएव॥ ७॥ गोरतद्धितलुकि तत्पुरुषस्येत्यनुवर्ततेनेहच तदाहगोन्ता
न्तस्यहणाद्वेना प्रातिपदिकं ननदंतविधेरभावान्नतत्पुरुषस्यावयवीभूतो गोशब्दस्तस्माट्टजित्यर्थः स्यान्नथाचगोसूत्रमित्यादावतिप्रसंगः स्यादत आह।
इति। अयंभावः। समासान्ताद्वत्यपिकाराद्वासमासेनेनभवितव्यंगोरितिपंचमीश्रवणात्ततः परस्यापिनंचतत्रद्वंद्वविधिमतरेणोपपद्यतइतिस
हितेविधिलाभस्ततश्चतत्पुरुषस्येतिषष्ठ्यंतंपंचम्यंतेनविपरिणम्यतइति। नतुतद्धितलुकीति। तुमिथपद्यइत्यर्थोनतुतद्धितलुकिसतीतिसमासा
रेगतत्वात्। अतद्धितलुकीतिकिं। पंचभिर्गोभिः क्रीतः। पंचगुः। अत्रतद्धितस्यठकोऽध्यर्धपूर्वेतिलुक्। संख्यापूर्वोद्विगुः। अत्रोक्तइति। अयंभावः। पूर्वसू

तद्धितलुकि। ५।४।९२। गोन्तात्तत्पुरुषाट्टच्स्यात् समासान्तो नतुतद्धितलुकि। पञ्चगवधनः। पञ्चानांगवांसमाहारः। संख्यापूर्वोद्विगुः
२।१।५२। तद्धितार्थेत्यत्रोक्तः संख्यापूर्वोद्विगुस्स्यात्। द्विगुरेकवचनं २।४।१ द्विग्वर्थस्समाहारएकवत्स्यात्। सनपुंसकमितिनपुंसकत्वम्। पञ्चगवम्॥ ८॥

एवेयंसंज्ञा। अनेनतस्यैवेतिन्यायात्। एतदर्थमेवद्विसूत्र्येत्यर्थं कृतमन्यथाद्विसंख्येसंज्ञानद्धितार्थोत्तरपदसमाहारेष्वित्येवब्रूयात्तेन
त्र्यैगतककृत्कपालेत्यादिनापूर्वपदप्रकृतिस्वरोनभवतिकिंतुसमासांतोदात्तएवातथाचत्तस्यैषसद्धत्राणपप्लपसैयनिर्दिष्टः। ससद्ध कपीणां सुकृतां प्रत्रवो।
द्वित्रिविधः संख्यापूर्वइति। तद्धितार्थेविषयेउत्तरपदेच परतःसमाहारेचवाच्येसंख्यापूर्वोऽप्यसमासः सइत्यर्थः। तद्धितार्थेयथा। पंचकपालः संस्कृतं भक्षा इत्य
र्णेऽगनपर्ययइतिलुक्। उत्तरपदेयथा। पंचनावप्रियः। नावोद्विगोरितिसमासांतष्टच्। समाहारेपंचपूली। द्विगोरितिङीप्। द्विगुरेकवचनं। बाहुलकात्केनचित्
नपुंसकं। द्विगुस्समासस्यकार्यप्रतिपादकोभवतीत्यर्थः। नचवस्तुतोऽनेकार्थस्यैकार्थ्यंकथमित्रदुपपद्यतइतिसामर्थ्यादतिदेशः संपद्यतइत्याहएकवत्।
समाहारइतितूपसंख्यानात्लभ्यते। समाहारेयोद्विगुस्तदर्थएकवदित्यन्वयः। समाहारेकिं। तद्धितार्थेमाभूत्। पंचसुकपालेषु संस्कृताः पंचकपालाः पंचभिर्गो

तु प्रथमं द्विगवर्थस्यैकवद्भावे कृते योऽयमेकार्थे पञ्चकृते द्विगवर्थसमुदायस्तस्माद् द्विगवर्थत्वाद् द्विगुत्वं गतत्वाच्चैकवद्भावो न भवतीति स्थितमाकरे । यदा तु द्वितार्थे
तु समाहार इति कर्मसाधनस्तदा समाहृतप्रधानो द्विगुरिति बहुत्वे प्राप्ते अनेनैकवद्भावः क्रियते । यदा तु भावसाधन एव समाहारस्तदा समूहप्रधानत्वाद् द्वि
गुसंज्ञैकत्वात् सिद्धमेकत्वमिति नास्य प्रयोजनं । न च स नपुंसकमिति नपुंसकत्वार्थमेकत्वविधानमिति वाच्यं । स नपुंसकमित्यत्र पुंस्त्वाभावे नपुंसकमिति प्रतिषे
धाभावादित्याहुः । वस्तुतस्तु तद्धितार्थेति सूत्रे समाहार इति भावे घञ् न तु कर्मणि पञ्चगवमित्यत्र पञ्चगावः समाहृता इत्यभ्युपगमे समाह्रियमाणानां बहुत्वे
वचनानुपपत्तेः न च द्विगुरेकवचनमिति सूत्रारम्भ इति वाच्यं । पञ्चखट्वीत्यसिद्धेः । तत्र हि पञ्च खट्वाः समाहृताः पञ्चसु खट्वासु समाहृतासु त्वित्येवं विग्रह

कुत्सितानि कुत्सनैः । २ । १ । ५३ । कुत्स्यमानानि कुत्सनैः सह प्राग्वत् । वैयाकरणखसूचिः । मीमांसकदुर्दुरूढः । पापाणके कुत्सितैः । २ । १ । ५४ । पू ।
र्वस्याऽपवादः । पापनापितः । अणककुलालः । उपमानानि सामान्यवचनैः । २ । १ । ५५ । घन इव श्यामो घनश्यामः । इह पूर्वपदं तत्सदृशे
लाक्षणिकमिति सूचयितुं लौकिकविग्रहे इवशब्दः प्रयुज्यते । पूर्वनिपातनियमार्थं सूत्रं । उपमितं व्याघ्रादिभिः सामान्याप्रयोगे । २ । १ । ५६ । उप
मेयं व्याघ्रादिभिः सह प्राग्वत् साधारणधर्मस्याऽप्रयोगे सति । विशेष्यस्य पूर्वनिपातार्थं सूत्रं । पुरुषव्याघ्रः । नृसोमः । व्याघ्रादिराकृतिगणः ॥ ८
सामान्याऽप्रयोगे किं । पुरुषो व्याघ्र इव शूरः ॥ ९ संभवेन नियतविभक्तित्वाभावादेकविभक्ति चापूर्वनिपात इत्यप्रवृत्ते रनुपसर्जनत्वाज्ञो स्त्रियोरिति ह्र
स्वः । तत्स्थाने नोवेति स्त्रीत्वपक्षे द्विगौ विलयं तत्त्वगुणो ऽङीप्रत्ययस्य त । भावसाधनत्वे त्वेकविभक्तित्वादुपसर्जनत्वमभ्याहृतमेव समाहारापेक्षया नियमेन वर्ति
ष्यमाणत्वात्तथा च पञ्चखट्वीत्यादिरूपे निर्बाधमेवेति दिक् । स नपुंसकमिति । एतत्सूत्रार्थो मूल एव स्फुटीभविष्यति ॥ ॥ कुत्सितानि । कुत्स्यमानशेषपदा
नि । सचमतिबुद्धीति सूत्रे चकारस्यानुक्तसमुच्चयार्थत्वाद्वर्तमाने विहितः क्तः बाहुलकाद्वा कुत्स्यमानानीति । तत्र निपातकानीत्यर्थः । उभयत्र बहुवच
नं स्वरूपविधिनिरासार्थं । वैयाकरणखसूचिरिति । सूचयतेस्तरन्नादिः । यः पृष्टः सन् प्रश्नं विस्मारयति खं सूचयन्नन्यत्र सर्वेष्वथैतत्समुच्चयेन तु वैयाक
रणोऽनध्ययनेनाकुत्सितः । वैराग्येन तस्य प्रशस्तत्वात्तथापि । प्रतिभाभावेन निष्प्रत्तत्वात् कुत्स्यते । दुर्दुरूढ इति । दुर्लगुन्त्योपदुर्पर्वः । श्रीणादिकः । कु

हुलमन्यत्रापीतिरोर्लुक्। रलयोरेकत्वस्मरणात्स्वसरः। विशेष्यस्य पूर्वनिपातनियमार्थं सूत्रं यद्यप्यत्र द्वितीनिमित्तकुत्सायामेवायं संनिधानान्नेनेद्न
दिदु पचारः नामाके। एतेन कुत्सनानि पापिनी कुपूयकुत्सितावद्यखेटगर्ह्याणकाः समाख्यानरः। तेन ख्यातयोः पूर्वसूत्रेणैव समासे परनिपातः स्यान्न सा
तनियमार्थं। विशेषणं विशेष्येणेति सूत्रापवादश्च। उपमानानि। उपमीयतेऽनेनेत्युपमानं। उपपूर्वान्माङः करणे ल्युट्। मादिसमासः। उपपूर्वको
हृश्यहेतुकेपरिच्छेदे रूढः। येनवस्त्वंतरं सादृश्येनपरिच्छिद्यते तदुपमानमित्यर्थः॥ यथा गौरिवगवयः। इह हि गौः। करणं सादृश्यं हेतुः पुरुषः परिच्छेत्ता। स
दृश्येनगवयं परिच्छिनत्ति सामान्यवचनैरिति। समानो धर्मः सामान्यं चातुर्वर्ण्यादित्वात्स्वार्थे ष्यञ्। उपमानोपमेयसाधारणो यो धर्मस्तद्वृत्तिभिर्वचनैरि
न तु साधारणधर्ममात्रवचनैरिति। एतच्च वचनग्रहणाल्लभ्यते। सामान्यमुक्तवंतः सामान्यवचनाः। बाहुलकात्कर्तरि ल्युट्। ये पूर्वं सामान्य
प्रवृत्तिद्वयेपर्यवसंनिते तथोक्ताः। तच्च सामान्यविशिष्टं उपमानशब्दस्य संबंधिशब्दत्वादाक्षिप्तमुपमेयमेवविज्ञायते। लाक्षणिकमिति अतएव सा
करणात्मृगीवचपला मृगचपलेत्यादौ पुंवद्भावः। उत्तरपदलोपस्तिवत्र श्यामत्वचपलत्वादिद्वारकमेव हि सादृश्यं गम्यते संनिधानात्। कथं तर्हि उपमानप
त्। भूतपूर्वगत्याव्याकार्थमादायतत्परत्वेन यद्वा पूर्वनिपातनेति। अन्यथा नियमः स्यात् खंजकुब्जवदिति भावः। किंच तत्पुरुषे तुल्यार्थं तेनोपासस्य मुपमा
तेसूत्रे प्रतिपरोक्स्यासेवोपमानग्रहणेन प्रहणार्थमपीदं सूत्रं अतएवमयूरव्यंसकादित्वात्समासेउपमानस्वरेणप्रवर्तितत इति सिद्धांतः। उपमितं। उपमेय
। भूतकालोत्रनविवक्षितः तत्र संबंधिशब्दत्वादुपमानमाक्षिपति। तथाचोपमानभूतैर्व्याघ्रादिभिरित्यर्थः। पुरुषोऽयं व्याघ्र इव शूर इति। तत्र हि शूरसापेक्ष
रुषस्यप्रधानत्वाद्राजपुरुषः सुंदर इतिवदत्रापिसमासः स्यात्समाभूदिति सामान्याप्रयोग इत्युक्तमिति भावः। कथं तर्हि भाष्याब्धिः कात्तिगंभीर इति कैः।
मान्यप्रयोगस्त्वनेनासामाप्तेः अत्रकेचित् प्रमादस्त्ववायमित्याहुः। इह गाम्भीर्येणसादृश्यं नविवक्षितं किंतु विततदुरवगाहत्वादिना। तस्य हि विततत्वादेर
प्रयोगोऽस्त्येवेति निर्वाधः समास इति मनोरमायां स्थितं॥ ॥

णां॥ विशिष्यते येन तद्विशेषणं कर्तुः करणत्वविवक्षायां ल्युट्। तदाह भेदकमिति। व्यावर्तकमित्यर्थः। विशेषणविशेष्ययोरस्य संबन्धिकतया अन्यतरोपादा
नेतरापेक्षसंभवे उभयोपादानं स्वरूपार्थमिति कैयटः। अत एव कुत्सितानि कुत्सनैरित्यत्रापि तुल्यं। तदुक्तं हरदत्तेन तस्मात् समस्यमानपदद्वयजन्यबोधप्रकारयोर्विशेषणविशेष्यभा
परस्परव्यभिचारस्तत्रैव समासोऽयं स्यात्। नान्यत्रेत्येतदर्थमुभयोपादानं। तथा च नीलोत्पलादौ समासो भवति न तु तक्षकः सर्प इत्यादौ। न हि तक्षकत्वं सर्पत्वं व्यभि
चरति नत्यं रक्तैकाद्यादिमैरदादिभावपदार्थस्तर्कविधायाकरणशास्त्रभोजदादेरत्यादिषु योगाणामसंगत्यापत्तेः। ननु विशेषणविशेष्यभावे कामचारान्नाचकपा
चकनीलोत्पलादावप्यव्यवस्थितः पूर्वनिपातः स्यादिति चेदत्राहुः। जातिशब्दस्य गुणक्रियाशब्दसमभिव्याहारे विशेष्यसमर्पकत्वेन। नेन नीलोत्पलं पाचकब्र
शेषणं विशेष्येण बहुलं। २।१।५७। भेदकं समानाधिकरणेन भेद्येन बहुलं प्राग्वत्। नीलमुत्पलं। नीलोत्पलं। बहुलग्रहणात् क्वचिन्नित्यं। कृष्ण
सर्पः। क्वचिन्न। रामो जामदग्न्यः। पूर्वापरप्रथमचरमजघन्यसमानमध्यममध्यमवीराश्च। २।१।५८। पूर्वनिपातनियमार्थमिदं। पूर्ववैयाकर
णः। अपराऽध्यापकः। अपरस्याऽर्द्धे पश्चभावो वक्तव्यः। अपरस्य सावर्द्धस्य। पश्चार्द्धः। कथमेकवीर इति। पूर्वकालैकेति वा पित्वापरत्वादनेन स
मासे वीरैक इति हि स्यात्। बहुलग्रहणाद्भविष्यति। श्रेण्यादयः कृतादिभिः। २।१।५९। श्रेण्यादिषु च्व्यर्थवचनं कर्तव्यं। अश्रेणयः श्रेणयः कृताः।
श्रेणिकृताः। क्तेन नञ्विशिष्टेनानञ्। २।१।६०। नञ्विशिष्टेन क्तान्तेनानञ् क्तान्तं समस्यते। कृतं च तदकृतं च कृताकृतं। शाकपार्थिवा
दीनां सिद्धये उत्तरपदलोपस्योपसंख्यानं। शाकप्रियः पार्थिवः। शाकपार्थिवः। देवब्राह्मणः॥ ९९ एवमिति व्यवस्थित एव प्रयोगः। गुणशब्दयोः क्रियाश
गुणक्रियाशब्दयोश्चानियम एव खंजकुब्जः कुब्जखंजः पाचकपाठकः। पाठकपाचकः खंजपाचकः पाचकखंज इति। अत्र मल्लमुपसर्जनमिति महासं
प्रधानं चोपसर्जनं। गुणक्रिययोश्च द्रव्यं प्रत्यप्रधान्यस्य पृष्ठमेवेति। अपरस्यार्द्ध इति। एतच्च पश्चादिति सूत्रे भाष्ये स्थितं वाद्रुचकादिति। एकेषुमुख्येषु वीरप
मतेरित्वाबोध्यं॥ श्रेण्या। व्याचष्टे आदिशब्देन व्यवस्थावाची द्वितीयस्तु प्रकारवाची। श्रेण्यादयः पठ्यन्ते कृतादिराकृतिगण इति भाष्यात्। एक। पूग। कुंद। राशि।
निचय। निधनादिः। श्रेण्यादिः। कृत मित भूतादिः। कृतादिः। यद्यपि सिद्धपचरिणायः सम्यक्कृता वासमासो नेष्यत इत्याशयेनाह अश्रेणयः श्रेणय इति॥

ऽन्तानां तु कुगतीति नित्यसमासः परत्वात् षष्ठीकृतं रहतु चौ चनिरीर्थः केनचिद्विशिष्टशब्देनावधारणार्थः न तन्मात्रापि केनचनत्वरहितं समस्तमिति । स्वत्रा॰
ना । सिद्धं चाभुक्तं च । तुडिडधिष्ठिनापीति वाच्यं । अशितेन चानशितं च अशितानशितं । किं शाकिंचिता । किं शब्दो निषयोरिति वेद । कृताकृतमिति स्वकरे॰
॰ाकृतम् । एकदेशान्तरस्याकरणात् तदेवाकृतम् । शाकपार्थिव इति । पृथिव्या ईश्वरः पार्थिवः स च सः ईश्वरश्च न्यायशास्त्रक प्रिय इति बहुव्रीहिः सः पार्थिवश्चेति स॰

हत्परमोत्तमोत्कृष्टाः पूज्यमानैः ।२।१।६१। सद्वैद्यः । वक्ष्यमाणेन महतस्त्वाकारः । महावैयाकरणः । पूज्यमानैः किं । उत्कृष्टो गौः । पङ्कादुद्धृ॰
॰र्थः । वृन्दारकनागकुञ्जरैः पूज्यमानम् ।२।१।६२। गोवृन्दारकः । व्याघ्रादेराकृतिगणत्वादेव सिद्धे सामान्यप्रयोगार्थमिदं वचनं । कतरकतमौ॰
जातिपरिप्रश्ने ।२।१।६३। कतरकठः । कतमकालापः । गोत्रञ्च चरणैः सहेति जातित्वं । किं क्षेपे ।२।१।६४। कुत्सितो राजा किंराजा । यो न रक्षति । पोटायुवतिस्तो॰
॰तिपयगृष्टिधेनुवशावेहद्बष्कयणीप्रवक्तृश्रोत्रियाध्यापकधूर्तैर्जातिः ।२।१।६५। तत्पुरुषः समानाधिकरणः कर्मधारयः ।१।२।४२। पुं॰
॰र्मधारयजातीयदेशीयेषु ।६।३।४२। कर्मधारये जातीयदेशीययोश्च परतो भाषितपुंस्कात्परं ऊङभावो यस्मिन्नस्य पूर्वं पुंवत् । पूर्वस्मि॰
॰न्निषु प्राप्तः पुंवद्भावो विधीयते । महानवमी । कृष्णचतुर्दशी । महाप्रिया । नयाकोपधादेः प्रतिषिद्धः पुंवद्भावः कर्मधारये प्रतिप्रसूयते ।
॰कस्त्री । दत्तभार्या । पञ्चमभार्या । सौघ्नभार्या । सुकेशभार्या ॥ ब्राह्मणभार्या । एवं पाचकजातीया पाचकदेशीयेत्यादि । इभपोटा ।
॰स्त्रीपुंसलक्षणा । इभयुवतिः । अग्निस्तोकः । उदश्वित्कतिपयं । गृष्टिः । सकृत्प्रसूता । गोगृष्टिः । धेनुर्नवप्रसूतिका । गोधेनुः । वशा वं॰
गोवशा । वेहद्गर्भघातिनी । गोवेहत् । बष्कयणी तरुणवत्सा ॥ गोबष्कयणी । कठप्रवक्ता । कठश्रोत्रियः । कठाध्यापकः । कठधूर्तः ॥

पूर्वसमासे उत्तरपदं प्रिय इति तस्य लोपः । तथा देवब्राह्मण इत्यत्र देवस्य पूजको देवपूजक इति पूर्वस्मिन् षष्ठीसमासे उत्तरपदं पूजक इति तस्य
॰ः ॥ ॥ सन्महत् । गुणक्रियाशब्दैः सह समासे सदादीनां पूर्वनिपातनियमार्थं सूत्रं । कतरकतमौ । जातिपरिप्रश्ने किं । कतरो देवदत्तः । बहूनां जाति॰
॰प्रश्ने डतमजिति सूत्रोदितं कतमशब्दसाहचर्यात् डतरशब्दस्य कतरशब्दस्यापि ग्रहणे सिद्धे जातिपरिप्रश्नग्रहणं ज्ञापयति कतमशब्दोऽर्थान्तरेऽपि साधुरिति । तथ॰

कतरो भवतोर्देवदत्तः। कतमो भवतां देवदत्त इति किं शेषे। किं राजेति। किमः शेषपदमिति समासांतनिषेधः। शेषे किं। को राजा पाटलिपुत्रे एवं किंसखा योद्धृ
किं गौः योन वहति। न्यपुरादहरणं बोध्यं। ननु रूपः समानाधिकरणशब्दस्य शेष्यायत्तेनेतः। समानाधिकरणपदक इत्यर्थः। भाषितपुंस्कादित्यादिरत्र च स्त्रियाः
ति सूत्रे सुधीकरिष्यते। ननु तेनैव कर्मधारयेपि सिद्धं जातीयदेशीययोस्तु नः सिद्धादिप्विति सिद्धं तत्किमनेन सूत्रेणेत्यत आह। पूरणीप्रियादिषु
निच। महानवमीति। नद्यानां पूरणीतस्य पूरणी षड्। नांतादसंख्यादेर्मट्। टित्वान्ङीप्। महती चासौ नवमी चेति विग्रहः। पुंवद्भावे कृते तस्य मा
त आकारः। कोपधादिति। न कोपधायाः। संज्ञापूरण्योश्च। वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे संज्ञायां गाम्येनः। जातेश्चेति पंचसूत्र्या प्रतिषिद्ध इत्यर्थः।
शीय इति पाचकस्त्रीति। जातीयदेशीययोरपि प्रतिप्रसवमुदाहरति एवमिति। पाचिका प्रकारवती पाचकजातीया प्रकारवचने जातीयर्। पाचकदेशीये ति

प्रशंसावचनैश्च। २।१। ६६॥ एतैस्सह जातिः प्राग्वत्। गोमतल्लिका। गोमचर्चिका। गोप्रका
ण्डं गवोद्घः। गोतल्लजः। प्रशस्ता गौरित्यर्थः मतल्लिकादयो नियतलिङ्गाः न तु विशेष्यनि
घ्नाः। जातिः किं। कुमारी मतल्लिका॥ ९॥

भाषावितिदेशीयर्। उभयत्र तसिलादिष्विति पुंवद्भावस्य न कोपधाया इति निषेधः प्राप्तः पटुजातीया पटुदेशीयेत्यादौ तस्य चरितार्थत्वात्। इत्यादीति। आदि
जातीया पंचमजातीया षष्ठीपुजातीया। शुकेयजातीया। ब्राह्मणजातीया। एवं देशीयेत्याद्युदाहार्यं। स्त्रीपुंसलक्षणयोरिति। स्तनकेशवत्त्वादिषु ताः स्त्रीत्यर्थः। उद
तकंसुरश्चि न्यथितं पादांबुधौ तु निर्जलमित्यमरः। कठपूर्तेरिति। नात्र कठत्वं कुत्स्यते। स्यतः कुत्सितानि कुत्सनैरिति गतार्थत्वात्तत्र शंक्याप्रवृत्तिनिमित्त कुत्सा
प्रभृतयः। जननप्रतिकुसुरदर्शानि पूर्णेव कोवा स्त्रमनस्त्वानामित्यत्र पूर्वैव कदमसापुरैव॥ ॥ प्रशंसावचनैश्च। वचनग्रहणं रूढिशब्दपरिग्रहार्थं। तेन यौगि
कीभवन्तरमणीपादस्यः येच विशेषवचनाः शुचिमृदुस्यः पितृगौ ल्पादौस्त्वा प्रशंसां गमयंति। सिंहो माणवक इत्यादय स्तैः सह समस्यते। गवोद्भृदाति। अव
पतसैन्य चड्डि व्याद्गुणः। मतल्लिका मचर्चिका प्रकाण्डमुद्धतल्लजौ प्रशस्तवाचकान्यमूनीत्यमरः। प्रशंसावचनपोटायुवतीत्येकयोगसंभवे पृथग्योगक

तीति। कृदिकारादक्तिन इति ङीष्। पुंवत्कर्मधारयेति पुंवत्। युवतिशब्दस्य पुंवद्भावः। जरतीति। जीर्यतेरतृन्। उगितश्चेति ङीप्। एवं युवपलितः युववलिनः युव
लिनरत्नः पमादिशान्तनुतो व्याप्तानुल्यमहान्तःस्थमहानित्यारोपात्परत्वादनेन समाहृतिर्विबाधते। नत्वसत्कृत्यशानिन इति प्रयोगे तु समानाधिकरण्यमात्र
पुंस्त्री समासो बोध्यः। एवं परमपूजन्त्यादिष्वपि। वर्णो। समानाधिकरणेन वर्णो वा चिना वर्णो वा विसमस्तन इत्यर्थः। विशेषणं विशेष्येणेत्यनेनैव सिद्धे एव।
तत्लौन वर्णेष्वनेन इति पूर्वपरप्रकृतिस्वरे विधीयमाने प्रतिपदोक्तत्वादनेन समासः पूर्वपदस्यैव भवतु नान्यस्य न इत्यर्थः। कृष्णसारंगः इति। सारंगश्चित्रपर्यायस्तस्य

युवलतिपलितवलिनजरतीभिः। २।१।६७। पूर्वनिपातनियमार्थं सूत्रं लिङ्गविशिष्टपरिभाषया युवतिशब्दोऽपि समस्यते। युवा खलतिः
खलतिः युवतिः खलती। युवखलती। युवजरती। युवत्यामेव जरतीधर्मोपलम्भेन तद्रूपारोपात् सामानाधिकरण्यम्। कृत्यतुल्याख्या अजात्या। २।१।६८
भोज्यं। तुल्यश्वेतः। सदृशश्वेतः। अजात्या किम्। भोज्य ओदनः। प्रतिषेधसामर्थ्याद् विशेषणसमासोऽपि न। वर्णो वर्णेन। २।१।६९। समानाधिक
रणेन सह समस्यते। कृष्णसारङ्गः। कडाराः कर्मधारये २।२।३८। कडारादयः शब्दाः कर्मधारये वा पूर्वं प्रयोज्याः। कडारजैमिनिः। जैमिनिक
कुमारः श्रमणादिभिः। २।१।७०। कुमारी श्रमणा। कुमारश्रमणा। इह गणे श्रमणा प्रव्रजिता गर्भिणीत्यादयः स्त्रीलिङ्गाः पठ्यन्ते। लिङ्गविशि
ष्टपरिभाषा पाठसामर्थ्यादेवबाधकत्वं बोध्यं। चतुष्पादो गर्भिण्या। २।१।७१। चतुष्पाज्जातिवाचिनो गर्भिणीशब्देन सह समस्यन्ते। गोगर्भिणी॥ कौ॥ चतुष्पा
ज्जातिरिति वक्तव्यम्। नेह। स्वस्तिमती गर्भिणी॥ ॥ ११ लोपसर्जनद्रव्यपरः कृष्णशब्दोऽपि कृष्णावयवके मानः। एवं च गौरोऽसमानाधिकरण्ये विशेष
णेऽप्यन्यप्रसक्तौ समासार्थमपीदमारब्धव्यमित्याहुः। ननु तृतीयानकृतेत्यनेनैवायं समासः सिध्यति। सारंगस्य कृष्णादिरूपत्वात्। नापि स्वरभेदः। तत्पुरु
षे तुल्यार्थतृतीयेत्यनेनैव पूर्वपदप्रकृतिस्वरसिद्धेरिति चेदत्राहुः। कृष्णश्चासौ शुक्लो हरितः शुक्लः इत्याद्यर्थं समासोऽनेनावश्यं विधेयः। नहि इह तत्करणमस्ति। यद्यपीह
विशेषणं विशेष्येणेत्यनेन समासः सिध्यति तथापि स्वरो न सिध्यति न च प्रतिपदोक्तसमासोऽस्ति किंचित्करः व्यावर्त्याभावादिति वाच्यं कृष्णशुक्लादिष्वेव
द्दिति। कडारादय इति। बहुवचननिर्देशादिति भावः। आदिशब्देन गडुलखण्डिलः शाण्डिल्यगडुलः इत्यादि। एतच्च भाष्ये स्पष्टं॥

ति।एवकारः स्फुटस्तिइत्ययोननार्थेनान्वयधारणार्थः।सुनासत्ततीति सूत्रेनरतीयहणस्यापिज्ञापकत्वसंभवात्।नहिष्टुवन्शब्दस्यपुंस्त्वेजरतीसामानाधिक
रण्यते।चतुष्पादौ।भंडकमुत्पाद्यत्वनातिरिक्त्यनुवर्तनरत्नाहत्वातिवानीति।नातिर्विष्ठि।कान्नाशीनर्भिणी।चतुष्पान्निर्दिष्टाब्राह्मणीगार्भिणी।प्रत्युदाहरणेनिरोप
समासः स्यादेवगर्भिकोनाशीनापृतिपूर्वनिपातेनिशेषः॥७॥ मयूर चकारोत्रावधारणार्थस्तेनपरमम्यूरव्यंसकोमयूरव्यंसकइत्यादिसमासेनरत्नम
र्दितिएवंचगुणवचनत्वात्पूर्वनिपातेप्राप्तेइदंवचनमारब्धमितिभावः अन्येतु मयूरइवव्यंसकोमयूरव्यंसकइत्याद्युपमानानिसामान्यवचनै।

रव्यंसकादयश्च।२।१।७२।एतेनिपात्यन्ते।मयूरोव्यंसकः।मयूरव्यंसकः।व्यंसकोधूर्तः।उच्चकाश्चावचकाश्च।उच्चावचं।निश्चितंचप्रचितंच।
निश्चप्रचं।नास्तिकिंचनयस्यसः।अकिंचनः।नास्तिकुतोभययस्यसः।अकुतोभयः।अन्योराजाराजान्तरं।चिदेवचिन्मात्रं।आख्यातमाख्यातेनक्रियासा
तत्ये।अश्नीतपिबतेत्येवंसततंयत्राभिधीयतेसा।अश्नीतपिबता।पचतभृज्जता।खादतमोदता।एहीडादयोऽन्यपदार्थे।एहीडइतियस्मि
न्कर्मणिसनदेहीडं।एहियवं।उद्धरकोष्ठादुत्सृजदेहीतियस्यांक्रियायांसाउद्धरोत्सृजा।उद्धमविधमा।अपसोतम्पायमिहपावः।जहिकर्म
णाबहुलमाभीक्ष्ण्येकर्तारञ्चाभिदधाति।जहीत्येतत्कर्मणाबहुलंसमस्यतेआभीक्ष्ण्येगम्येसमासेनचेत्कर्ताऽभिधीयतइत्यर्थः।जहिजो
ज्जहिस्तम्बः।ईषदकृता।२।२।७।ईषदकृन्नेतिः।ईषद्गुणवचनेनेतिवाच्यं।ईषद्रक्तं॥ नैरितिसमासस्यापवादोऽयं।तेनसमासस्यैवान्तोदात्तत्वमिहसिध्य

त्येतुल्यार्थइत्युपमानपूर्वपदप्रकृतिस्वरस्योपमानसंशब्देनविहितेप्रतिपदोक्तसमासेचरितार्थत्वादित्याहुः।अश्नीतपिबतेनेति।इहक्रियारू
पदार्थस्यप्राधान्यात्।स्त्रीत्वाद्यापत्।एवममेपिराजान्तरमिति।अन्तरशब्दोत्रभिन्नवाची।चिन्मात्रमिति।मात्रंकार्त्स्न्येवधारणइत्यमरः।अन्तरमात्रशब्दाभ्यांस
मासस्तुभयत्रअस्वपदविग्रहोरश्चिनः।नित्यसमासत्वात्।अत्रचधारणार्थकत्वकारेणात्तथमित्याहुः।उद्धरकोष्ठादित्यादि।उद्धरउत्सृजेत्येताभ्यांनेचविग्रहः।
अस्यविवरणंदेहीतिकोष्ठादितिचद्वयोरप्यस्यकोसापूरणार्थमुक्तं।समासेनचेत्कर्तेति।जहिजोडमिति।आभीक्ष्ण्येनयआहसः जहिजोडः।एवंजहिस्तम्बमि

ञ्। इह नलोपो नञ इत्यत्र विशेषणार्थो ञकारस्तत्फलं च नैकधेत्यत्रालोपः। अव्ययेन नञ्कुनिपातानामित्यव्ययपूर्वपदप्रकृतिस्वरार्थं ञकारोच्चारणमिति
मस्यत इति। उत्तरपदार्थप्रधानोऽयं समासः। तथा हि। आरोपितत्वं नञा द्योत्यते। तथा च अब्राह्मणशब्दादारोपितो ब्राह्मण इति बोधे अर्थात् ब्राह्मणभिन्न
वसति। अत एवानुपसर्जनत्वादतस्मिन्। असर्वस्मा इत्यादौ सर्वनामकार्यं सिध्यति। ननु रूपस्यैत्वर्गिकमुत्तरपदार्थप्राधान्यमप्येवं सति निर्बाधम्। एतन्नञोऽवि
ञ्समासग्रहणं नेह लिङ्गमित्यादि मनोरमायामनुसंधेयम्। नलोपो नञः। नञो विशिष्टि चरणस्येन लोपवचनं त्वाकचकार्थं तेन न त्वोऽकचि अकथा अब्राह्मणः अ
त्यादि सिद्धमित्याहुः। उत्तरपदे इति। अलुगुत्तरपद इत्यधिकारादिति भावः। उत्तरपदे किम्। पटी नास्ति पटी नास्ति। नन्वेवमपि स्त्रैणार्थ इत्यत्र नलोपः स्या
दित्याहुः। उत्तरपदाधिकारपूर्वपदेनानञ्विशेष्यपूर्वपदभूतस्य नञ इति तस्या स्यानात्र भवति स्त्रीपुंसाभ्यामिति विहितस्य नञ्प्रत्ययस्यापूर्वपदत्वात्। अ

नञ्। २।२।६। नञ् सुपा समस्यते। नलोपो नञः। ६।३।७३। नञो नस्य लोपः स्यादुत्तरपदे। न ब्राह्मणः अब्राह्मणः। तस्मान्नुडचि। ६।३।७४।
लुप्तनकारान्नञ उत्तरपदस्याजादेर्नुडागमः स्यात्। अनश्वः। अर्थाभावेऽव्ययीभावेन सह विकल्प्यते। रक्षोहागमलघ्वसन्देहाः प्रयोजनम्
ति। अहुनाथामसंहितमिति च भाष्यवार्त्तिकप्रयोगात्। तेनानुपलब्धिरविचारोऽविघ्नमित्यादि सिद्धम्। नञो नलोपस्तिङि क्षेपे। अपचसि त्वं जाल्म

नैकधेत्यादौ तु नशब्देन सह सुप्सुपेति समासः

त्रप्रत्ययाप्रत्यययोः प्रत्ययस्यैव ग्रहणमिति परिभाषा नोपतिष्ठते नच प्रत्ययग्रहणे तदन्तग्रहणान्न नञ्प्रत्य
यान्तस्य पूर्वपदत्वं संभवत्येवेति प्रत्ययाप्रत्यययोरित्यतदुपतिष्ठत एवेति वाच्यम्। हृदयस्य हृल्लेखेति सूत्रे यण्ग्रहणान्न्यथकूलेयग्रहणेनोत्तरपदाधिका
ग्रहणे तदन्तग्रहणं नास्तीति ज्ञापनात्। यद्वा। अमुद्दृंमतलकात विभक्तावप्रथमायाद्यत्यादि ज्ञापकान्नलोपो नञ इत्यत्राप्ययमेव नञ् गृह्यते ननु प्रत्यय इति
नुडचि। इक्ष्भिडित्यत्रैवाचीति सप्तम्याः षष्ठीप्रकल्प्य तदन्त इत्याजादेरिति। अचात्तरपदविशेषणान्तं यस्मिन्विधिरिति तदादिविधिर्यत्तस्मादुत्तरादिति भाव
इति। नुटः परादित्वेन अपद्यत्वान्नुटाद्याङ्ङमादित्वादिङ मुण्न भवति। ननु विघ्नानामभावः अविघ्नमित्यत्रापि परत्वात्तत्पुरुषः स्यादव्ययीभावस्तु निर्मक्षिक
कारान्तादन्यथा अनुपलब्धिरविचार इति न सिध्येदित्याशङ्क्याह अर्थाभावेऽव्ययीभावेन सहेत्यादि। अविघ्नमिति। यद्यप्यविद्यमानाविघ्नाय स्मिन्निति बहु

न्तरे कर्मण्य विप्रमस्त्वित्यादि प्रयोगाद्ग्रव्ययीभावं विनास्वरसतो न सिध्यतीति भावः। नञोनत्नोपइति। निर्दिष्टेनेन समासाभावादप्राप्तेर्वचनं। अपचसीति। कुत्सि
तार्थे। नशब्देनेति। न नासमासेन नेकधेत्यपि च स्यादिति भावः॥ ०॥ नभ्राट्। सत्सु साधवः सत्याः। तत्र साधुरिति यत्। न सत्याः। असत्याः। न असत्याः नासत्याः इह तु
वेदसिद्धत्वेन नासत्यावश्विनोरित्यादि सिद्धं। न मुचिरिति। सर्वधातुभ्य इन्। इगुपधात्कि दिति कित्वाद्गुणः। स्मरते। श्रीपदेर्वेति। सवर्णसंघातं नेभ्यो दीर्घ इ
गाम्यो तुदादिः। कुगति। कुशब्दोत्राव्ययं गृह्यते न तु पृथिवीवाचकः। गम्यादिसाहचर्यान्न। ऊर्यादि विद्धाचश्च। उपसर्गाः क्रियायोगे इत्यतो नुवर्तनादाह क्रियायो
ते। च्विडाचौ तृभ्वस्तियोगे विहितौ तत्साहचर्यादूर्यादीनामपि तत्रैव गतिसंज्ञा तेनेह न ऊरीपत्नकामाभवादिप्रयेषु यानि। यादुः शब्दो मुक्ता अन्यथा करोतिनियोगे ग

भागनपाच्चवेदनासत्यानमुचिनकुलनखनपुंसकनक्षत्रनक्रनाकेषु प्रकृत्या। ६।३।७५। पादि निशब्दः नञः। वेदादिषु नञ्। नसत्याः असत्याः न
सत्याः। नासत्याः। न मुञ्चतीति नमुचिः। न कुलमस्य। न खमस्य। न स्त्री पुमान्। स्त्रीपुंसयोः पुंसकभावो निपातनात्। न क्षरतीति नक्षत्रं। म्रक्षीप
धारतेर्वा क्षरतेर्वा त्रमिति निपात्यते। न क्रामतीति नक्रः। क्रमेर्डः। न अकम् अस्मिन्निति नाकः। नगोप्राणिष्वन्यतरस्यां ६।३।७७ नगइत्यत्र नञ् प्रकृत्या वा। नगाः।
अगाः। पर्वताः। अप्राणिष्विति किं। अगो वृषलः शीतेन। नित्यं क्रीडाजीविकयोरिति। नित्यमित्यनुवर्तमाने। कुगतिप्रादयः २।२।१८। एते समर्थेन नित्यं समस्य
न्ते कुत्सितः पुरुषः। कुपुरुषः। गतिश्चेत्यनुवर्तमाने। ऊर्यादिच्विडाचश्च १।४।६१। एते क्रियायोगे गतिसंज्ञाः स्युः। ऊरीकृत्य। शुक्लीकृत्य। पटपटाकृत्य॥

तिस्वितं। तथैवोदाहरति। ऊरीकृत्येति। एतच्च मनोरमानुसारेणोक्तं। वस्तुतस्तु ऊरी भूयेति भाष्योदाहरणादिच्चात्र मुदाहरति। ऊरीकृत्येत्यत्र वचनं शुक्लं संज्ञा प
सुसत्फलं च लब्धमिति बोध्यं। ऊरी उररी एतावङ्गीकारे। ध्वनिः शब्दस्तु साह्यप्रभृतिषु पठ्यन्ते। कृञ्योगे गतिसंज्ञाविकल्पः कृञ्यस्मिन्योगे त्वनेन नित्यमिति बोध्यं कृ
ऊर्याद्यविशेषेण मध्ये विध्यसुपेभवेदसाचिव गगइति भाष्ये इति च्चिदन्त्यात् कृ। तेन प्राप्नोतीति सूत्रस्य प्रयोगनियमार्थत्वं प्रकृतेरनुपपत्ते चावपिसंज्ञानियमार्थत्वप
शोपिनासीति। शुक्लीति। कृभ्वस्तियोगे संपद्यकर्तरि च्विः। अस्य सत्त्वादिति। कृ। पटपटाकृत्येति। डाचि बहुलं द्वे भवत इति पटच्छब्दस्य द्वित्वे। अव्यक्तानुकरणात्
तिडाचि टिलोपः। नित्यमाम्रेडिते डाचीति तकारपकारयोः पकार एकादेशः। निपातसंज्ञायाः समावेशार्थमूरीत्येव चकारः। तेन ऊरीकृत्य नमिमित्यत्र गतिरन्ते। तररीति

किति। भावेपर्णीयार्हरीतिपञ्चर नदाहृत्किपेति। क्रियायोगइत्यनेन कारिकाशब्दस्य विशेषणात् श्लोकवार्तिकारिकासु देत्र न गत्यादि इतिभावः। क्रियाशब्द
दास्त्विति रर्थः। यनु हत्य नेो। अनुकरणं चानेमान्यानेरिन्यस्य संज्ञा निपनपद्ये निगीतिर्थ्यर्थमितिमना इत्युक्तं नितिपरं किमिति। इत्यत्र खुप्रयोगनिय
ञ्खाद्विन्यनुकरणस्येतिशब्दे परे गतिसंज्ञायानिवारणायानितिपरमित्यावश्यकमिति प्रपुदाहरति खाड्डिति कृत्वेति। सत्यां संज्ञायामप्रयोगो नैवस
द्वितिखाड्कृत्यैव स्यादिति भावः। नचेति खाड्कृत्येति न भवती। तेः परस्यानुकरणस्य गतिसंज्ञानिषेधादिति वाच्यम्। अनितिपरमित्यत्र इतिः परो यस्मात्तदिति
रिकाशब्दस्योपसंख्यानम्। कारिका क्रिया। कारिकाकृत्य। अनुकरणं चानितिपरं। १।४।६२। खाट्कृत्य। अनितिपरं किं। खाडिति कृत्वा निरष्ठी
त्। आदरानादरयोः सदसती। १।४।६३। सत्कृत्य। असत्कृत्य। भूषणेऽलं। १।४।६४। अलंकृत्य। भूषणे किं। अलं कृत्वौदनं गतः। पर्याप्तमित्यर्थः
नुकरणमित्यादि त्रिसूत्रीस्वभावात् कृञ्विषया। अन्तरपरिग्रहे। १।४।६५। अन्तर्हत्य। मध्ये हत्वेत्यर्थः। अपरिग्रहे किं। अन्तर्हत्वा गतः। हतम्
परिगृह्य गत इत्यर्थः। कणेमनसी श्रद्धाप्रतीघाते। १।४।६६। कणेहत्य। पयः पिबति। मनोहत्य। कणेशब्दस्सप्तमीप्रतिरूपको निपातोऽभिलाषा
शये वर्तते। मनस्शब्दोप्यत्रैव। पुरोऽव्ययं। १।४।६७। पुरस्कृत्य। अस्तं च। १।४।६८। अस्तमिति मान्तमव्ययं गतिसंज्ञं स्यात्। अस्तङ्गत्य। अच्छग
त्यर्थवदेषु। १।४।६९। अव्ययमित्येव। अच्छगत्य। अच्छोद्य। अभिमुखं गत्वा उक्त्वा चेत्यर्थः। अव्ययं किं। जलमच्छं गच्छति। अदोऽनुपदेशे। १।४।७०। अ
कृत्यादः कृतं। परम्प्रत्युपदेशे तु प्रत्युदाहरणं। अदः कृत्वा। तिरोऽन्तर्द्धौ। १।४।७१। तिरोभूय॥ ॥ परं नइति परमनितिपरमितिबहुव्रीहिघटितनञ्तत्पुरु
ात्। स्यादेतत्। अनुकरणस्येतिशब्दपरत्वे क्रियायोगाभावादितिसंज्ञानाशीतिखाडिति कृत्वेति रूपं निर्बाधं किमनेनानितिपरग्रहणेनेति चेदत्राहुः। इति कृ
मुदाय एवं कुर्वेत्यर्थे वर्तते। तथा चेतिशब्दः क्रियाविशेषणकरणेन इति समुदायस्य क्रियावाचकत्वादस्येव क्रियायोग इति। हत्वं परिगृह्येति। हत्वा गमनं हिप
त्वा परिगृह्येति। आद्यमुदाहरणं द्वितीयं तु प्रत्युदाहरणं। अपरिग्रहे इति च प्रयोगोपाधिर्न तु वाच्यकोटिनिविष्टमिति भावः। कणेहत्येति अत्यन्तमभि
लाषनिवर्त्तनं पिबतीत्यर्थः। तथा च श्रद्धायाः अपगमात्तत्प्रतिघातो गम्यते। प्रत्युदाहरणं तु कणेह॥ ६॥ ६॥ ॥ ६॥ ६॥

ऽसमसंज्ञकत्वाच्च यथा॥ करणमस्मिन्‌ हन्तेत्यर्थः। पुरस्कृत्येति। पूर्वाधरावराणामित्यसिप्रत्यये तोयमव्ययं। नमस्पुरसोर्गत्योरिति विसर्गस्य सः। अग्रं पुरःप्रत्ययेनापत्र।
त्यध्याहारे पारशि भत्यगतित्वात्समासाभावः। अव्ययं किं। पुरं पुरी पुरः कृत्वा गतः। अस्तं च। अव्ययमिति किं। अस्तं कृत्वा कांडं गतः क्षिप्तमित्यर्थः। अच्छेति।
गतिसंज्ञायां निपातसंज्ञा च त्वनाव्ययत्वात्सुब्लुक्‌ स्यादिति भावः। अदः कृत्येति। पदास्य पमेव पर्यालोच्य पतितं देदसुदाहरणात्‌ अदः कृतमिति गतिरनेनवदृति
कृति स्वरेणसुदात्तत्वं। प्रत्युदाहरणमिति। अदः कृत्वा अदः कुर्वित्यादेरित्यर्थः। तिरोंतर्द्धौ। अंतर्द्धौ किं। तिरो भूत्वा स्थितः पार्श्वतो भूत्वेत्यर्थः॥ ७॥ विभाषा कृञि।
ति। गतित्वाभावपक्षे तिरसोऽन्यतरस्यामिति सत्वमपि न भवति। नहि भौ गतिग्रहणानुवृत्तेः। माधवस्तु पराभवे तिरस्कार इति प्रयोगदर्शनात्सत्वं वि।

मा कृञि। १।४। ७२। तिरः कृत्य। तिरस्कृत्य। तिरः कृत्वा। उपाजेऽन्वाजे। १।४। ७३। एतौ कृञि वा गतिसंज्ञौ स्तः। उपाजे कृत्य। उपाजे कृत्वा। अन्वाजे
अन्वाजे कृत्वा। दुर्बलस्य बलमाधायेत्यर्थः। साक्षात्प्रभृतीनि च। १।४। ७४। कृञि वा गतिसंज्ञानि स्युः। च्व्यर्थ इति वाच्यं। साक्षात्‌ कृत्य। सा
कृत्वा। लवणं कृत्य। लवणं कृत्वा। मान्तत्वं निपातनात्‌। अनत्याधान उरसिमनसी। १।४। ७५। उरसि कृत्य। उरसि कृत्वा। अभ्युपग
र्थः॥ मनसि कृत्य। मनसि कृत्वा। निश्चित्येत्यर्थः। अत्याधानमुपश्लेषणमत्र तु। उरसि कृत्वा पाणिं शेते। मध्ये पदे निवचने च। १।४। ७६।
नि वा गतिसंज्ञाः स्युरनत्याधाने। मध्ये कृत्य। मध्ये कृत्वा। पदे कृत्य। पदे कृत्वा। निवचने कृत्य। निवचने कृत्वा। वाचं नियम्येत्यर्थः॥ ॥

हणानुवृत्तिं केचिन्नेच्छंतीत्याह। उपाजेन्वाजे। एतौ विभक्तिप्रतिरूपकौ निपातौ दुर्बलस्य सामर्थ्याधाने वर्त्तेते। तदाह दुर्बलस्येति। साक्षात्प्रभृ। साक्षात्‌ मिथ्या।
लवणम्‌। उष्णम्‌। शीतम्‌। उदकम्‌। आर्द्रम्‌। गतिसंज्ञासन्नियोगेन च लवणादीनां पंचानां मकारांतत्वं निपात्यते। प्रादुस्‌। नमस्‌। आविस्‌ इत्यादि। आकृतिग।
नत्येति। असाक्षाद्भूतं यथा। साक्षाद्भवति तथा कृत्वेत्यर्थः च्व्यंते तु तु पूर्वविप्रतिषेधादूर्यादिच्विडाचश्चेति नित्यैव संज्ञा। तेन लवणीकृत्येत्यत्र मांतत्वं न भ।
विक गतिसंज्ञासंनियोगेन रहणो निपातनात्‌। भाष्यकृतां तु लवणशब्दस्य तु लवणीशब्दस्य वा विकल्पेन लवणशब्द आदिश्यते तस्य च संज्ञा विक।
उभयथापि चैरूप्यं निर्बाधं अनत्या। उरसिमनसी विभक्तिप्रतिरूपकौ। मध्ये पदे। विभाषा कृञीति वर्त्तते च कारादनत्याधान इति च। एषामनत्याधानरू

न तु गतिसंज्ञासंनियोगेन। अनत्याधाने किं। पदे कृत्वा शिरो नयति। वाचं नियम्येति। निवचनं हि वचनाभावः। अर्थाभावेऽव्ययीभावः॥ ७४॥ नित्यं हस्ते। उपयमन
वेतयोरेवं तन्न गौरवं तन्नं च निपात्यते हस्ते कृत्य परिणीयेत्यर्थः। उपयमने किं। हस्ते कृत्वा कार्षापणं गतः। स्वीकारमात्रमिति पर्येतु नात्तमिति तु व्याप्तराह
गतेन इति यो न्यायस्तेन तावद्गति समासात्तु दाहृत्य व्याख्यासमासान्तकुमारसंज्ञेनमारिग्रहणमिति। सुपुरुष इति क्रियायोगाभावाद्गतित्वाभावः। अव्ययस्य पासम
व्ययस्यार्थे वचनानि यस्मिंस्तानीत्यादि इति। आदिशब्दादुभयत्र मकारे। तेन दुराचारः पुरुषो दुष्पुरुष इत्यादि सिद्धं। प्रगतस्त्वाचार्य इति। अनेन गतार्थे च
दविग्रहेणानित्यसमासतां च दर्शयति। एवं प्रगतः पितामहः प्रपितामहः। प्रमातामह इत्यादि। अत्यादय इति। आदिपदादभिगतो मुखमभिमुखः। उ

प्रहस्ते पाणावुपयमने। १।४।७७। कृत्रि। उपयमनमिति विवाहः। स्वीकारमात्रमित्यन्ये हस्ते कृत्य। पाणौ कृत्य। प्राध्वं बन्धने। १।४।७८। प्राध्वं
बन्धनेनानुकूल्यं कृत्वेत्यर्थः। प्रार्थनादिना त्वानुकूल्यकरणे। प्राध्वं कृत्वा। जीविकोपनिषदावौपम्ये। १।४।७९॥ जीविकामिव कृत्वा। जी
विकाकृत्य। उपनिषदमिव कृत्वा। उपनिषत्कृत्य। औपम्ये किं। जीविकां कृत्वा॥ प्रादिग्रहणमगत्यर्थं। सुपुरुषः। अत्र वार्त्तिकानि। प्रादयो गता
द्यर्थे प्रथमया। प्रगत आचार्यः प्राचार्यः। अत्यादयः क्रान्ताद्यर्थे द्वितीयया। अतिक्रान्तो मालामतिमालः। अवादयः क्रुष्टाद्यर्थे तृतीयया। अव
क्रुष्टः कोकिलया। अवकोकिलः। पर्यादयो ग्लानाद्यर्थे चतुर्थ्या। परिग्लानोऽध्ययनाय पर्यध्ययनः। निरादयः क्रान्ताद्यर्थे पञ्चम्या। निष्क्रा
न्तः कौशाम्ब्या निष्कौशाम्बिः। कर्मप्रवचनीयानां प्रतिषेधः। वृक्षं प्रति॥ ९ उद्गतो वेलामुद्वेलः। प्रतिगतो संप्रत्यक्ष इत्यादि सिद्धं। अतिमाल इति। गोस्त्रि
सः। अवादय इति। आदिपदात् विरोधे वीरुधा पुरिवी कृत। सचन्द्रो वर्मणा सन्नद्धैति। पर्यादय इति। आदिपदादुद्युक्तः संग्रामाय उद्युक्तः संग्रामः। अध्ययनायेति।
तुर्थ्या। गुरुकुलवासादिना परिग्लानोऽध्ययनायेत्यर्थः। निरादय इति। आदिपदादुत्क्रान्तः कुलादुत्कुलः। निर्गतमंगुलिभ्यो निरंगुलं। प्रतिषेध इति। कुगति
तिप्रसक्तसमासस्य च कृत्यः प्रतिषेधस्तत्सूत्राणां अतिसंस्थेति भाष्यादिप्रयोगात्तु तिप्रभृतीनामेव कर्मप्रवचनीयानामित्यर्थः। वृक्षं प्रतीति। लक्षणेत्थंभूते।
वचनीयत्वविधिसामर्थ्यादिह समासो नेति चेन्न हि अपिस्तुत मिसु राहार्थे अपिस्तुयाद्विष्णुमित्यादावपिः पदार्थसंभावनेत्यस्यावकाशत्वात्त्वरे विशेषस

पदं। सप्तमीस्थमित्येतद्व्याचष्टे सप्तम्यंतरत्यादिना। तद्वाचकं पदमिति। तत्रोपपदमित्यन्वर्थसंज्ञा चैतल्लभ्यते। अत एवं संज्ञाविधावपि सप्तमीग्रहणं।
तं गृह्यते। धातोरिति पृथगधिकारत्वात्तत्सन्निहितो धात्वधिकार इति लभ्यते। तेन त्रिसुडीत्यस्य सुटि ते अभूदित्यादावुपपदे धातोः क्विबित्यर्थो न भवति।।
णां व्याचष्टे तस्मिन्सत्येवेति। उपपदे सत्येवेत्यर्थः। तत्रग्रहणाभावे तु धः कर्मणि ष्ट्रन्नित्यादावपि कर्मण्यभिधेये अणित्याद्यर्थः स्या
त्कर्त्रर्थेण् प्रत्ययो न स्यात्। किंच सप्तम्यंतनिर्देशस्योपपदसंज्ञार्थत्वेनयाचरितार्थत्वात्केवलादपि धातोः कर्त्रर्थेण्प्रत्ययः संभाव्येत तद्वृत्तेतु तत्रग्रहणे।
तत्रोपपदं सप्तमीस्थं। ३।१।९२। सप्तम्यन्ते पदे कर्मणीत्यादौ वाच्यत्वेन स्थितं कुम्भादि तद्वाचकं पदमुपपदसंज्ञं स्यात्। तस्मिन्सत्येव वक्ष्यमाणः
प्रत्ययः स्यात्। उपपदमतिङ्। २।२।१९। उपपदं सुबन्तं समर्थेन नित्यं समस्यते। अतिङन्तश्चायं समासः। कुम्भं करोतीति कुम्भकारः। इह
कुम्भस् कार इत्यलौकिकं प्रक्रियावाक्यं। अतिङ् किं। मा भवान्भूत्। माङि लुङिति सप्तमीनिर्देशान्माङुपपदं। अतिङ्ग्रहणाज्ज्ञापय
त्येनन्वेहाऽनुवर्तेत इति पूर्वसूत्रेऽपि गतिग्रहणं पृथक्कृत्वाऽतिङ्ग्रहणं नात्रापकृष्यते सुपेति च निवृत्तं। तथा च गतिकारकोपपदानां कृ
द्भिः सह समासवचनं प्राक् सुबुत्पत्तेरिति सिद्धं। व्याघ्री। अश्वक्रीती। कच्छपी। अमैवाऽव्ययेन। २।२।२०। अमैव तुल्यविधानं यदुपपदं तदेवाव्य
येन सह समस्यते। स्वादुङ्कारं। नेह कालसमयवेलासु तुमुन्। कालः समयो वेला वा भोक्तुम्। अमैवेति किं। अग्रे भोजं। अग्रे भुक्त्वा। विभाषाग्रेप्रथम
र्वे क्त्वाणमुलौ। अमा चान्येन च तुल्यविधानमेतत्।। ९९ कुम्भाद्युपपदस्य प्रत्ययोत्पत्तौ निमित्तत्वप्रतीत्या केवलात्कारणप्रत्ययशंकैव नास्ति। एवं स्थिते पः
रौ कश्चिदर्थग्रहणं व्याख्यानादित्याहुः। अन्ये तु तत्रोपपदमित्यस्य कर्मण्यणित्यादेश्चैकवाक्यतया प्रवृत्तावुपपदसंज्ञाया निर्विषयत्वापत्तेस्तत्रग्रह
णं सिद्धमित्येवेत्याहुः। समर्थेनेति। तेन महान्तं कुम्भं करोतीत्यादौ नातिप्रसंगः। अतिङन्तश्चेति। सुबिति तु अनुवर्तत एवेति। अतिङन्तमिति नोक्तमिति भा
ष्य इति। अमिति तु नोक्तं कृद्योगषष्ठीविधानात्। अतिङ् किमिति। सुपेत्यधिकारे किमनेनेति प्रश्नः। इतरो वक्ष्यमाणं ज्ञापकमनभिसंधाय प्रत्युदाहरति
तिं समासाभावसूचनाय भवानिति मध्ये प्रयुक्तं। पूर्वसूत्र इति। कुमादयः। गतिः इति योगं विभज्य कुमादयः सुबन्ताः सुबन्तेन समस्यन्ते गतिश्च सुबन्तोऽतिङन्तेन।

इति व्याख्येयमित्यर्थः। तथा चेति। यद्यप्युगतीत्यागतुपपदयोरेवलाभस्तथापि त्रितयविषयिणी प्राचां परिभाषा एकदेशानुमतिद्वारा तद्धापि ज्ञाप्यत इ
न्तरकां राशु कर्तृकरणे कृ. तेनिकृत्स्येन ङसन् ग्रहणसुत्रार्थसाधकमित्यपि मनोरमायां स्थितं। प्रामिति कृदन्तान्तरमपरासुबुन्मतेः पूर्वं समासइत्य
मानसुब्ग्रहणं निहानुवर्ततएव। तेन राजदर्शीत्यादौ पूर्वपदेनचोपादिकार्यं सिध्यति। परिभाषाफलं रथ्येपनगतिमुदाहरति व्याघ्रीति। व्याजिघ्रती
त्यातश्चोपसर्ग इति कः। पाघ्राध्माधेङ्दृशःश इति शः संज्ञायां न भवतीत्याघ्रादिभिरिति निर्देशादिति वक्ष्यते। व्याङो घ्रशब्देन गतिसमासः। स यदि घ्रशब्द
नतामपेक्षते न तर्हि सुबुत्पत्तेरेसंस्यापेक्षातः प्रागेव लिंगयोग इति लिंगनिमित्तप्रत्ययेन टापाभाव्यं नतु ङीषो घ्रशब्दमात्रस्य जातित्वाचिन्ताभावा
घ्रशब्देन समासइत्यर्दं तत्वाभावाज्जातिलक्षणो ङीष् पुनस्सादिति भावः। यद्यप्युपपदत्वेनाप्येतत्सिद्धं तथापि गतिग्रहणमाङो घ्रशब्देन समासे पश्चा
दनविशब्दस्य समासार्थमावश्यकमेव। श्वाद्ः पूर्वाद्हातीः कप्रत्ययविधानाद्शुपपदसंज्ञासुपगमेपि विशब्देन दत्तसुपगमादितिबोध्यं कारकमुदा
श्वक्रीतीति। अश्वेन क्रीता कर्तृकरणे कृतेति समासः। क्रीतात्करणपूर्वादिति ङीष्। सुबन्तेन समासे तु टापाभाव्यमित्यदंतनाभावाक्रीतात्करणेत्य
दादिति ङीषं। उपपदमुदाहरति। कच्छपीति। कच्छेन पिबतीति कच्छपी। सुपीति योगविभागात्कः। इहापि समासस्य सुबन्तनापेक्षायां टचेवस्यात्न ङीषित्या
त्यत्रैव बोध्यं। प्राचा तूपपदमतिङ् इतं समस्यत इत्युक्तं। तदसत्। तथा सति प्रथमं न सुब्ग्रहणं निहत्या पन्या राजदर्शीं च मैकार इत्यादौ नलोपो न स
स्यात्। घाटिति आद्गुण इति पररूपं च स्यात्। स्यादेतत्। कच्छेन साधनेन पिबतीत्यर्थाभ्युपगमे कच्छस्य कारकत्वेन कच्छपीति रूपसिद्धावेद उपपदस्या
दाहरणमिति चेदेवं तर्हि मूलावापिणीत्युदाहर्तव्यं। सुप्यजातावितिणिनौ कृते मूलोपपदस्य कृदन्तेन समासे प्रातिपदिकान्तेत्यादिना पूर्वपदस्यात्त्रिभि
समासमातिपदिकान्तनुकारस्य णत्वं सिध्यति सुबन्तेन समासे त्वंतरंगत्वाचांतलक्षणो ङीपि पश्चात्प्रियपिनीशब्देन समासे गर्गभगिनीत्यत्रेव णत्वं न स्यादिति
क. चेन हेतुनापिबतीत्यर्थविवक्षायां कच्छसाकारकत्वात्कच्छपी उपपदसोदाहरणं सम्यगेवेत्याहुः। अमैवाव्ययेन। पूर्वेण सिद्धे नियमार्थमिदं। तुल्यविधानमि
त्यध्याहारेणाख्यातव्यं। नदेवेति। यस्मिन्नुपपदे येन वाक्येन अममेव विहितस्तेनैवोपपदममव्ययेन समस्यते नान्येनेत्यर्थः। नियमवर्जनमोपमेव कारेण तत्सूत्रस्थः।

॥ असति तु अव्ययग्रहणे अमैव यत्तुल्यविधानं तदेव केनचित्समर्थेन समस्येत। तथा सति स्वादुंकारमित्यत्रैव समासः स्यात् न तु कुंभकारं इत्यत्र अयं पूर्वसूत्रे वै।
ता अव्ययविषयक नियम इति चेत्तर्हि अमंतविषयक एव किं न स्यादमंतेनयः समासः सोऽमैव तुल्यविधानस्येति। तथा चायं भोजमित्यत्र समासो माभूत् अ
कालो भोक्तुमित्यत्र तु स्यादेवेति भावः। तदेवेति किं कालो भोक्तुं। समर्थो भोक्तुं। अमैवेत्येवकारेणाम्नान्येन तुल्यविधानस्योपपदस्य समासनिवारणेऽपि तु
विधानस्यास्यादेवातस्तन्निवारणाय तदेवेत्युक्तं ॥२६॥ तृतीयाप्रभृतीन्यन्यतरस्यां। उभयत्र विभाषेयं। अमैव तुल्यविधानस्य प्राप्ते अमा चान्येन च तुल्यविधा

याप्रभृतीन्यन्यतरस्यां। २।२।२१। उपदंशस्तृतीयायामित्यादीन्युपपदान्यमन्तेनाव्ययेन सह वा समस्यन्ते। मूलकेनोपदंशं भुंक्ते। मूल
कोपदंशं॥ क्त्वा च। २।२।२२। तृतीयाप्रभृतीन्युपपदानि क्त्वान्तेन सह वा समस्यन्ते। उच्चैःकृत्य। उच्चैः कृत्वा। अव्ययेऽयथाभिप्रेताख्याने कृञः क्त्वाणमुलौ। तृतीयाप्रभृती
ति किं। अलंकृत्वा। खलु कृत्वा। तत्पुरुषस्याङ्गुलेः संख्याव्ययादेः। ५।४।८६। संख्याव्ययादेरङ्गुल्यन्तस्य तत्पुरुषस्य समासान्तोऽच् स्यात्। द्वे अङ्गुली
प्रमाणमस्य द्व्यङ्गुलं दारु। निर्गतमङ्गुलिभ्यो निरङ्गुलम्। अहःसर्वैकदेशसंख्यातपुण्याच्च रात्रेः। ५।४।८७। एभ्यो रात्रेरच् स्याच्चात्संख्याव्ययादेः
अहर्ग्रहणं द्वंद्वार्थं। अहश्च रात्रिश्चाहोरात्रः। सर्वा रात्रिः। सर्वरात्रः। पूर्वं रात्रेः। पूर्वरात्रः। संख्यातरात्रः। पुण्यरात्रः। द्वयो रात्र्योः समाहारः द्वि
रात्रं। अतिक्रान्तो रात्रिं। अतिरात्रः। राजाहस्सखिभ्यष्टच्। ५।४।९१। एतदन्तात्तत्पुरुषाट्टच् स्यात्। परमराजः। अतिराजी। कृष्णसखः। अन्हष्ट
खोरेव। ६।४।१४५। टिलोपः स्यान्नान्यत्र। उत्तमाहः। द्वे अहनी भृतो द्व्यहीनः क्रतुः। तद्धितार्थे द्विगुः। तमधीष्टो भृत इत्यधिकारे द्विगोर्वेत्यनुवृत्तौ। राज्याहःसम
भ्य इति स्त्रीलिङ्गविशिष्टपरिभाषाया अनित्यत्वाच्चेह। मद्राणां राज्ञी। मद्रराज्ञी॥ ९ नसंप्राप्तेश्चारंभात्। प्रासेव्यया। उपदंशस्तृतीयायां मूलकेनोपदं
शो उपदंशं प्रासेव्यया। अव्ययेऽयथाभिप्रेताख्याने कृञः क्त्वाणमुलौ। उच्चैःकारं इह समासपक्षे कृदुत्तरपदप्रकृतिस्वरः। अचा दीर्घ सुत्यन्तेनान्तरस्या मित्या
दि। असमासे तु उच्चैरित्यंतोदात्तत्वं। उच्चैर् इति स्वरितिन्युन्निपातो स्वरस्यानुनिपदे तु कि परस्य सच प्रवृत्ते रित्याहुः। मनोरमायां तु उच्चैरित्यंतो
दात्त इति यथायोग्यमिति स्थितं अमेत्यनुवर्तमानत्वाह। अमंतेनेति किं नेह न। पर्याप्तो भोक्तुं। पर्याप्तिवचनेष्वलमर्थेषु। कालसमयवेलासु तुमुन्। उचितः पात। अन्यतरस्यामि

कि स्कं श्रियं रोरिति निवर्त्तितिरूप्यतः तत्र सुवर्णशीर्षपणापिनद्धनीयानन्तोपपत्तेः। अलं कन्नेति। अलंस्त्वन्तोः प्रतिषेधयोरिति स्वस्त्रोपदेशस्तृतीयाया
तत्पुरुषन्ताच्चेहसमासः तत्पुरुषे। असाधारणात् समासान्तानाह। तत्पुरुषस्येति। अन्तोन्त्याविधिं बाधित्वा प्रत्ययः परश्चेति परत्वात् तत्पुरुषात्परत्वान्त्व
न्ययायागापीटकः किन्तेपिगापाभ्यां परश्च वटश्च भवतिनतत्वन्नावयवः अमस्तु अभ्युवेयकरणसामर्थ्यात्परविधिर्बाध्यते। एवं चलापश्चात्तत्पुरुषात्परं गुणे
श्चेतत्पुरुषस्यांगुलेर्विनिजसमासान्तापेस्यापश्चवयवपष्ठीत्याङ्गः अंगुलमिति। तद्धितार्थेति समासः। द्विगोर्नित्यमिति मात्रचोलोपइति च निरूढत्वमनो
हृयसचोस्तुमितिस्थितं। द्वंद्वार्थमिति। अन्होरात्रेभ्य इति पष्ठीतत्पुरुषस्यासंभवादिति भावः। ननु अहः शब्दस्याहः सुन्नातापेरात्रिशब्दस्य रात्रि
गौणत्व संभवादहश्चासौ रात्रिश्चेति कर्मधारयोस्त्विति चेन्मुख्यसंभवे गौणग्रहणायोगात्। द्वेयंत शिशिरावहोरात्रे चेत्यत्र द्वंद्वे समासान्तदर्शे।
रात्रइति। जातिरप्राणिनामित्येकवद्भावः। सनपुंसकमित्येतद्बाधित्वा परत्वाद्रात्राह्नाहाः पुंसीति पुंस्त्वं। एतेनैकवद्भावात्।। क्लीबत्वेति प्राचो ग्रंथः परा
नसार द्वौरात्रइत्यादिग्रंथविरोधाच्च। सर्वरात्र इति। पूर्वकालैकेति समासः पूर्वरात्रइति पूर्वापराधरोत्तरमित्येकदेशिसमासः। यदा तु रात्रिश-
शोन्तस्य पूर्वीकृत्य कर्मधारयोऽभ्युपगम्यते तदा पूर्वरात्रि रित्येव भवति। द्विरात्रमिति। संख्यापूर्वंरात्रं क्लीबमिति। वक्ष्यते अत्र च सूत्रे रेव न स्त-
व सिद्धे नियमार्थमिदं एवकारस्त्वन्य एव टच्स्योरिति विपरीतनियमशंकानिरासार्थः आन्महान्तो सइति प्रकृतिभावविधानेन तन्निरासे प्र-
रत्वं स्यादिति भावः टच्सौरवेति किं। अन्हा निर्वृत्तमाह्निकं। कालादित्यधिकारेनेन निर्वृत्तमिति ठञ्। टिलोपाभावार्थ्यो पीन इत्यकारलोपः। उत्तमाद्
कारेय संख्यातेन्यूनत उत्तमशब्दस्योपादानादाद्वेरोन। ध्यद्वीनइति। समासान्तविधेरनित्यत्वाच्च टच्। सति तु तस्मिन्नन्नादेशः प्रसज्येत। नच नान्तस्य-
लोपविधिसामर्थ्यान्न टजिति वाच्यं। अद्वीनइत्यत्र तत्ससावकाशत्वात्। अनित्यत्वादिति। अवच लिंगं शास्त्रिं गत्वांकुशेनानपयिग्रहणं। मद्रराज्ञीति। प-
घटचसाधनाभस्यादहइतिपुंवद्भावेटिलोपेचमद्रराजीत्यनिष्टरूपंस्यादितिभावः॥ ॥

ह्नएतेभ्यः। एतच्चाह्नेनाह्नः सर्वैकदेशेति सूत्रस्थाः परामृश्यंते। यद्येतु नस्मिन्नह्नादयो निर्दिश्यापकारेण च संख्याव्ययेभ्यनुकृष्टेनत्र सर्वेषां विशेषणानि शेषे
न्द्रदहन गृह्यते। संभवाद्दिनार्थेनाह्न सर्वादिभ्य इति। समासांते पर इति। एतच्च प्रकरणाच्छभ्यते। भाष्ये तु अह्नादेशः प्रत्ययस्थानः। अह्न एभ्यः अनन्तराह्नेऽपवाद
पापादह्न एवो रेवेति निपातादित्येषां भावेत्तल्लोपेनदन्तकारलोपानवीह्न इत्यादिरूपसिद्धिः। रेफादिति यदिलुनयेत्यह्नस्तु भव इत्यादिष्वन्तनालसाह्नः रत्ना
द्विनह्नि चादित्यपि वो ध्वंरपाभ्यामिष्यपिकारात्। ङमोह्रस्वादिति। सुपो ह्रस्वादिति ञ्चित्रिकारात्युक्तमयुक्तमिति भावः। प्रसंगाद्वहुव्रियाभिति। ननिह्रस्वोनिदु
ह्नाह्नः पुंसीति वचनादिति चेन्मैवं। सर्वमह्नस्सर्वाह्न इत्यादावुपसर्जनस्वत इत्यनस्त्वनुमतद्विनायामप्रवर्तते। तुपि पुंकवदिति लिंगानिर्देशोत्र प्रमाणं।
ह्नोऽह्न एतेभ्यः। ५।४।८८। सर्वादिभ्यः परस्याह्न शब्दस्याह्नादेशस्स्यात्समासांतेपरे। अह्नोऽदन्तात्। ८।४।७। अदन्तपूर्वपदस्थाद्रेफात्पर
ह्नादेशस्य नस्य णः स्यात्। सर्वाह्नः। पूर्वाह्नः। संख्याताह्नः ह्न्योरन्होर्भवः। कालाह्नः। द्विगोस्तु गनपन्यरतिङमोह्रस्वा। द्व्यह्नः। त्र्यह्नः। क्षिपामदन्तनाह्नम्।
ह्नः प्रियः। अत्यह्नः। क्षुभ्नादिषु च। ८।४।३९। एषु णत्वं न स्यात्। दीर्घाह्नी प्रावृट्। एतच्चैतदर्थमह्नस्यरस्यानुकरणं क्षेत्रनकर्तव्यः। मति
कानेति णत्वं वारणाय क्षुभ्नादिपाठस्यावश्यकत्वात्। अदन्तादिति परकरणाचेह। परागतमहः पराह्नः। न संख्यादेस्समाहारे। ५।४।८९। समा
मो धर्मो यस्येति त्रिपदे बहुव्रीहौ माभूत्। स्वशब्दो हीन केवलात्पूर्वपदं। किं तु मध्यमत्वादापेक्षिकं। संदिग्धसाध्यधर्मेत्यादौ तु कर्मधार
पूर्वपदो बहुव्रीहिः। एवं तु परमस्वधर्मेत्यपि साध्वेव। निवृत्तिधर्मा। अनुच्छित्तिधर्मेत्यादिवत्। पूर्वपदं तु बहुव्रीहिणा क्षिप्यते। ज॰
जम्भा सुहरिततृणसोमेभ्यः। ५।४।१२५॥ जम्भेति कृतसमासान्तं निपात्यते। जम्भो भक्ष्ये दन्ते च। शोभनो जम्भोऽस्य। सुजम्भा। ह
रितजम्भा। तृणं भक्ष्यं यस्य तृणमिव दन्ता यस्येति वा। तृणजम्भा। सोमजम्भा। स्वादिभ्यः किं। पतितजम्भः॥ जैः। न चैवमप्यंतोदात्तार्थमत्र
विधानमावश्यकमन्यथाऽहल इत्यत्र पूर्वपदप्रकृतिस्वरः स्यादिति शंक्यं। नञ्सुभ्यामित्यनेनांतोदात्तविधानादित्याहुः। शेषिकस्य कपो निषेधार्थं
त्रांतोदात्तत्वार्थं वचनमिति। शक्तेर्विति। आचार्येण केचित्पठ्यते हलिशक्त्योरिति पाठितारतिभावः। नित्यमसिच्। अकारोच्चारणं भत्वसंपादनार्थं
सासिन्यातरीयस्येति चेत्याकारलोपः सिध्यति। अस्वरितत्वादेवान्यतरस्यां ग्रहणानुवृत्ति सिद्धे नित्यग्रहणमन्यतो विधानार्थं तेनाल्पमेधस इति
निरूपिकारान्तः। धर्मादनिच्। अनिचोऽकारश्चित्त्वप्रयोजनश्चेत्। अन्यत्तु धर्मं करोम्याचष्टे वा तत्करोतीति णिच्यन्तात् क्विप् धर्मपरमो धर्मपश्यसः॥

धर्मा। एकदेशविकृतस्यानन्यत्वाद्धर्मशब्देऽपि भिन्नकारोऽत्र कारणमिह सम्प्रयोजनमेवेत्याहुः। बहुव्रीहिग्रहणात्पूर्वपदमाश्रित्य तत्रस्थमनुपदमेवास्य
केवलादित्यनेन विशेष्यत इत्याह। केवलात्पूर्वपदादिति। प्राचावद्भिरपदमपि विशेषितं प्रसारकत्वादपि केवलादिति धर्मशब्दस्य पूर्वपदस्य च विशे
ति व्याख्याने। ननु भवमपि चिंत्यं। व्याहृत्तौ मानाभावात्। धर्मपदविशेषणे प्रयोजनाभावाच्च। न च धर्मशब्दान्तं पूर्वोत्तरपदं तत्र चेतिः फलमिति च
बहुव्रीहावयवीभूतपूर्वपदात्परत्वस्य धर्मपदे व्यसंभवादेवादोषत्वात्। मध्यमत्वादिति। न च सर्वनामसंख्ययोरिति सूत्रशब्दस्य पूर्वनिपातः शं
कनाप्यादेशकृतिगणत्वादिति हृदयन्यादिभिस्समाहितत्वात्। आपेक्षिकमिति। नन्वतएव केवलग्रहणं व्यर्थं पूर्वपदशब्दस्य समासप्रथमावयववृत्ते
प्रथमपदस्याहृत्तिसंभवादिति चेदत्राहुः। पूर्वपदासेपेत्वान्यर्थप्राहकत्वेन केवलपदस्य सार्थकत्वादिति। कर्मधारयपूर्वपद इति। नन्वत्र निचुदुर्लभः।
त्यस्य समासानान्तकादित्यर्थादिति चेन्मैवं। केवलपदग्रहणस्य समासान्तकपूर्वपदपरत्वेमानाभावात्। निष्टत्रिधर्मा हिस्यानो भवतीत्यादिप्रयोगविरोध

दक्षिणेर्मा लुब्धयोगे। ५।४।१२६। दक्षिणेर्मा व्रणं यस्य दक्षिणेर्मा मृगः। व्याधेन कृतव्रण इत्यर्थः। इच्कर्म्मव्यतिहारे। ५।४।१२७। कर्म्मव्य
तिहारे यो बहुव्रीहिस्तस्मादिच्स्यात्समासान्तः। केशाकेशि। मुशलामुशलि॥ ९९ अस्मदुकार्यमुधम् धारण इति धातौ माधवग्रंथे स्पष्टः। एतेन सा
७ सेति साध्यधर्मोसंदिग्धप्रासीसाध्यधर्मी चेति विग्रहः। स च संदेहः साध्यधर्मद्वारकएव पर्यवस्यतीति केषांचिद्व्याख्यानं परास्तं उक्तरीत्यैव साध्यस
संदिग्धत्वलाभे तत्समर्थनप्रयासस्य व्यर्थत्वात्। साध्यैवेति। परमप्रासीसत्यपरमतः सधर्मोपसेति पराविगृह्येते। तदेतत्यर्थः॥ ७॥ दक्षिणेर्मा। लुब्धयो
गयोगादेवेर्मनिच्प्रत्ययादिरं निपातनं नात्मदेत्यर्थ स्रोदंत चाह। व्याधेनेति। चालीहेमाका मालीगुणानिपि रिपुणानिर्मितो दक्षिणेर्मेति प्रयोगस्त्वौपचारिक
यं चिन्त्यः केशाकेशीति। तत्र तेनेदमिति कर्मव्यतिहारे बहुव्रीहिः। इच्चान्यपदस्य निष्क्रमम् तिष्ठत्पार्थव्ययीभावत्वे व्ययत्वं। नन्वेवमिच्चप्त्विर्केरणाव्य
भावसंज्ञया बहुव्रीहिसंज्ञाया बाधात्समासस्वरेणांतोदात्तत्वसिद्धेः। अत्राहुः। विशेषणार्थेन शब्दस्य कमेव। निष्कुमम्प्रनिष्ठकारमात्रपाठे हि सुगंपि रित्यादावनि
संयमात्। किंचात्राव्ययीभावसंज्ञया बहुव्रीहिसंज्ञा न बाध्यते किंतु द्वयोस्समावेशएव। उपजीव्यविरोधस्यान्याय्यत्वादेवं च स्वरार्थमपि चिनंकर्तव्यमेवेति॥

ीति। समुदायनिपातनस्य विषयविशेषपरिग्रहार्थत्वात् द्विदंडी शान्तेऽन्यत्र निर्वचनं भवतीति। उभाहस्तीत्यादि। इह निपातनादेवाचः पाक्षिकत्वं। प्रसंभ्यां ज
इत्येकत्वे प्युपपरनिबंधनं द्वित्वमाश्रित्य जानुनोर्ज्ञुरिति द्विवचननिर्देशः तल्लंजु स्थानषष्ठीत्वस्फुटीकरणं। जानुन इत्युक्ते तु किमियं पंचमी प्रत्ययाधिकारा
न्मयपरत्वेवं संदेहः स्यात्तन्नैतदर्जनयनाह। जानुशब्दयोर्ज्ञुरादेशः इति। शार्ङ्गधन्वेति। कथं तर्हि स्वलावरस्य प्रशंसायां नवजुषमन्त्रायतनुगस्त्वरितिपुष्परंतप
ति चेदत्राहुः। समासान्तविधेरनित्यत्वाच्चात्रानुपपत्तिरनित्यत्वे प्रमाणं त्वादिगणे राजन्शब्दपाठः। सहि प्रतीतरंभारयपलातुरुपद्रव्यंतोद्दारार्थः। राजाह
द्विदण्ड्यादिभ्यश्च।५।४।१२८। तादर्थ्ये चतुर्थ्येषा। एषां सिद्ध्यर्थमिच्प्रत्ययः स्यात्। द्वौ दण्डौ यस्मिन् प्रहरणे तत्। द्विदण्डि प्रहरणं द्विमुश
उभाहस्ति। उभयाहस्ति। प्रसंभ्यां जानुनोर्ज्ञुः।५।४।१२९। आभ्यां परयोर्जानुशब्दयोर्ज्ञुरादेशः स्याद्बहुव्रीहौ। प्रगते जानुनी यस्य। प्रज्ञुः। संज्ञुः। ऊर्ध्वा
द्विभाषा।५।४।१३०। ऊर्ध्वज्ञुः। ऊर्ध्वजानुः। धनुषश्च।५।४।१३२। धनुरन्तस्य बहुव्रीहेरनङादेशः स्यात्। शार्ङ्गधन्वा। वा संज्ञायां।५।४।१३३। शतध
शतधनुः। जायाया निङ्।५।४।१३४। जायान्तस्य बहुव्रीहेर्निङादेशः स्यात्। लोपो व्योर्वलि।६।१।६६। वकारयकारयोर्लोपः स्याद्वलि। [illegible]
वतिर्जाया यस्य युवजानिः। गन्धस्येदुत्पूतिसुसुरभिभ्यः।५।४।१३५। एभ्यो गन्धस्य इकारोऽन्तादेशः स्यात्। उद्गन्धिः। पूतिगन्धिः। सु
गन्धिः। सुरभिगन्धिः। गन्धस्येत्वे तदेकान्तग्रहणं। एकान्त एकदेश इव अविभागेन लक्ष्यमाण इत्यर्थः। सुगन्धि पुष्पं सलिलञ्च सुगन्धि।
गुणे हशोभना गन्धाः द्रव्याण्यस्य। सुगन्धस्यापणिकः॥ ११ सखीति टचो निषत्वे तु ङित्त्वेनेति। लोपो व्योर्वलीति। व्योर्लोप इति चेत्तथैव एकनो
लोपः पूर्वविप्रतिषेधेनेत्याद्यपि तु मार्गो विधेयनिर्देशः कृतस्तेन सुखीयतेः क्विपि सुखीरिति सिद्धं। गंधस्येत्। तकार उच्चारणार्थस्तत्राध्येनाह। इका
ति स्यादेः परस्य नीहन भवतीति समासान्ता इत्यधिकारात्। अत्र केचिदाहुः। इकारस्य प्रत्ययत्वेऽपि न सति यत्संज्ञेति चेति लोपे नोद्गन्धिरित्यादिरूपसिद्धेः। न च ति
मित्यन्तस्वरितत्वात्पत्रिनिर्देशस्या तकारस्योच्चारणार्थत्वाभ्युपगमात्। नापि षष्ठीनिर्देशादादेशत्वमेव न प्रत्ययत्वमिति वाच्यं। गन्धो हि गन्धस्य इत्यादिष्वन्यपरि
षष्ठीदर्शनादिति अविभागेनेति। एवञ्च गुणवाचिनस्य च ग्रहणं नेतु द्रव्यवाचिन इति फलितोऽर्थः। द्रव्याणीति। यत्किञ्च गन्धशब्दो द्रव्यवचनः स हि न ज

रभेन्त्वेगंधकेगर्वलेशयोः। सएव द्रव्यवचनो बहुत्वेपुंसिचस्तनइतिकोशः ॥ केचित्तु। गंधस्येत्त्वइतिव्यातिंकृतइकारान्तशब्दस्याभावकृत्त्वं तथाहि
ातु कस्येत्त्वात्। तथाचभट्टिः। श्याप्राप्तिवान् गंधवहःसुगंधइति। न्यास्या तेन तत्रत्वमगंन्तापा। गंधस्येत्त्वादिनाइकारः समासांतोन गंधस्येत्त्वंतस्य
ामितिचवचनात्सुगंधश्यापणिकइतिपथ्येति। अतएवभस्मपात्तसहकारसुगंधा विन्यादीनां सामासिकत्वंद्रष्टव्यमितिहतोतकः ॥ ॥ अल्पाख्यायां
ाविनोगंधस्येकारांतादेशः स्यात बहुव्रीहौ। सूपस्यगंधइति। अतएववाचकाद्यपिकरणापदोबहुव्रीहिः। यद्यपकल्पितार्थकथनमेतत् सूपोगंधो

ल्पाख्यायां। ५।४।१३६। सूपस्यगन्धोलेशोयस्मिन्तत्। सूपगन्धिभोजनं। घृतगन्धि। गन्धोगन्धकआमोदेलेशेसम्बन्धगर्वयोरिति
॥ः। उपमानाच्च। ५।४।१३७। पद्मस्येवगन्धोऽस्यपद्मगन्धिः। पादस्यलोपोऽहस्त्यादिभ्यः। ५।४।१३८। हस्त्यादिवर्जितादुपमानात्परस्य
पादस्यलोपस्स्याद्बहुव्रीहौस्यात्निदाहरणार्थंसमासान्तः। व्याघ्रस्येवपादावस्यव्याघ्रपात। अहस्त्यादिभ्यः किं। हस्तिपादः। कुसूलपादः। कुम्भ
पदीषुच। ५।४।१३९। कुम्भपद्यादिषुपादस्यलोपोङीपचनिपात्यतेस्त्रियां। पादःपत्। कुम्भपदी॥ स्त्रियांकिं। कुम्भपादः। संख्यासुपूर्वस्य। ५।
४।१४०॥ पादस्यलोपस्स्यात्समासान्तोबहुव्रीहौ। द्विपात। सुपात। वयसिदन्तस्यदतृ। ५।४।१४१। संख्यासुपूर्वस्यदन्तस्यदतृइत्यादेश।
ादयसि। द्विदन्न। चतुर्दन्न। षड्दना अस्य। षोडन्। सुदन्। सुदती। वयसिकिं। द्विदन्तःकरी। सुदन्तोनटः। स्त्रियांसंज्ञायां। ५।४।१४३। दन्तस्यद
ात्समासान्तोबहुव्रीहौ। अयोदती। फालदती। संज्ञायांकिं। समदन्ती। विभाषाश्यावारोकाभ्याम्। ५।४।१४४। दन्तस्यदतृबहुव्रीहौ। श्यावदन्। श्या
वदन्तः। अरोकदन्। अरोकदन्तः॥

ात्वेचविग्रहः। गंधशब्दस्यविशेषणत्वेप्यस्यादेवज्ञापकात्परनिपातः। पादस्य। यथायथंलोपः समासांतोनस्यात्
रस्येत्यादेःस्यात योषिकः कृष्णपसत्येन। शेषाद्विभाषेत्यत्रसमासांतापेक्षस्यशेषस्याश्रयणादत्राहसमासांतइतिकथंपुनरभावोभावस्यचयवःस्या
त्रस्यानिर्दारणेतिवचनवत्वारोपत्वादिकमनयवत्वेगम्यतइतिभावः। कुंभपदीषुच। बहुवचननिर्देशाद्गणपाठसामर्थ्याच्चायमर्थोगतिरित्यभिप्रेत्याहकुं
भपद्यादिष्विति। इहगणेकुंभपदीत्यत्रपद्यनानपदीत्येवंसमुदायाः॥

नस्य च प्रयोजनं विषयविशेषपरिग्रहस्त्वाशयेनाह स्त्रियामिति। यद्वा हेयमानपूर्वसंस्यापूर्वं च प्रकृतेनेन समसिद्धे लोपे नित्यं ङीवर्थं च नंतेन पादोन्यत
तिनिकल्पो न भवति। द्विदच्चिति। द्वौ दंतावस्य जातौ। शिशुत्वावस्थाविशिष्टं गम्यते। उगिदचामिति नुम् संयोगांतलोपस्य सिद्धत्वाच्च लोपो न। योद्विचिति।
द्वदन्नैन्यनेनोन्नरुते। सुदतीति। उगितश्चेति ङीप्। समदतीति। नासिकोदरेत्यादिना ङीप्। स्यावदन्निति। स्यावः स्यालः पिङ्गलः दन्तः। अग्रेकुड्
अशोकाग्रद्विदादंताग्रसमः॥ ॥ अग्रांत। इहाग्रशब्दस्य पार्थस्य कारलोपे नम्रपिकदच्चिति सिध्यतीत्याहुः। अजानेति। अजानकुन्दस्य
न्तशुद्धशुभ्रवृषवराहेभ्यश्च। ५।४।१४५। एभ्यो दन्तस्य दत्वा। कुड्मलाग्रदन्। कुड्मलाग्रदन्तः। ककुदस्यावस्थायां लोपः। ५।४।१४६॥
जातककुत्। पूर्णककुत्॥ त्रिककुत्पर्वते। ५।४।१४७। त्रीणि ककुदान्यस्य। त्रिककुत्। संज्ञैषा पर्वतविशेषस्य। त्रिककुदोऽन्यः। उद्विभ्यां काकुद
।५।४।१४८॥ लोपः स्यात्। उत्काकुत्। विकाकुत्। काकुदं तालु। पूर्णाद्विभाषा। ५।४।१४९। पूर्णकाकुत्। पूर्णकाकुदः। सुहृद्दुर्हृदौ मित्रामित्र
।५।४।१५०। सुदुर्भ्यां हृदयस्य हृद्भावो निपात्यते। सुहृन्मित्रं दुर्हृदमित्रः। अन्यत्र सुहृदयः। दुर्हृदयः। उरःप्रभृतिभ्यः कप्। ५।४।१५१। व्यूढो
कः। प्रियसर्पिष्कः। इह पुमान्। अनड्वान्। पयः। नौः। लक्ष्मीरिति एकवचनान्तानि पठ्यन्ते॥ द्विवचनबहुवचनान्तेभ्यस्तु शेषाद्विभाषे
विकल्पेन कप्। द्विपुमान्। द्विपुंस्कः। अर्थान्नञः। अनर्थकं। नञः किं। अपार्थं। अपार्थकः। इनः स्त्रियां। ५।४।१५२। बहुदण्डिका नगरी।
अनिनस्मिन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति। बहुवाग्मिका॥ स्त्रियां किं। बहुदण्डी। बहुदण्डिको ग्रामः॥ ॥
हः। इह हविषास्य चस्यागम्यते। उरःप्रभृतिभ्यः। कप्। उरःप्रभृत्यन्ताद्बहुव्रीहेः कप्स्यात्। समासार्थोत्तरपदान्ताः समासान्ता इति पदेशे तु बहुव्रीहेरेव समासान्ते
प्रभृतिभ्यः कविति व्याख्येयं। तद्धितत्वात्स्वनेनत्वं। व्यूढोरस्क इति। व्यूढविशालमुरोऽस्य। सोपदादाविति विसर्जनीयस्य सः। प्रियसर्पिष्क इति। इणः षः। इति
सपन्ने। एकवचनान्तानीति। नपुंसकत्वेति सिद्धे लक्ष्मीशब्दपाठस्तु इह एकवचनान्तलक्ष्मीशब्दा बहुव्रीहेरेव नित्यं कबन्यत्र शेषादिति विकल्प एवं
समासार्थस्तेनारूपमरूपलक्ष्मीकेन सांप्रतिनेसहनिभारविप्रयोगः सिद्धः। अरुणास्मोयसेनिविग्रहः। यत्तु माचोक्तंन एतच्चेतिकपबहुलक्ष्मीकमिति

ब्दस्यैकवचनांतत्वाभावान्न क्तेनेनियमेन बाधितत्वात्। बह्वी अधिकान्तस्यैर्थस्येति विग्रहे वैपुल्यवाचिन एकवचनांतत्वसंभवेपि विशेषानपेक्षत्वेऽवी
रः प्रभृतिभ्यः कविनेयवक्तुमुचितत्वात्। अस्तु नियमशास्त्राणां निषेधमुखेन प्रवृत्तिरित्यावीप्नेनेदामावोकनपि सम्यगेवेति शेषः। अर्थाच्च भःगणा
र् अनर्थकेनापीति। कथं तर्हि सुपथीनगरीति इत्त्वं ते पूतां कपो वाद्वर्चारत्वात्। नवनपूजनादित्यनेन ऋक्पूरब्धूरित्यप्रत्ययस्येव कपोपि निषेधः
चः प्राचीनानामेव सनिषेधप्रवृत्तिवक्ष्यमाणत्वात् कप्प्रत्ययस्य च उत्तरत्वात्। तस्मिन् समासांतविधेरनित्यत्वात्सापुरिति समाधेयं पुरोरनाकाविति सूत्रे
भाष्यावेलुनर्कं चहुवाग्निकेति। वाचो ग्मिनिः॥ शेषाद्वि॥ ययत्र मागुक्तकपुमत्तार्वेदः शेषः स्वानतर्हि व्याघ्रपान्त्सुगंधिरित्यादावपि स्यादतः समा
: शेषद्वहगव्धेनदर्त्वाह। अनुक्तसमासांतादिति। व्याघ्रपादिति। स्थानिद्वारालोपाधिसमासांतरप्युक्तं। सुगंधीति। गंधस्येत्यादिनाहत्समासांतः। प्रियपथ
व्याद्विभाषा। ५।४।१५४। अनुक्तसमासान्ताच्छेषाधिकारस्थाद् बहुव्रीहेः कप्वा स्यात्। महायशस्कः। महायशाः। अनुक्तेत्यादि किं। व्याघ्रा
त्। सुगंधिः। प्रियपथः। शेषाधिकारस्थात् किं। उपबहवः। उत्तरपूर्वा। सपुत्र। तस्मादित्यादिना शेषशब्दोऽर्थद्वारपरः। आपोऽन्यतरस्यां। ७।४।१५।
व्यावकस्य ह्रस्वो वा स्यात्। बहुमालाकः। बहुमालकः। कवभावे बहुमालः॥ न संज्ञायां। ५।४।१५५। शेषादिति प्राप्तः कप् न स्यात्संज्ञायां। विश्वेदे
वा यस्य। विश्वदेवकः॥
र्कवृदित्यप्रत्ययस्य समासांतः उपबहव इति। संख्ययाव्ययेत्यादिना समासः। उत्तरपूर्वेति। दिङ्नामेत्यादिना समासः। सपुत्र इति।
द्वितीयादिना समासः॥ अर्थभावः। शेषो बहुव्रीहिरित्यतः शेषपदमनेकमन्यपदार्थ इत्येतस्मिन् सूत्रेऽनुवर्तते संख्ययाव्ययासन्नेत्यादिषु च निवर्तते। तथा
धिकारस्थत्वाभावादुपबहव इत्यादिषु कप्प्रसंगो नेति। एवं चानेकमन्यपदार्थ इति सूत्रान्वयस्य संख्ययाव्ययासन्नेत्यादीनामारंभः कथमाचार्यमत्याव
तिष्ठते। ननु सकृदुच्चरितस्य शेषशब्दस्यानुक्तसमासांतपरत्वं शेषाधिकारस्थपरत्वं च कथमित्यत आह तंत्रादिनेति। अर्थभेदेन शब्दभेदः सत्यप्यर्थ
स्याभेद इति मतद्वयं। आद्ये आह तंत्रेति। द्वितीये तंत्रमिति विवेकः। पद्यवदनिग्रातिपदीकास्मात्सासान्ताः स्वविपर्ययवाधका भवंति तत्किमनुक्तसमासांतपरे
णशेषग्रहणेनेति तन्न। अजकृदित्यादीनां समासांतरैश्च विनार्थतया प्रियपथ इत्यादौ परेणाकपावाधापत्तेः॥

ऽव्ययनित्यो वैकल्पिकश्च कप् सर्वोऽपि निषिध्यते। बहुश्रेयसीति। अतिशयेन प्रशस्यः। श्रेयान्। द्विवचनविभज्येतीयसुन्। प्रशस्यस्य श्रः। शेषाद्विभाषेति कः।
। बहुश्रेयसीति नपुंसकमित्येतिनित्यं प्राप्तः कप्लिङ्गविशिष्टपरिभाषया ईयसश्चेति प्रतिषिध्यते। बहुनाडिरिति। उपसर्जनह्रस्वः। स्त्रीप्रत्ययान्तत्वाभावादिति भावः।
ऽसतेन निष्पन्नस्त्रीप्रत्ययस्य स्त्रियामित्यधिकारे विहितत्वादिति भावः। सप्तमीविशेषणे बहुव्रीहाविति रक्षीतिज्ञापनेन तस्य विशेषणानां कामचारेण निवेदं सप्तमीप्र
स्वदात्तेन विनापि विशेषणत्वादेव सिद्धं चित्रगुरिति। न चोपसर्जनं पूर्वमित्येवेदं सिध्यतीति वाच्यं। बहुव्रीहौ सप्तमीत्युक्तेन कण्ठोक्तिन्यायेनोपसर्जन।

ईयसश्च। ५।४।१५६। ईयसन्तोत्तरपदान्न कप्। बहवः श्रेयांसोऽस्य बहुश्रेयान्। गोस्त्रियोरिति ह्रस्वत्वे प्राप्ते। ईयसो बहुव्रीहेर्नेति वाच्यं। बह्व्यः श्रे
योऽस्य बहुश्रेयसी। बहुव्रीहेः किं। अतिश्रेयसिः। वन्दिते भ्रातुः। ५।४।१५७। पूजितार्थे यो भ्रातृशब्दस्तदन्तान्न कप् स्यात्। प्रशस्तो भ्राता य
स्य। प्रशस्त भ्राता सुभ्राता। न पूजनादिति निषेधस्तु बहुव्रीहौ सक्थ्यक्ष्णोरित्यतः प्रागेवेति वक्ष्यते। वन्दिते किं। मूर्खभ्रातृकः। नाडीतन्त्र्योः
स्वाङ्गे। ५।४।१५९। स्वाङ्गे यौ नाडीतन्त्रीशब्दौ तदन्तात्कप् न स्यात्। बहुनाडिः कायः। बहुतन्त्रीर्ग्रीवा। तन्त्री धमनी। स्त्रीप्रत्ययान्तत्वाभावाद्ध्र
स्वः। स्वाङ्गे किं। बहुनाडीकः स्तम्भः। बहुतन्त्रीका वीणा। निष्प्रवाणिश्च। ५।४।१६०। कबभावोऽत्र निपात्यते। प्रपूर्वाद्वयतेर्ल्युट्। प्रवाणी तन्तु
वायशलाका। निर्गता प्रवाण्यस्य निष्प्रवाणिः पटः। समाप्तवानो नव इत्यर्थः। सप्तमीविशेषणे बहुव्रीहौ। २।२।३५। सप्तम्यन्तं विशेषणं च बहुव्री
हौ पूर्वं प्रयोज्यं। कण्ठेकालः। अत एव ज्ञापकाद्व्यधिकरणपदो बहुव्रीहिः। चित्रगुः। सर्वनामसंख्ययोरुपसंख्यानं। सर्वश्वेतः। द्विशुक्लः। मिथोऽनयोस्स
मासे संख्यापूर्वं शब्दपरत्वादपि प्रतिषेधात्। द्व्यन्यः। संख्याया॥ ९ पूर्वनस्य बाधापत्तेरतो विशेषणग्रहणं कृतं। सर्वनामेति। कथं तर्हि नः परो यस्मात्स तत्परः
न जहत्स्वार्था वृत्तिरिति। द्वहद्विजहत्स्वं पदं यस्य सः जहत्स्वः सोऽर्थो यस्यामिति बहुव्रीहिगर्भो बहुव्रीहिस्तथा च सर्वपरशब्दयोः सर्वनामत्वात्पूर्वनिपातेन भाव्य
मिति चेत् सूत्रभाष्यप्रयोगात्सर्वपरशब्दयोर्न पूर्वनिपातः राजदन्तादित्वाद्वा सिद्धमिति। द्विशुक्ल इति। यद्यपि सर्वनामत्वेन बहुशब्दस्य पूर्वनिपातत्वं सिद्ध
ं तथापि त्रिशुक्ल इत्यादिसिद्धये चास्तु संख्याग्रहणं कृतं। ननु संख्यायास्सर्वनामत्वाभावेन संख्यासर्वनाम्नोरिति वाच्ये विपरीतोच्चारणमयुक्तमित्याशंक्याह। मि

रिति। अल्पार्थे चानिकायादित्यर्थः। गड्वादेरिति। अथादिशब्दः प्रकारवाचीतेन पद्मं नाभौ यस्य पद्मनाभः ऊर्णा नाभौ यस्य ऊर्णानाभ इति। दुस्तः ऊर्णनाभ इ
दः। जातिकालेति। एतच्च जातिकालसुखादिभ्योनाच्छादनादित्यनेन ज्ञापितमिति भावः। सारंगी जग्धोपचारः। अस्तांग पूर्वपरादिति ङीषन्तकथनं हि चारु
हसित इत्यादि। अत्राङ्गः। नपुंसके भावे क्तः स्य न पूर्वनिपातः। निष्ठाशब्देन विहितस्यैवेह ग्रहणादिति। क्वचिन्नेति। आहिताग्न्यादित्वकल्पनाइत्यभि-
वः। इति बहुव्रीहिः। चार्थे द्वंद्वः। अनेकमन्यपदार्थे इत्यतो नेकमित्यनुवर्तते सुवामन्त्रित इत्यस्मात्सुबपि। समास इति विभाषेति चाधिक्रिय।
स्याः। द्विजाः। द्वंद्वे। पितृस्त्रस्य वा प्रियस्य। गुडप्रियः। प्रियगुडः। गड्वादेः। परा सप्तमी। गडुकण्ठः। क्वचिन्न। वहेगडुः। निष्ठा। २।२।३६। निष्ठा
यो हीपूर्वं स्यात्। कृतकृत्यः। जातिकालसुखादिभ्यः परा निष्ठा वाच्या। सारङ्गजग्धी। मासजाता। सुखजाता। प्रायिकं चेदं। कृतकटः।
ः। वाहिताग्न्यादिषु। २।२।३७। आहिताग्न्यादिः। अग्न्याहितः। आकृतिगणोयं। प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ। अस्युद्यतः। दण्डपाणिः।
विद्यतासिः। इति बहुव्रीहिः। चार्थे द्वन्द्वः। २।२।२९। अनेकं सुबन्तं चार्थे वर्तमानं वा समस्यते स द्वंद्वः। समुच्चयान्वाचयेतरेतरयोगस-
मार्थाः। परस्परनिरपेक्षस्यानेकस्यैकस्मिन्नन्वयः समुच्चयः। अन्यतरस्यानुषङ्गिकत्वेनान्वयोऽन्वाचयः। मिलितानामन्वय इतरेतर-
योगः। समूहः समाहारः। तत्रेश्वरं गुरुं च भजस्वेति समुच्चये। भिक्षामट गां चानयेत्यन्वाचये च न समासोऽसामर्थ्यात्॥ धवखदिरौ। संज्ञा-
मा। अनेकोक्तेः। होतृपोतृनेष्टोद्गातारः। द्वयोर्द्वयोर्द्वंद्वं कृत्वा पुनर्द्वंद्वे तु होतापोतानेष्टोद्गातारः॥ ८८ तस्यवत्तवाह- अनेकं सुबंतमित्यादि। चार्थो
यो त्यादित्यर्थः। एकस्मिन्निति। भजनादावित्यर्थः। ईश्वरं गुरुं च भजस्वेति। भिक्षायां द्रव्ययोः समुच्चयोयं। तथा राज्ञो गजश्चाश्वश्चेति द्रव्ययोर्द्रव्ययोः स-
कोरकश्चेति द्रव्यगुणयोः। रक्तः पटः शुक्लश्चेति गुणद्रव्ययोरित्यर्थः। भिक्षामट गां चानयेति। अत्र अदृष्टार्थं नामनानयनपि भिक्षामटनस्येव नटस्तु भि-
ति। तथा अटनं विनानिष्पन्नमानयनं तो भिक्षाटनस्येन प्राधान्यं गवानयनस्य त्वानुषंगिकता। असामर्थ्यादिति। एकार्थीभावाभावादित्यर्थः। त-
हि घटकपदानां कर्मधारयेभावेणैव द्वंद्वघटकपदानां चार्थीभावेनैकार्थीभाव आवश्यकः समर्थः पदविधिरिति परिभाषितत्वात् चार्थे द्वंद्वइ-

णामेकार्थीभावः संभवति। येन समुच्चयान्वाचययोरेकार्थीभावात्तर्ह्येतौ स्यातां। ननु चेतरेतरयोगे समाहारे च परस्परसाहित्यसत्त्वात्समासोऽभवतिनतु।
न्वाचययोः परं त्वितरेतरयोगे साहित्यं विशेषणं द्रव्यं तु विशेष्यं समाहारे तु साहित्यं प्रधानं द्रव्यं विशेषणमिति विवेक्तव्यं। ननु नीलोत्पलमित्यादौ चशब्दान
विग्रहदर्शनादेकार्थीभावस्यात्वद्वंद्वे द्वौ वीरः सामान्येन विशेषणविशेष्ययोरिति सामानाधिकरण्ये विहितस्तत्पुरुषः स्यात्। द्वंद्वसंज्ञाया बाधनस्याद्
धिकरण्ये सावकाशत्वात्। सामानाधिकरण्याभावविवक्षायां तु प्रमाणप्रमेयेत्यादाविव नीलोत्पलादावपि द्वंद्वे स्यादिति चेत्। होतृपोत्रिति। ऋ
त्वाभावादनयोरानङ्॥ ॥ राजदन्तादिषु। इह द्वंद्वतत्पुरुषयोः पाठेऽप्यर्थधर्मावित्याद्यभिप्रायेणास्य द्वंद्वे स्वपन्यासः। द्वंद्वे घि। अनेकमिति सर्वे

दन्तादिषु परं। २।२।३१। एषु पूर्वप्रयोगार्हं परं स्यात्। दन्तानां राजा। राजदन्तः। धर्मादिष्वनियमः। अर्थधर्मौ। धर्मार्थौ। दम्पती। जम्प
ायापती। जायाशब्दस्य जम्भावो दम्भावश्च वा निपात्यते। आकृतिगणोऽयं। द्वन्द्वे घि। २।२।३२। द्वन्द्वे घिसंज्ञं पूर्वं स्यात्। हरिश्च हरश्च हरि
अनेकप्राप्तावेकत्र नियमोऽनियमश्शेषे। हरिगुरुहराः। हरिहरगुरवः। अजाद्यदन्तं। २।२।३३। इदं द्वन्द्वे पूर्वं स्यात्। ईशकृष्णौ। बहुष्व
मः। अश्वरथेन्द्राः। इन्द्राश्वरथाः। घ्यन्तादजाद्यदन्तं विप्रतिषेधेन। इन्द्राग्नी। अल्पाच्तरं। २।२।३४। शिवकेशवौ। ऋतुनक्षत्राणां समाक्ष
ानुपूर्व्येण। हेमन्तशिशिरवसन्ताः। कृत्तिकारोहिण्यौ। समाक्षराणां किं। ग्रीष्मवसन्तौ। लघ्वक्षरं पूर्वं। कुशकाशं। अभ्यर्हितञ्च। ता।
र्वतौ। वर्णानामानुपूर्व्येण। ब्राह्मणक्षत्रियविट्शूद्राः। भ्रातुर्ज्यायसः। युधिष्ठिरार्जुनौ॥ ॥ प्रामेव प्रथमानिर्दिष्टत्वेनोपसर्जनत्वाद्विशेषाद्

भावेऽयमारंभः। यत्र त्वनेकघ्यन्तं तत्र द्वयोरपि पूर्वनिपातनियमः स्यादत आह अनेकप्राप्तावेकत्रेति। अत्र व्याचख्युः। आकृतौ पदार्थे समुदायस्य लक्ष्य
र्नत्वेन प्रतिलक्ष्यमावृत्त्या। तत्रैकस्य पूर्वनिपाते सति जातौ लक्षणं प्रवृत्तमेवेति न पुनः प्रवर्तते व्यक्तिपक्षाश्रित्य तु नाश्रीयते न स्यात्तु शोभादिति। हरिहर
ौ। हरगुरुशब्दयोः नैनियमः प्रवर्तत इति भावः। अजाद्यदंते। समुद्राभ्राद्घः इत्यत्र हेत्वोः किं पापादित्यादिनिर्देशादनित्यमिदं प्रकरणं। तेन समीक्षवी
पश्यालिनीमिति मारविप्रयोगस्संगच्छते। अल्पाच्तरं। अन्तरस्य निपातनात् स्वार्थे तरपकुत्वचुत्वयोरभावश्च। यदितु प्रकर्षे तरप्स्यात्तदा द्वयोरेव नि

यो विधानात्। नतस्य च खदिरपलाशादिन्यायेन बहुत्वनियमो न स्यात्। ऋतुनक्षत्राणामिति। ऋतूनामानुपूर्व्यं प्रादुर्भावकृतं नक्षत्राणां तु दृष्टकृतं।
तं च। वासुदेवार्जुनाभ्यां वुनिति निर्देशेन संज्ञाप्यनरतिचतुर्थ्यै भाव्यं। अल्पाच्तरमजाद्यदंतमिति सूत्राभ्यामर्जुनस्य पूर्वनिपाते प्राप्ते तमकुर्वन् ज्ञाप
यतोऽभ्यर्हितं पूर्वमिति तत्रैव वक्ष्यते स्थाने। युधिष्ठिरार्जुनाविति। इंद्रपुत्रत्वाद्धि ज्योरंशत्वाच्चार्जुनस्याप्यभ्यर्हितत्वम् अर्जुनस्य पूर्वनिपातो न सिध्य
वः॥ ५॥ द्वंद्वश्च प्राणि। प्राणितूर्यसेनानामंगानीति बहुवचनांतेन नागशब्देन षष्ठीसमासः। अंगशब्दस्य प्रत्येकमन्वय इति। तेन प्राण्यंगानां प्राण्यंगै
णानां तूर्यांगैरेव सेनांगानां सेनांगैरेव यो द्वंद्वः स एकवद्भवति न तु व्यतिकरेणेति नेह। मार्दंगिकाश्वारोहौ। अत्र प्राणिसेनयोरंगे नाभावयनः तूर्य
द्वंद्वश्च प्राणितूर्यसेनांगानाम्। २।४।२। एषां द्वंद्व एकवत्स्यात्। पाणिपादं। मार्दंगिकपाणविकं। रथिकाश्वारोहं। समाहारस्यैकत्वादे
सिद्धे नियमार्थमिदं प्रकरणं। प्राण्यंगादीनां समाहार एव यथा स्यात्। अनुवादे चरणानाम्। २।४।३। चरणानां द्वंद्व एकवत्स्यात् सिद्धस्योपन्यासे।
णोर्लुङीति वक्तव्यं। उदगात्कठकालापं। प्रत्यष्ठात्कठकौथुमं। अध्वर्युक्रतुरनपुंसकम्। २।४।४। यजुर्वेदे विहितो यः क्रतुस्तद्वाचिनाम
सकलिंगानां द्वंद्व एकवत्स्यात्। अर्काश्वमेधं। अध्वर्युक्रतुः किं इषुवज्रौ। सामवेदे विहितो अनपुंसकं किं। राजसूयवाजपेयौ। अर्द्ध
र्च अध्ययनतोऽविप्रकृष्टाख्यानाम्। २।४।५। अध्ययनेन प्रत्यासन्ना आख्या येषां तेषां द्वंद्व एकवत्। पदकक्रमकं॥ स्वलंगेनामेपकारकं
यो द्वंद्व इति। प्राण्यंगानां द्वंद्वस्तूर्यांगानां द्वंद्वः सेनांगानां द्वंद्व इत्यर्थः। द्विगुरेकवचनमित्यत एकवचनं वर्तते। तत्रैकं चेत्कीति सूत्रस्थाप्येकवचनविशिष्टः समाहारः
स्तत्वनिपातकः साहित्यार्थमन्योन्यः फलितमाह एकवत्स्यादिति। पाणिपादमिति। यद्यप्यत्र जातिरप्राणिनामित्येन सिद्धं तथापि द्रव्यमात्रान्यापि भवतीति
प्रहरणमित्येके॥ पाणिपणवाविति नित्यमिति करे मा भूदिति नियमार्थं वचनमित्यन्ये। मार्दंगिकेति। मृदंगवादनं शिल्पमस्येत्यर्थे शिल्पमिति ठक्। अस्ववं पाणा
स्यपि रथिकाश्वारोहमिति रथेन चरंतीति रथिकाः पर्पादिभ्यः ष्ठन्निति ष्ठन्। तेनाश्वारोहास्तेषां समाहारः। ननु वार्थद्वंद्वे समाहारेऽनेन समाहारे द्वंद्वस्य
णैकत्वादेकवचनमपि सिद्धमिति किमनेनेत्याशंक्याह नियमार्थमिति। समाहार एवेति। समाहारे प्राण्यंगादीनामेवेति विपरीतनियमोऽत्र न भवति

स्याद्विवचनं माभूदिति कृतमन्यथा नित्यं पुनर्वसुरिति न स्यादिति। एवं च द्वंद्वस्य माणि। तु यैर्नियमकरणाद्बहिर्भूतानामपि समाहारद्वंद्वो भवत्येव तेन सर्वो द्वंद्वो विभाषैक-
ने पक्ष्यमाणेन पूर्ववचनमिति तत्त्वेयं। चरणानामिति। चरणशब्देन तद्वाचिनामित्यर्थः। स्थेणोरिति। छागतिनिवृत्तौ। इण्गतौ। स्थाप्रकृतिक इण्प्रकृतिकलुङ् नेउ
त्यर्थः। स्थेणोः किं। अभूवन् कठकालापाः। लुङि किं। तिष्ठन्तु कठकालापाः। उदगादिति। द्वन्द्व यदा कठेषु कालापेषु च प्रतिष्ठितेषु रितेषु वा वाभ्यां पन्त्र गन्तव्यमिति
त्वात नन्तं केनं विस्मृत्याशीनं प्रतीदमुच्यते। कठेन प्रोक्तमधीयते कठाः। वैशंपायनान्तेवासित्वाणिनिस्तस्य कठचरकाल्लुगिति लुक्। अध्येतृषु प्रोक्ताल्लुगिति
रप्राणिनाम् ।२।४।६। प्राणिवर्ज्यजातिवाचिनां द्वन्द्व एकवत्। धानाशष्कुलि। प्राणिनां तु विट्शूद्राः। द्रव्यजातीनामेवेह। रूपरसौ। गम-
कुञ्चने। जातिप्राधान्य एवायमेकवद्भावः। द्रव्यविशेषविवक्षायां तु बदरामलकानि। विशिष्टलिङ्गो नदीदेशोऽग्रामाः ।२।४।७। ग्रामवर्जनदी-
वाचिनां भिन्नलिङ्गानां समाहारे द्वन्द्वः स्यात्। उद्ध्यश्च इरावती च। उद्ध्येरावति। गङ्गा च शोणश्च। गङ्गाशोणं। कुरवश्च कुरुक्षेत्रं च कु-
रुकुरुक्षेत्रमित्त्र भिन्नलिङ्गानां किं। गङ्गायमुने। मद्रकेकयाः। अग्रामाः किं। जाम्बवं नगरं शालूकिनी ग्रामः। जाम्बवशालूकिन्यौ। क्षुद्रजन्तवः।
।२।४।८। एषां समाहारे द्वन्द्वः स्यात्। यूकालिक्षं। आनकुलात् क्षुद्रजन्तवः। येषां च विरोधः शाश्वतिकः ।२।४।९। एषां प्राग्वत्। अहिनकुलं। गोव्या-
घ्रं काकोलूकमित्यादि। परत्वाद्विभाषा वृक्षमृगेति प्राप्ता चकारेण बाध्यते। शूद्राणामनिरवसितानाम् ।२।४।१०। अबहिष्कृतानां शूद्राणां प्राग्
वत्। तक्षायस्कारं। पात्राद्बहिष्कृतानां तु। चाण्डालमृतपाः॥ ९९। लुक्। कलापिनोऽण। सब्रह्मचारिभ्यामुपसंख्यानाद्विलोपः। यजुरिति। सूत्रेऽध्व-
र्युर्वेदलक्षकः इति भावः। पदकेति। पदान्यधीते पदकः। क्रमादिभ्यो वुन्। एवं क्रमकोऽपि। पदान्यधीत्य क्रमोऽध्येतव्य इति सम्प्रदायप्रसक्तिः॥ अध्ययनतः
ष्टाख्यानाम्। अविप्रकृष्टेति किं। याज्ञिकवैयाकरणौ॥ ७०॥ जातिरप्रा। जातिवाच्यवयवकद्वन्द्वोऽप्राणिनामिति लुप्यवचनेन दृश्यते येनाह। जातिवाचिनामिति। विद् शूद्राद-
जातिप्राधान्येऽपि बहुवचनमुपपद्यते। जात्याख्यायामेकस्मिन्निति विधानात् तेनात्र प्रसंगविकल्पेनेति भावः। द्रव्यजातीनामेवेति। अप्राणिनामिति पर्युदा-
साश्रयणे न्यायेन द्रव्यजातीनामेकवद्भावो न तु गुणक्रियाजातीयानामिति भावः। जातिः किं। नंदकपांचजन्यौ। संज्ञाशब्दावेतौ। जातिप्राधान्य एवेति॥ ९

ऽग्रहणात्त्वस्य मन्यथापर्युदासेनैव जात्युपसर्जनद्रव्यवाचिनोऽपि ग्रहणोपपत्तौ किं तेनेति भावः। द्रव्यविशेषेति। नन्वेवं रंजितानुविविधालरुशैलादिभारविप्र
द्धत एवेति किंचिति नरूसहिताः शैलादिति मनोरमायां समर्थितमिति चेदत्राहुः। सकलानरुशैलत्वं तन्नं गत्रविरुषितं तनुकेषांचिन्न रुशैलविशेष्यत्वमिति
आन्यादेकवद्भावमारंकरानयोक्तमिति। बदरामलकानीति। फलेत्तु मितितु कृत्तु कद्दितत्तुकीति श्वी प्रन्यपत्सापितु किंफलत्वजात्युपसर्जनद्रव्यवचनात्वेनो
स्मृगेतिसूत्रे बदराणि चामलकानि च बदरामलकं जातिरप्राणिनामिति मेकवद्भावः रतिनवस्तनितानुनानेन ग्रंथेन विरुध्यते। फलत्वजातिवाचिनां चद्वन्द्व
ना मेव द्वंद्व एकवद्भवतिनानेकत्र च नानानां द्वंद्व इति फलमेनावनस्यतीति वार्त्तिकोक्तनियममनुपन्यस्तत्त्वदत्ते। विशिष्टलिंगो नदीदेशोऽग्रामाः। पिशब्दप्रव।
णावयविति द्वंद्वेवर्त्तेनतरन्याशयेनाह। ग्रामेत्यादि। इहन शीवाचिनां द्वंद्वः देशवाचिनां द्वंद्व इति वाक्यभेदेन व्याख्येयं तेन गंगाकुरुक्षेत्रे इत्यत्र।
। देशग्रहणेनात्र प्रसिद्धएवजनपदो गृह्यते। नद्याः पृथग् ग्रहणात्तेन पर्वतानां न कैलासश्च गंधमादनं च कैलासगंधमादने। नदीदेशद्वंद्वेनिकुं।
र्यौ। विशिष्ट इदंस्यार्थमाह भिन्नलिंगानामिति विपूर्वो हि शिष्टिर्भेदार्थः। अतएवविशेषणं विशेष्येणेति सूत्रे भेदकं भेद्येनेति व्याख्यातं समाहार।
दिति निष्कर्षोऽभिप्रायेणोयमुक्तिः यथाश्रुताभिप्रायेणातु द्वंद्व एकवत्स्यादिति केषुचिन्न स्तेषु व्याख्यायते इति ज्ञेयं। उध्यश्चैरावतीति। उध्यो नदः सोऽपि
एवत्नान्नदीशब्देन गृहीतः एवं शोणोऽपि। अग्रामा इत्यत्र नगरप्रतिषेधो वक्तव्यः सेन मथुरापाटलिपुत्रं इत्यत्र निषेधो न भवति उभयोरपि नग।
क्षुद्र अपचितपरिमाणत्वं क्षुद्रत्वं। तच्चापेक्षिकत्वादनवस्थितं। पक्ष्यस्पर्धते। क्षुद्रजंतुरनस्थिः स्यादथवा क्षुद्र एव यः शतं वा प्रसृतौ येषां केचि
नादपाति। तत्र सर्वपक्षसाधारणोऽयं नोदाहरति। यूकालिक्षमिति। आनकुलादिति। नकुलपर्यंता इत्यर्थः। येषां चाविरोधः। विरोधो वैरं तत्र सहानव।
स्थानेऽहन। छायानपौराश्वदित्यव्ययं त्रैकाल्येवर्त्तेते तत्र भवः शाश्वतिकः कालान्तरं। अत एव निपातनादिति सूत्रोक्तानादिति कादेशो अव्ययानां भमा
त्रे टिलोपश्च। शाश्वतिकः किं। देवासुरैरमृतमंबुनिधिर्ममंथे। तेषां ह्यमनादिमयुक्तः। कादाचित्को विरोधो न तु नित्यः। मंथनप्रवृत्तिकाले तदभावरहात्। परा
त्वादिति। पशुशकुनिद्वंद्वस्यावकाशो गोमहिषं गोमहिषाः हंसचक्रवाकं हंसचक्रं॥

षयं चेत्यस्यावकाशः मार्जारमूषकं। श्रमणब्राह्मणमित्यादौ शेषः। चकारेण बाध्यत इति। चकारः पुनर्विधायक इति भावः। शूद्राणां। त्रैवर्णिकेतरमनुष्यपरः। शूद्र
तु शूद्रत्वजातिपरः। अनिरवसितानामिति निषेधात् पात्रादिति। यैर्भुक्ते भस्मना शुध्यते कांस्यमित्यादिस्मृत्युक्तसंस्कारेणापि पात्रं न शुध्यति ते पामिति स्पृश्याः॥ ॐ॥
ायपौष्कारिकानीतिगणपाठे पाणिनिनापपाठितानि तथैव साधूनीत्यर्थः तेनावङः पाक्षिकत्वाद्यदानावङ्कृतदा उत्तरसूत्रेण विकल्पो न भवति गोऽश्व
ौवा अन्येभ्यः पशुभ्यो गोऽश्वाः। गवाश्वमिति। रहपशुद्वन्द्वविभाषाप्राप्ता। दासीदासमिति। अत्र पुमान् स्त्रियेत्येकशेषो बाध्यते विभाषा। विशेषाणामेवेति।
ाः श्वप्रभृतीनि च। २।४।११। यथोच्चारितानि साधूनि स्युः। गवाश्वं। दासीदासमित्यादि। विभाषा वृक्षमृगतृणधान्यव्यञ्जनपशुशकुन्यश्ववडव
पूर्वापराधरोत्तराणाम्। २।४।१२। वृक्षादीनां सप्तानां द्वन्द्वः अश्ववडवेत्यादिद्वन्द्वत्रयं च प्राग्वद्वृक्षादौ विशेषाणामेव ग्रहणं। प्लक्षन्यग्रोधं। प्ल
क्षन्यग्रोधाः। रुरुपृषतं। रुरुपृषताः। कुशकाशं। कुशकाशाः। व्रीहियवं। व्रीहियवाः। दधिघृतं। दधिघृते। गोमहिषं। गोमहिषाः। शुकबकाः।
अश्ववडवं। अश्ववडवौ। पूर्वापरं। पूर्वापरौ। अधरोत्तरं। अधरोत्तरे। फलसेनावनस्पतिमृगशकुनिक्षुद्रजन्तुधान्यतृणानां बहुप्रकृति
रेव द्वन्द्व एकवदिति वाच्यं। बदराणि चामलकानि च। बदरामलकं। जातिरप्राणिनामित्येकवद्भावो नेह। बदरामलके। रथिकाश्वारो
। प्लक्षन्यग्रोधौ। इत्यादि। विभाषावृक्षेति सूत्रे येषां प्राणिनस्तेषां ग्रहणम्। जातिरप्राणिनामिति नित्यप्राप्ते विकल्पार्थं। पशुग्रहणं हस्त्यश्वादि
सेनाङ्गत्वान्नित्ये प्राप्ते। मृगाणां मृगैरेव शकुनीनां शकुनिभिरेव यत्र द्वन्द्वः अन्येषु सहेतरेतरयोग एवेति नियमार्थं मृगशकुनिग्रहणं। एवं पूर्वापरम
धरोत्तरमित्यपि। अश्ववडवग्रहणात्तु पक्षे नपुंसकत्वार्थं। अन्यथा परत्वात्पूर्ववदश्ववडवाविति स्यात्॥ १९ अयं भावः। वृक्षादिशब्दैः प्रत्येकं द्वन्द्वो विशेष्य
ो वृक्षशब्दो द्वन्द्वः। न च द्वयोः सहप्रयोगः सरूपाणामित्येकशेषात्। नापि पर्यायाणां विरूपाणामपि समानार्थानामित्येकशेषात्। नापि वृक्षधवश्चेत्यादि स
शेषयोः अनभिधानात्तत्र द्वन्द्वस्यैवाभावादिति। सर्वप्रकरणशेषत्वान्नियममाह। फलसेनेत्यादि। फलसेनादीनां द्वन्द्वो विभाषावृक्षमृगेत्यनेन लक्षणान्तरेणावार
कवद्वचनं बहुप्रकृतिरेव एकवद्भवतीत्यर्थः बहुत्वं च निपरार्थो बहुवचनान्तता वा प्रकृतिः कारणं॥

द्रप्रकृतिः। बदराणि चामलकानि चेति। जात्याख्यायामेकस्मिन्निति विकल्पितं बहुवचनं। बदरामलकेइति। जातिप्राधान्ये एकवचनं न योद्वंद्व इति नास्यैकवद्भावः इति
ग्रहणमिति। विकल्पार्थमित्यनुवर्त्यते। वार्थे द्वंद्व इत्यनेनैव सिद्धे मृगशकुनिग्रहणं प्रतिपदविधानार्थं तेनास्य बहुवचमित्येकवद्भावपक्षे पूर्ववदप्यचतुर्णाविनेनत ह्यधिना
द्विमित्येतदेव भवति सूत्रमिति च्छत्रं न ह्येकवद्भावभाजं परामृश्यते विधीयमानेन नपुंसकत्वं एकवद्भाववदेव मनिपरविहितं भवति न त्वावप्रतिपदोक्तः स्वच्छी यस्याश्च पुंसक
इति॥ ७॥ विप्रतिषिद्धं। अधिकरणमिह द्रव्यं। चकारो विभाषानुकर्षणार्थः स्तेन द्या चष्टे विरुद्धार्थानामित्यादि उदाहरणं तु शीतोष्णं शीतोष्णे सुखदुःखं सुखदुःखे इत्यादि
महानवस्यानन्त्रसराः भवन्त्येवेति। विप्रतिषिद्धग्रहणाभावे तु सत्र न स्यात्। अद्रव्यवाचिनामेवेति नियमादिति भावः। अनधिकरणवाचीति किं। शीतोष्णे उदके स्तः इह
तिषिद्धञ्चानधिकरणवाचि। २।४।१३। विरुद्धार्थानामद्रव्यवाचिनां द्वंद्व एकवद्वा स्यात्। शीतोष्णं। शीतोष्णे। विकल्पिकसमाहारद्वंद्वस्यार्थ इति
प्राप्तः। स विरुद्धार्थानां यदि भवति तर्हि अद्रव्यवाचिनामेवेति नियमार्थमिदं। तेन द्रव्यवाचिनामितरेतरयोग एव शीतोष्णे उदके स्तः। विप्रति-
षिद्धं- नरकपाल्यूजन्यं नरकपाल्यूजन्यौ इह पाक्षिकः समाहारद्वंद्वो भवत्येव। न दधिपयआदीनि। २।४।१४। एतानि नैकवत्स्युः दधिपयसी। इध्माब-
र्ही। निपातनाद्दीर्घः। ऋक्सामे। वाङ्मनसे। अधिकरणैतावत्त्वे च। २।४।१५। द्रव्यसंख्यावगमे एकवदेवेति नियमो न स्यात्। दश दन्तोष्ठाः। वि-
भाषा समीपे। २।४।१६। अधिकरणैतावत्त्वस्य सामीप्येन परिच्छेदे समाहार एवेत्येवंरूपो नियमो वा स्यात्। उपदशं दन्तोष्ठं। उपदशाः। दन्तोष्ठाः॥ ६

समाहारद्वंद्वोऽपि स्यादिति दिक् न दधिपय। दधिपयसी इति। व्यंजनत्वादिके कल्पः प्राप्तः। एवं मधुसर्पिषी। सर्पिर्मधुनी इत्यत्रापि बोध्यः इह बहुप्रतापि
विश्व चरणा विन्यादी समाहारद्वंद्वनिषेधमुखेनेतरेतरयोगद्वंद्वोऽनेन व्यवस्थाप्यते तेन त्साहचर्याद्दधिपयसी इत्यादावपि तथैव। तेन तत्र व्यंजनत्वप्र-
युक्तस्ये निषिद्धेऽपि जातिलक्षणो नित्यमेकवद्भावोऽस्त्विति न शंकनीयं। किंच नेह लक्षणविशेषस्याग्रहः। एतानि नैकवत्स्युरित्येकवद्भावमात्रस्य निषेधात्। यथा।
दिभ्यश्चल्पचइधप्रवापोरुभयोरपि निषेधसिद्धये स्त्रियां युक्तं चेति सामान्यतो निषिध्यत इति दिक्। ऋक्सामे वाङ्मनसे इति। अचतुरेत्यादिना ऽच समासां-
तो च निपात्यते। अधिकरणे। समासार्थस्याश्रयोऽधिकरणं वर्त्तिपदार्थसंख्यैतावत्त्वं परिमाणं॥

मस्तस्मिन्नाम्यमानेदृतिव्याचष्टे। द्रव्यसंख्यावगमे द्वन्द्वनियमो न स्यादिति न चेह प्राप्यं गन्त्वा न्यायप्रसैकवद्भावेति नियमस्य प्रतिषेधेपि चार्थे द्वन्द्व इति समाहारद्वन्द्वस्य
न्यं। सविशेषणानां हि नैतन्स्याभ्युपगमेन समाहारद्वन्द्वस्य माप्रभावान्न लोकन्यायेनेतरेतरयोगद्वन्द्वोपि न स्यादिति वाच्यं। सामान्याप्रयोग इति लिङ्गात्प्रधानस्य सापेक्षत्वे
भ्युपगमात्। दभ्युपगमात्। न तु कंहि भाष्ये। भवति वै प्रधानस्य सापेक्षस्यापि वृत्तिरिति। स्यादेतत्। समाहारद्वन्द्वस्यात्र माप्रभावे द्वन्द्वश्च प्राणितूर्यसेति नियमात्प्रत्याहरतरेत
ऽनियोपपदवेति सूत्रमिदमकिञ्चित्करमिति चेदत्राह। नियमसूत्राणां निषेधमुखेन प्रवृत्तिरिति पक्षे द्वन्द्वश्च प्राणितूर्यसेति सूत्रं केवलमितरेतरयोगद्वन्द्वनिषेधपरं। तथा
गनिषेधस्य निषेधपहारादितरेतरयोगद्वन्द्वमापद्यार्थमिदमिति। एवं च निषेधमुखप्रवृत्तिपक्षस्य ज्ञापनार्थमिति निष्फलितमिति दिक्। विभाषासमीपे द्वन्द्वयोपीह समाहारद्व
मास्थानेपि न क्षतिस्तथापि पूर्वसूत्रे नियमनिषेधस्यौकमात्रस्तु दोषेणाह। नियमो वा स्यादिति। उपदर्शं दन्तोष्ठमिति। एकवद्भावपक्षे त्वव्ययीभावस्यैवानुप्रयोगः। पदि
हि सत्राउपदर्शस्यदन्तोष्ठस्येति यद्वौ स्यादुपदर्शं दन्तोष्ठस्येमे वेष्यत इत्याकरः। दन्तोष्ठस्य दर्शनमित्यभिप्रायेणाप च्छंक्रिनायामपितुपा। दशरात्रस्ये यद्वीनेष्यते स्वनोवह

नङ् ऋतो द्वन्द्वे॥६।३।२५॥ विद्यायोनिसम्बन्धवाचिनामृदन्तानां द्वन्द्वे आनङ् स्यादुत्तरपदे परे। होतापोतारौ। होतृपोतृनेष्टोद्गातारः। मातापितरौ।
पुत्रेऽन्यतरस्यामित्यतो मण्डूकप्लुत्या पुत्रग्रहणमनुवर्तते॥ वीहैर्गीनुप्रयोगः किं न व्ययीभावस्यैवेति न दाशयः॥६॥ आनङृतो द्वन्द्व इति सूत्रं तं जाता वे कुवचने।
योनिसंबंधेभ्य इति त्वनुवर्तनेन तत्राप च्यादिपरिगण्यतेन तदाह विद्यायोनिसंबंधवाचिनामिति। ननु ऋत इत्यनुवर्तनादेव सिद्धे किमनेन ऋतो ग्रहणेन। अत्राह। अ
यमाणं द्वन्द्वविशेषणं। अनुवृत्तं तूत्तरपदे परतो यत्पूर्वं तस्य विशेषणं पुत्रशब्दे परस्यानङ्विधास्यते न तत्र कार्यिनिर्देशार्थमन्यथा न सुचाविन्यत्रापि स्यादिति।
इति। स तत्रानुगुत्तरपदे इत्यधिकारात्त्वभ्यते। उत्तरपदे परतः पूर्वस्य द्वन्द्वं तं न स्यान्नङित्यर्थः। होतापोतारविति। आनङो ङित्वात्पूर्वस्य ऋकारस्यादेशः सति न लोपः। अन्य
मेव विधीयमानमिति वाच्यं। उत्तरपद इति पदग्रहणात्। न हि होतृपरेन पूर्वपदं नाक्षिप्यते। अन्यथा होतृपोतृनेष्टोद्गातार इत्यत्र मध्यमस्यानङ् स्या...न अविशेषात्
नत्ता न रावस्थाने आदेशेन भवितव्यं न तु ऋदन्तपदस्य स्थाने इति किमनेनानङो ङित्करणेन सत्यं ङित्करणाभावे मित्रावरुणावित्यादौ देवताद्वन्द्वे चेत्युत्तरपदे परे
विधीयमानोयमादेशः पूर्वस्याक्षरस्य पदस्य वा स्यात् पूर्वस्यान्त्यस्य वेत्यत्र नियामकाभावात्॥ ॥ २ ॥

न इति कार्यिनिर्देशार्थमित्युक्तत्वान्निर्दिश्यमानस्य ऋकारस्यैवादेशः स्यादिति ङित्करणं व्यर्थमित्याशंक्यापि परास्ता नेष्टोन्नार इति। न ह्यत्र नेष्टा पूर्वपदं स्यात्पूर्वपदस्ये
नात्मा मातापितरौ वेति। पुत्रोऽन्यतरेणानयोर्यौनेन संबन्धः। पूर्वेण तु होतारिरूपविद्याकृतः संबन्धः कस्मिन्नपि न्यायान्निरूपसत्त्वमिति विवेकः। मद्गुकद्रुमेति। तेन विभाषास
त्यत्रानेन संबध्यत इति भावः॥ ॥ पितापुत्राविति। अनयोरपि योनिकृतसंबन्धो जन्यजनकभावलक्षणः। देवता। अनूकारान्तार्थमपि विधायोनिसंबन्धार्थं च वचनं॥
नङीपवादोऽयं देवताद्वन्द्वे इत्येवेति। एवं च हत्रि ग्रन्थे स्थितं ज्योतिर्लिङ्गयोर्देवताद्वन्द्वेऽप्यप्रयोगे प्रयोगे व्याप्तो व्याप्यस्यापनप्रयोगास्त्वा। पन्थास्ताः। पदप्रमाणमनुरस्तु

पुत्रौ। देवताद्वन्द्वे च। ६। ३। २६। इहोत्तरपदे परे आनङ्। मित्रावरुणौ। वायुशब्दप्रयोगे प्रतिषेधः। अग्निवायू। वाय्वग्नी। पुनर्द्वन्द्वग्रहणं प्रसि
द्धसाहचर्यस्य परिग्रहार्थं। तेन ब्रह्मप्रजापत्यादौ नानङ्। एकेन द्विनैकहविर्भागित्वेन श्रुतत्वात्पिलोके प्रसिद्धसाहचर्या। इन्द्रप्रसोमवरुणापौः।
३। २७। देवताद्वन्द्व इत्येव। अग्नेस्तुत्स्तोमसोमाः। ८। ३। ८२। अग्नेः परेषामेषां सस्य मूर्धन्यः स्यात्समासे। अग्निष्टुत्। अग्निष्टोमः। अग्नीषोमौ।
ग्नीवरुणौ। इद्वृद्धौ। ६। ३। २८। वृद्धिमत्युत्तरपदे अग्नेरिदादेशः स्याद्देवताद्वन्द्वे। अग्नामरुतौ देवते अस्य आग्निमारुतं कर्म॥ अग्नीवरुणौ देवते अस्य
आग्निवारुणं। देवताद्वन्द्वे चेत्युभयपदवृद्धिः। अलौकिकवाक्ये आनङा भाव्यमिति वाच्यात्। इद्वृद्धौ किं। आग्नेन्द्रः। नेन्द्रस्य परस्येत्युत्तरपदवृद्धिनि
षिद्धेन। अग्ना वैष्णवो दीर्घो याग्ना। ६। ३। २९। देवताद्वन्द्वे उत्तरपदे। द्यावाभूमी। द्यावाक्षामे। दिवसश्च पृथिव्याम्। ६। ३। ३०। दिव इत्यस्य चात् द्यावा॥
देशोऽकारोच्चारणं सकारस्य रुत्वं माभूदित्येतदर्थं। द्यौश्च पृथिवी च। दिवस्पृथिव्यौ। द्यावापृथिव्यौ। छन्दसि दृष्टानुविधिः। द्यावा चिदस्मै पृथिवी।
स्पृथिव्योररतिरित्यत्र पदकारा विसर्गमध्यर्दनि। उषासोषसः। ६। ३। ३१। उषस्शब्दस्योषासा देशो देवताद्वन्द्वे। उषासासूर्यं॥ ॥ तिः। अग्निरिष्टोमो माता॥
त्रा भिव्यक्तपदार्थपिस्वतंत्रा लोकविश्रुतादतिन्यायेनादोषत्वात्। अग्नेः। सान्यस्यादीर्घ इति निषेधेऽयमारंभः। अग्निष्टुदिति। अग्निः स्तूयते ऽस्मिन्सः।
धः। संपदादिस्वादपि करणे क्विप्। अग्निष्टोम इति। अग्नीनां स्तोमोऽग्निष्टोमः सोमयागस्य संस्था संस्थासंख्या उच्यते। इद्वृद्धौ। तकार उच्चारणार्थः। इकारस्य
कारविधानं तु बाधकबाधनार्थं। वृद्धिशब्देनात्र वृद्धिमद्गृह्यते। वृद्धिमात्रस्योत्तरपदस्यासंभवादतोऽव्याचष्टे।

त्युत्तरपदइति। आनङ्मी त्वं च बाधितेति। यद्यपि वृद्धेः प्रागेव आनङीन्तयोरन्तरङ्गत्वात्प्रवृत्तिरक्षितया पिपरिहृत्यापवादविषयमुत्सर्गोऽभिनिविशत इति न्यायादान
भवत इति भावः। अप्राप्ते सत्व मिति। इत्वाभावादनङ् च भवति। रूपंमाभूदिति। अकारे सति सकारस्य अवर्णं भवति तेन प्रयोगे विकाराभावोऽनुमीयत इति भावः। कि
तत्र याच कश्चिद्विकारोनेन्यो वाणुमेयं लस्यानुरोधादिति भावः। उषासासूर्यमिति। उषाश्च सूर्यश्च तयोः समाहारः॥ ७॥ मातरपितरौ। मातरः शब्दस्य नङ्कदेशे निपात
तं। अनं ग्रहणं विसर्गार्थं तु इति वर्णग्रहणं सप्रयोजनं नानुपति। नवस्रजमिति। बहूनां द्वंद्वे तु वाक्त्वक्स्रजे। द्वंद्वगर्भे द्वंद्वे तु वाक्त्वचस्रजं। इति द्वंद्व। द्वंद्वापवादमे
केशेष इति। विरूपाणामिति। रूप्यते बोध्यतइति व्युत्पत्त्या सौत्रस्सरूपशब्दस्यार्थपरत्वेन पाणिन्याख्यानान्तिमार्धरैरेव लघुशब्दनद्ध इति भागेनव्याख्याने। इष्टेषूना

मातरपितरावुदीचाम्। ६।३।३२। मातरपितरौ। उदीचां किं। मातापितरौ। द्वन्द्वाच्चुदषहान्तात्समाहारे। ५।४।१०६। चवर्गान्ताद् दषहान्ताच्च द्वन्द्वाट्टच्
स्यात्समाहारे। वाक्त्वचं। वाक्त्वचं। त्वक्स्रजं। शमीदृषदं। वाक्त्विषं। छत्रोपानहं। समाहारे किं। प्रावृट्शरदौ। इति द्वन्द्वः॥ अथैकशेषः। सरूपाणां।
मौ। रामाः। विरूपाणामपि समानार्थानां। वक्रदण्डश्च कुटिलदण्डश्च। वक्रदण्डौ। कुटिलदण्डौ। वृद्धो यूना तल्लक्षणश्चेदेव विशेषः। १।२।६५॥
यूनासहोक्तौ गोत्रं शिष्यते गोत्रयुवप्रत्ययमात्रकृतं चेत्तयोः कृत्स्नं वैरूप्यं स्यात्। गार्ग्यश्च गार्ग्यायणश्च गार्ग्यौ। वृद्धः किं। गर्गगार्ग्यायणौ। यूना किं।
गर्गगार्ग्यौ। तल्लक्षणः किं। भागवित्तिभागवित्तिकौ। कृत्स्नं किं। गार्ग्यवात्स्यायनौ। स्त्री पुंवच्च। १।२।६६। यूना सहोक्तौ वृद्धा स्त्री शिष्यते तदर्थश्च पुंवत्।
गार्गी च गार्ग्यायणश्च गार्ग्यौ। अस्त्रियामित्यनुवर्तमाने यञञोश्चेति लुक्। दाक्षी च दाक्षायणश्च दाक्षी॥ ९ अपत्यमन्तर्हितं वृद्धमिति पूर्वाचार्यैः प
भतस्य पाणिनिना गोत्रापरपर्यायस्येह ग्रहणं कृत्रिमेण यूनासाहचर्यादित्याह। गोत्रं शिष्यत इति। गोत्रं पूर्वोक्तमेव तु न कृत्रिमं। अपत्याधिकारादन्यत्र लौकिकं गो
मिति सिद्धान्तेन श्रीपगवश्चानन्तरः श्रीपगविश्च युवेत्यत्र नैकशेषः। भागवित्तीति। भागवित्तस्य गोत्रापत्यं भागवित्तिरित्यत्र सूत्रेणेति वृद्धाद्धक्सौवीरेषु बहुलमि
त्यट्ठक्। इह कुत्सा सौवीरत्वं चाधिकमपेक्ष्यते। ननु युवप्रत्ययमात्रकृतं वैरूप्यं। गार्ग्यवात्स्यायनावित्येवं इहप्रकृत्यंशे वैरूप्यं न गोत्रादिकृतं। स्त्री पुंवच्च। वृद्धा स्त्रीति। गो
ते स्त्रीवाचकमित्यर्थः। पुंवद्भावकृतं वैलक्षण्यं स्फुटीकर्तुं दिव्यत्र नान्तेन विग्रहमाह। गार्ग्यायणाविति। अनुवर्तमान इति। नद्यत्र स्वबहुष्विन्यतः॥ ९ ६ २

र्थानिर्देशस्य फलमनेन दर्शितमन्यथा स्त्रीत्वस्यानिवर्तनात् ङीबुत्स्यात् गार्ग्यान्यशेषमत्र ननं च सिद्धं स्यादिति देशे तु नैनत् सिध्येत् सामान्यातिदेशे विशेषानतिदेशादित्याहु
न्यायानुवर्तनाचेह गार्ग्यश्च वात्स्यायनी च॥ ६७॥ पुमान् स्त्रिया। इहापि पुनर्निवर्तते सरूपाणामितिन्नुवर्तते। भ्रातृपुत्रौ पितृतरस्त्रां दृशान्। तेन हंसश्च वरटा चेत्यत्र न भवत्य
त्यातिप्रसंगः। हंसत्वजातिसाम्येन यद्यपि वैरूप्यं नास्त्येव तथापि स्त्रीत्वपुंस्त्वमात्रप्रयुक्तत्वात्। स्यादेतत्। गौरियं गोश्चायं नयोरुक्तौ गावौ वा गावौ वितिनियमनेनस्यात् तत्र
नावानिं तु स्त्रीत्वाचकस्य पुंवाचकस्य वा सरूपाणामित्येकशेषः नियमेन स्यात्। अत्राहुः। न रितस्तेन विशेषाभावेनान्यपरोत्तरोपदृति। इदं ब्रह्मपाविन्यादीनेकशेषो भवति
त्वे न च पुंयोगकृतविशेषस्य सद्भावात् स्यादेतत्। एतौ गावौ वितिनियमनेन स्यादितिमनोरमायां पदुकं तत्कथं संगच्छतां। त्यदादितः शेषे पुन्नपुंसकत इति नियमप्रवृत्त
गोशब्दस्य शेषे पियोगावा निति नियमतः प्रयोगः सिद्ध्यत्येवेति चेदत्र केचित्। दिक्प्रदर्शनमात्रमिदं। नीलो गावौ सुन्दरो गावाविति नियमनेन स्यादित्युदाहरन्त्यमयः।

पुमान् स्त्रिया। १।२।६७। स्त्रिया सहोक्तौ पुमान् शिष्यते तल्लक्षणश्चेदेव विशेषः। हंसी च हंसश्च हंसौ। भ्रातृपुत्रौ स्वसृदुहितृभ्याम्। १।२।६८। भ्राता च
स्वसा च भ्रातरौ। पुत्रश्च दुहिता च पुत्रौ। नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम्। १।२।६९। अक्लीबेन सहोक्तौ क्लीबं शिष्यते तच्च वा एकवत्स्यात् तल्लक्ष
णश्चेदेव विशेषः। शुक्लः पटः। शुक्ला पटी। शुक्लं वस्त्रं। तदिदं शुक्लं। तानीमानि शुक्लानि॥ ६९ पुमान् स्त्रिया। तल्लक्षण इति। पुंस्त्वलक्षण इत्यर्थः। एतेन गावौ कर्बुरौ
रूपाणामित्यनेन स्त्रीलिंगशेषे तु एते गावाविन्यपि स्यादिति यथा श्रुतमेव समर्थनीयमित्याहुः। न रपरेनरामेनेत्यादितः शेषः इति नियमाः प्रवृत्तावपि पुमान् स्त्रियेति।
स्त्यानौ नीलौ गावावेतौ गावाविति नियमतः सिध्यत्येवेति। अत्र वदंति। अहृदत्तस्य रूपविशेषणानामित्येतन्न्यायसिद्धमेव वचने विशेष्यलिंगं न देव विशेषणेऽप्यतिसर्वं सम
एवं च हृदत्तस्य रूपविशेषणो ऽप्येकशेषविशेषणेऽप्येनावित्यत्र त्यदादितः शेष इत्यादिनियमाः प्रवृत्त्याविशेष्यगतमेव लिंगं भवतीति स्त्रीवाची गोशब्दस्य शेषे तेन इति
एतौ गावाविति नियमनेन स्यादित्याशेषः संगच्छत एवेति दिक्। नपुंसकमन। अन्यतरस्यां ग्रहणमेकवद्वेत्येवं तन्न पौंस्त्वं चाथ तेन त्वेकशेषे एत्वाशयेनाह। क्लीबं शिष्य
एकवदिति। अनपुंसकेनेति किं। शुक्लं च शुक्लश्च शुक्लौ। अत्रैकवच्चेति न भवति। अस्य ग्रहणमस्त्वेवं करोऽपस्य एकवद्भावो यथा विज्ञायेतेत्येवमर्थमन्यथा उत्तरत्रापि एकव
शुक्लः शंकेन। शुक्लः पट इत्यादि। शुक्लः शुक्ला शुक्लमित्येव विग्रहः पटः पटीत्यादि प्रदर्शनं शुक्लशब्दस्य गुणिलिंगत्वस्फोरणाय॥ ॥

त्रा। श्वशुरः श्वश्र्वा नन्वेतत्सूत्रद्वयं व्यर्थं पितृशब्देन मातापित्रोः श्वशुरशब्देन तु श्वशुरयोर्लक्षणया बोधसंभवात्। न च सरूपाणामित्यादिसूत्रस्वरूपरि
त्र द्वयं द्वंद्वनिवृत्त्यर्थमावश्यकमिति वाच्यं। पक्षे तस्यापि दुष्परिहारत्वादिति चेदत्राहुः। पितृश्वशुरशब्दयोर्नियमात् श्वश्रूशब्दयोः केवलयोः कोशिपपंरप्रयोगं वार
रमणीयमेव सूत्रद्वयमनभिधानमाश्रित्य प्रत्याख्यानस्यानुचितत्वादिति। मातापितराविति। पितुर्दशगुणं माता गौरवेणातिरिच्यत इति स्मृते मातुः पू
र्वनिपातः। यानकृच्छ्रादित्यादि। श्वश्रूश्वशुराविति। श्वश्रूः पूर्वेण पत्नीत्वमातृत्वप्रकीर्तितेति स्मृतेः। श्वश्र्वा श्वश्रूर्द्वित्वात्पूर्वनिपातः। तत्सर्वं सर्वैर्नि
इभिर्नैरपि सहोक्तौ यथा स्यात्। तेन सत्यादिभिरेव सहोक्तावित्यर्थो मा भूत्। यत्परमिति। शब्दपरविप्रतिषेधादिति भावः। त्यदादि तद्यदिति। ग्रामादिना

तामात्रा। १।२।७०। मात्रा सहोक्तौ पिता वा शिष्यते। माता च पिता च पितरौ। मातापितरौ वा। श्वशुरः श्वश्र्वा। १।२।७१। श्वश्र्वा सहोक्तौ श्वशुरो वा
ष्यते न तु लक्षणं च विशेषश्चेत् श्वश्रूश्च श्वशुरश्च श्वशुरौ। श्वश्रूश्वशुरौ वा। त्यदादीनि सर्वैर्नित्यं। १।२।७२। सर्वैः सहोक्तौ त्यदादीनि नित्यं शिष्यन्ते।
देवदत्तश्च तौ। त्यदादीनां मिथः सहोक्तौ यत्परं तच्छिष्यते। स च यश्च यौ। कश्चित्पूर्वशेषोऽपीष्यत इति भाष्ये। स च यश्च तौ। त्यदादितः शेषे पुंनपुं
कतो लिङ्गवचनानि। सा च देवदत्तश्च तौ। तच्च देवदत्ता च यज्ञदत्ता च तानि। पुंनपुंसकयोस्तु परत्वान्नपुंसकं शिष्यते। तच्च देवदत्तश्च ते। अद्
तत्पुरुषविशेषणानामिति वक्तव्यं। कुक्कुटमयूर्याविमे। मयूरीकुक्कुटाविमौ। तच्च सा च अर्धपिप्पल्यौ ते॥ त्यदादीनां शेषे सह विवक्षिते पुंनपुं

नपुंसकं न दृश्येत लिङ्गं प्रातिपदिकानि भवन्तीति वाच्यमित्यर्थः। काशीत्याकांक्षायामर्थात्तदादीन्येव। अस्यापवादमाह अद्वन्द्वेति। द्वंद्वादिविशेषण
कं न। किंतु विशेष्यनिघ्नमेवेत्यर्थः। नन्वेवं कुक्कुटमयूर्याविमे इत्यत्र उभयपदार्थप्रधानत्वेन उभयोरपि विशेष्यत्वात् विशेष्यनिघ्नतायामपि कुक्कु
र्याविमे इति नियमतो न स्यादिति चेदत्र न्यायः। परवल्लिङ्गमित्यनेन द्वंद्वतत्पुरुषयोरुत्तरपदलिङ्गवत्त्वादुत्तरपदलिङ्गस्यैव द्वंद्वतत्पुरुषयोर्निपातनेनानु
धीनत्वेनानुप्रयोगसैनिकदाचिदनुपपत्तिरिति। मयूरीकुक्कुटाविमाविति। प्रकृतानुपयुक्तमप्येतन्न्यसंवादुकं। तच्चेति। पिप्पल्यर्धं। सा चेति अर्धपि
॥ तत्पुरुषविशेषणमुदाहरति अर्धपिप्पल्यौ ते इति। यद्यपि स्त्रीनपुंसकसाधारणोऽयमिति प्रयोगस्तथापि तच्चेनच्च सा च अर्धपिप्पल्यस्तावत्पापुरादह

ग्राम्ये भवा ग्राम्याः। ग्रामादपृथग्भावविनिमयः लिंगद्वये पि गावइति रूपस्य समानत्वात्। स्त्रीलिंगशेषस्य फलमाह। इमा इति। एवंच इमे च इमाश्च इमा इति स्त्री लिं
गभवति न त्वत्र स्वरादितः शेषे पुंनपुंसकतो लिंगवचनानीति पुंल्लिंगशेषः। गाव इमा इति भाष्योदाहरणादिति के चन्नेतु ग्राम्यपशुसंघविषयत्वात् विशेषा।

ग्राम्यपशुसंघेष्वतरुणेषु स्त्री। १।२।७३। एषु सहविवक्षायां स्त्री शिष्यते। पुमान्स्त्रियेत्यस्यापवादः। गाव इमाः। ग्राम्येति किं। रुरव इमे। पशुग्रह॥
णं किं। ब्राह्मणा इमे। संघेषु किं। एतौ गावौ। अतरुणेषु किं। वत्सा इमे। अनेकशफेष्विति वाच्यं। अश्वा इमे। इह सर्वत्र एकशेषे कृते नेकसुवन्ताभावाद्
न तेन शिरसी शिरांसीत्यादौ समासस्यैकार्थीभावात्। प्राप्तपञ्चत्वादेकवद्भावश्च न   । पन्थानौ। पन्थान इत्यादौ समासाभावेनात्र नैकशेषः। कृ
त्तद्धितसमासैकशेषसनाद्यन्तधातुरूपाः पञ्च वृत्तयः। परार्थाभिधानं वृत्तिः। वृत्त्यर्थावबोधकं वाक्यं विग्रहः। स द्विधा। लौकिकोऽलौकिकश्च परिनिष्ठित
त्वात्साधुर्लौकिकः। प्रयोगानर्हो ऽसाधुरलौकिकः। यथा। राज्ञः पुरुषः। राजन् अस् पुरुष सु इत्यविग्रहो नित्यसमासः। अस्वपदविग्रहो वा। समासश्चतुर्विध
प्रायोवादः। अव्ययीभावतत्पुरुषबहुव्रीहिद्वन्द्वाधिकारबहिर्भूतानामपि सह सुपेति विधानात्। पूर्वपदार्थप्रधानोऽव्ययीभावः। उत्तरपदार्थप्रधान
स्तत्पुरुषः। अन्यपदार्थप्रधानो बहुव्रीहिः। उभयपदार्थप्रधानो द्वन्द्वः। इत्यपि प्रायोवादः प्रायोऽभिप्रायः। सूपप्रति। उन्मत्तगङ्गमित्याद्यव्ययीभावे। अ
र्द्धपिप्पल्यादौ तत्पुरुषे। द्वित्राइत्यादि बहुव्रीहौ। दन्तोष्ठमित्यादि द्वन्द्वे चाभावात्। न तत्पुरुषविशेषः कर्मधारयः। न द्विगुसंज्ञो द्विगुः। अनेकपदत्वं द्वन्द्वबहुव्रीह्योरे
व तत्पुरुषस्य क्वचिदेवेत्युक्तं। किञ्च। सुपां सुपा तिङा नाम्ना धातुनाऽथ तिङां तिङा। सुबन्तेनेति विज्ञेयः समासः षड्विधो बुधैः। सुपां सुपा। राजपुरुषः। तिङा।
पर्य्यभूषयत्। नाम्ना। कुम्भकारः। धातुना। कटप्रूः। अजस्रं। तिङां तिङा। पिबतखादता। खादतमोदता। तिङां सुपा। कृन्तविचक्षणेति यस्यां क्रियायां सा कृन्तवि
चक्षणा। एहीडादयोऽन्यपदार्थे। इति मयूरव्यंसकादौ पाठात्समासः॥ इति सर्वसमासशेषः॥ ए अत्र वृत्तिवत्तद्भाष्ये निबद्धे लिंगशेष एव स्यादिति। नाप्रकिशंका
त्वात्कुरूणीगावावितिः। एकशेषस्यानेकविषयत्वादिवानेकपरिग्रहे सिद्धे संघग्रहणसामर्थ्यादिह गुणोसमुदायो न गृह्यतइति भावः। एकशेषे कृतेनेति। निपत्तुमन्यानां
समवेतानेन रंगतात्रिरिति भावः। नन्वेवं विषयभेदान्नेदं बाधकमेकशेषपरस्त्री इत्येकार्थप्रवर्त्तनमिति चेद्राहङः॥

३७८

कशेषोनस्यानहि विभक्तासुन्ययमानार्थाद्वंद्वः स्यान्नतेनेकशेषेसनभवतीतिता किंकींशाप्तिमादाया पवादोऽयं स्यादिति। इंद्वोनेति। एतेनन्ननद्वंद्वानां
इतिश्मोनिरस्तः। नचानर्थेनान्युपक्ने विशेषाभावादितिवाच्यं मित्याइनेनेति। पंथानावितिवचने नोनर्नामस्थानइतिनिषिद्धात्मनां सांतस्युपविदुव
लुके पिसाविन्नस्तनापंथादनि विहितेनिवाच्यं पयोर्विभाषेतिसमासोऽभावे थपंथानाविन्यादौ स्तोत्रिति सूत्रस्यसार्थकत्वात् इत्येकशेषः। प्रसंगा
दिहैतन्यादि। पंचहनस्यइति पंचानांहस्तिरिति पूर्वाचार्यसंज्ञा रहस्यामीयनइतिभावः। तल्लक्षणमाह। परार्थेति। प्रन्यथायोनभावेपरपदार्थेनभावे
विभिशेषेस्सपरार्थस्स चाभिधीयतेयेनसमस्तार्थोऽभिधानं। अतएवतिङ्‌तं तद्वृत्तिर्नभवति। नचैकार्थीभावानभ्युपगमादन्यथासुदुपनतीत्यादौ फले
योनस्यात्सविशेषणानांवृत्तिर्नभवतीत्यत्रस्यचविशेषणयोगेनेत्यभ्युपगमादित्यतो। समर्थसूत्रेकैयटस्त्वाह परस्यशब्दस्यपोर्थस्तस्याभिधानंप्रत्वं
नस्याद्वृत्तिरित्यर्थः यथाराजपुरुषइत्यत्रराजशब्देनवाक्यावस्थायांप्रनुक्तःपुरुषार्थोऽभिधीयतइति। अविग्रहइति। लौकिकविग्रहरहितइत्यर्थः। अस्वपदवि
ग्रहइत्यर्थः॥ पथामानत्री।५।४।७४। अब्नत्रीहाविति च्छेदः। ऋगाद्यनंस्यसमासस्यचाप्रत्ययोऽन्तावयवस्यात्। अक्षेयाधूः। नदन्तस्य
गुनप्रर्द्धर्चः अन्नचचन्नावध्येनर्थेवनेह अन्नक्सामं। बहूकसूक्तं। विष्णोःपूः॥ ११ समस्यमानयावन्यदाचष्टितदन्यार्थः द्वंद्वद्वीहीसंज्ञेचेति।
हणानयन्नुवृत्तिर्ध्यानदिधानाइहूपदसमासस्तेनयोरित्यसंभवतीतिभावः। कर्तरीति। धनंजानद्वयादौ। नाधेति। मानिपदिकेनेत्यर्थः। कुंभकारइति। अत्रहिसुनुना
गोपपदसमासः करभूरजस्सिमिति। किंचविमहीतिनार्थिकेनमिकंपीनिस्येनचकर्पुरुषजसइतिनिपातनाद्यातुनासमासः। पिवतस्वादतेतिप्रास्यातमास्यातेनेति
मसकार्यौपावास्समासेः। इतिसर्वसमासशेषः॥७॥ नस्कुपूरब्दइतिलुप्तप्रथमैकवचनांतं समासांताइतिनत्रिपिक्षिप्तेनताह। समासस्याप्रन्ययोनास्य
प्रनशरस्येतस्मामान्यतः। सुतमपिपुरेवसंवध्यतेसामर्थ्याच्चान्येविलाशयेनस्यानपे। अवधेयापूरितिनदंतस्पतुनेति। सत्रेसंबंधिनोऽपिकरणंनविचयपा
नासंबंधिनीयाधूस्तदंतसतेनेत्यर्थः। यथाचायेपूर्वपदेनेतिव्याख्यायेतततदिहढपूरयइत्यत्रनिषेधोनस्यात्। यद्दिलशेसमासार्थनेतिव्याख्यायेततदाअप्तपूर्नित्य
नस्याद्भयसंग्रहार्थंसुगाव्याख्यानमेवन्याय्यः। अर्द्धर्चइति। अर्धनपुंसकमितिसमासः। अर्द्धर्चाःपुंसिचेतिपुंस्त्वं। अनृगित्यादि। अनुक्तसमासांतनान्वेया

मिति। यद्यपि पुरशब्देन समासे ष्यंतन्निष्पत्तिर्यापि विशेषणभूतस्य निष्कारणा पसूत्रे पूर्वग्रहणं। कृतसमासांतस्येति। येन विधिरिति सूत्रेणापत्तिश्चेन्निम
ऽतिभाष्यादिति भावः। अंतरीपमित्यादि द्व्यंतर्गता आपो यस्मिन्निति विग्रहे। उपसर्गग्रहणं मात्रैरूपत्वात् [illegible] समापूरिति। अनुपस
मिति भावः। भाष्ये तु समापर्दनप्रतिषेधो वक्तव्य इत्युक्तं स चादेवयजनरूपविशेषार्थः परस्समीपसमृद्धौ त्रिनिर्देशात्समीपमिति भाष्योदाहरणाच्चेति
यजनमिति देवान्यजंते यस्मिन्निति सुन्नन्यायपद्म भूमिः। स्वपिति। नपुंजनादिति समासांत भावः। अनशांनादैति। अंतरिति सूत्रे ईत्वमनवर्णादिति

नुपुरं। कीवतनं लोकान्। विमलापं सरः। ऋः न्त्युपसर्गेभ्योऽप ईत् ६।३।९७। अप इति कृतसमासांतस्यानुकरणं। पञ्चम्यर्थे प्रथमा एभ्यः
ईत्स्यात्। द्विर्गता आपो यस्मिन्निति। द्वीपं। अन्तरीपं। प्रतीपं। समीपं। समापो देवयजनमिति तु समापां पोयस्मिन्निति बोध्यं। कृतसमासा
ग्रहणाच्चेह। स्वप् स्वपी। अवर्णान्ताद्वा॥ प्रेपं। परेपं। प्रापं। परापं। ऊदनोर्देशे ६।३।९८। अनोरपस्याप ऊत्स्याद्देशे। अनूपो देशः। राजधु
अक्षेऽतु। अक्षधूः। दृढधूः। सखिपथोरस्य पथो देशः। अच् प्रत्यन्ववपूर्वात्सामलोम्नः ५।४।७५। एतेभ्यः सामलोमान्तात्समासादच्स्यात्।
सामं। अनुसामं। अवसामं। प्रतिलोमं। अनुलोमं। कृष्णोदक्पाण्डुसंख्यापूर्वाया भूमेरजिष्यते। कृष्णभूमः। उदग्भूमः। पाण्डुभूमः। द्विभूमः।
भूमः प्रासादः। संख्याया नदीगोदावरीभ्यां च। पञ्चनदं। सप्तगोदावरं। अजिति योगविभागादन्यत्रापि। पद्मनाभः॥
वक्तव्यं दृढमाधुन्। आपंप

तिभाष्योक्तेः। गतिश्चेति सूत्रेण प्रेपं परेपमिति भाष्योक्तेश्चेति भावः। ऊदनोः। दीर्घोच्चारणं कृचिह्नार्थं [illegible] प्रहार्थं। पद्भ्यां तु अनूपेयाना गोभिरिन्द्राच
वगृह्णाति। अनुगता आपोऽस्मिन्नित्यनूपो देशः। जलप्रायमनूपं स्यादित्यमरः। प्रतिसाममिति। अव्ययीभावः प्रादिसमासो बहुव्रीहिर्वा। एवम
ावपूर्वं। कृष्णोदगिति। अजिति योगविभागेन [illegible] इदं [illegible] बहुव्रीहिः। पद्मनाभ इति पद्मं नाभौ यस्येति व
ादित्वात् [illegible] परनिपातः॥ पद्माकारा नाभिरस्येति वा। एवमूर्णनाभोपि देवपः। [illegible] संज्ञा [illegible] रिति कृत्स्नविशेषः॥

३८०

।दृश्यतेऽनेनेति दर्शनं चक्षुस्तद्वाचिनोः शिवाद्यस्य पर्युदासात् मुख्यस्यैव ग्रहणमित्याशयेनाह अचक्षुःपर्याय इति। गवाक्ष इति। गावः किरणाः अक्षि
प्रवाची षष्ठीसमासः। अचतुरेति निपात्यन्त इति निपातनफलं तु समासविशेषनियमः टिलोपादिकं चेत्याह। आद्या इति बहुव्रीहय इत्यादि बहुव्रीहय
क्ष्णोऽदर्शनात्।५।४।७६। अचक्षुःपर्यायादक्ष्णोऽच् स्यात्समासान्तः। गवामक्षीव गवाक्षः। अचतुरविचतुरसुचतुरस्त्रीपुंसधेन्व
नडुहर्क्सामवाङ्मनसाक्षिभ्रुवदारगवोर्वष्ठीवपदष्ठीवनक्तंदिवरात्रिंदिवाहर्दिवसरजसनिःश्रेयसपुरुषायुषद्व्यायुषत्र्यायुषर्ग्यजुषजा
तोक्षमहोक्षवृद्धोक्षोपशुनगोष्ठश्वाः।५।४।७७। एते पञ्चविंशतिरजन्ता निपात्यन्ते। आद्यास्त्रयो बहुव्रीहयः। अविद्यमानानि चत्वार्यस्य अच
तुरः। विचतुरः। सुचतुरः। त्र्युपाभ्यां चतुरोऽजिष्यते। त्रिचतुराः। चतुर्णां समीपे उपचतुराः। ततस्त एकादश द्वन्द्वाः। स्त्रीपुंसौ। धेन्वनडुहौ। ऋक्सामे।
वाङ्मनसे। अक्षिणी च भ्रुवौ च। अक्षिभ्रुवं। दाराश्च गावश्च। दारगवं। ऊरू च अष्ठीवन्तौ च। ऊर्वष्ठीवं। निपातनाट्टिलोपः। पदष्ठीवं। निपातना
त्पदशब्दस्य पद्भावः। नक्तं च दिवा च। नक्तंदिवं। रात्रौ च दिवा च। रात्रिंदिवं। रात्रेर्मान्तत्वं निपात्यते। अहनि च दिवा च। अहर्दिवं। वीप्सायां द्वन्द्वो नि-
पात्यते। अहन्यहनीत्यर्थः। सरजसमिति साकल्येऽव्ययीभावः। बहुव्रीहौ तु। सरजः पङ्कजं। निश्चितं श्रेयः। निःश्रेयसं। तत्पुरुष एवेष्यते। नेह। निःश्रेयान्पु
रुषः। पुरुषस्यायुः पुरुषायुषं। ततो द्विगू। द्व्यायुषं। त्र्यायुषं। ततो द्वन्द्वः। ऋग्यजुषं। ततस्त्रयः कर्मधारयाः। जातोक्षः। महोक्षः। वृद्धोक्षः। शुनः
समीपं। उपशुनं। टिलोपाभावः सम्प्रसारणं च निपात्यते। गोष्ठश्वा। गोष्ठश्वः। ब्रह्महस्तिभ्यां वर्चसः।५।४।७८। अच् स्यात्। ब्रह्मवर्चसं। हस्तिवर्चसं।
पल्यराजभ्यां चेति वक्तव्यं। पल्यवर्चसं। राजवर्चसं। अवसमन्धेभ्यस्तमसः।५।४।७९। अवतमसं। सन्तमसं। अन्धयतीत्यन्धं। पचाद्यच्। अन्धन्त
मः।
नेन तत्पुरुषे अचत्वारोऽविचत्वार इत्येव भवतीति भावः। स्पष्टमुक्तं। एतच्चाप्यवधारणामूलं त्रिचतुरा इति त्रयश्चत्वारो वेति विग्रहः। संख्ययाव्ययेति बहु
व्रीहौ संख्येये डच्चोपचारोऽस्य। अक्षिभ्रुवमिति प्राण्यङ्गत्वादेकवत्। ऊरू चाष्ठीवन्तौ चेति सन्धिविवक्षायां पुमानूरुरित्यमरः। जानूरुपर्वाष्ठीवदस्त्रियामिति
ऊर्वष्ठीवं पदष्ठीवमिति प्राण्यङ्गत्वादेकवद्भावः। द्वन्द्वे निपात्यन्त इति ॥

ाम पीत्वे कशेषं वा धिनेति शेषः सरजसमिति। अव्ययीभावे चाकाले इति सहस्य सभावः सरजः पंकजमिति सरजसमकरंदनिर्भरा सितिमाघप्रयो।
दृति भावः निः श्रेयसमिति निश्चितं श्रेयो येनेति विग्रहः निश्रेयस्करं इति केचित्तत्पुरुषमाहरणमसुन्दरं ईयसश्चेति कपो निषेधात् गोस्त्रियोरिति एतेन समभीनत्व
नियमोऽदर्शित स्तेनपक्षो नतत्पुरुषे गोस्त्र्यन्ते च ब्रह्मवर्चसमिति पक्षो तत्पुरुषः पवे हस्तिवर्चसमपि पल्ये तिपच्चं मा सम ईनीति पन्नो मासभोगीन

श्वसो वसीयः श्रेयसः।५।४।८०। वसुशब्दः प्रशस्तवाची। ततः ईयसुनि वसीयः। श्वसशब्द उत्तरपदार्थप्रशंसामाशीर्विषयतामाह। मयूरव्यंस
कादित्वात्समासः। श्वोवसीयसं। श्वःश्रेयसं ते भूयात्। अन्ववतप्ताद्रहसः।५।४।८१। अनुरहसं। अवरहसं। तप्तरहसं। प्रतेरुरसः सप्तमीस्थात्।
।८२। उरसि प्रति। प्रत्युरसं। विभक्त्यर्थेऽव्ययीभावः। अनुगवमायामे।५।४।८३। एतन्निपात्यते दीर्घत्वे। अनुगवं यानं। यस्य चायाम इति समा
द्विस्तावा त्रिस्तावा वेदिः।५।४।८४। अच्प्रत्ययष्टिलोपः समासश्च निपात्यते। यावती प्रकृतौ वेदिः। ततो द्विगुणा त्रिगुणा वा अश्वमेधादौ तत्र वेदिर्द्वि
स्तावेति। किं द्विस्तावती। त्रिस्तावती रज्जुः। उपसर्गादध्वनः।५।४।८५। प्रगतोऽध्वानं। प्राध्वो रथः। न पूजनात्।५।४।६९। पूजनार्थात्परेभ्यः स
मासान्ता न स्युः। सुराजा। अतिराजा। स्वतिभ्यामेव। नेह। परमराजः। पूजनात्किं। गामतिक्रान्तोऽतिगवः। बहुव्रीहौ सक्थ्यक्ष्णोरित्यतः प्रागेवायं।
षः। नेह सुसक्थं। स्वक्षः। किमः क्षेपे।५।४।७०। क्षेपे यः किम् शब्दस्ततः परं यत्तदन्तात्समासान्ता न स्युः। कुत्सितो राजा किंराजा। किं
। किंगौः। क्षेपे किं। किंराजः। किंसखः। किंगवः। नञस्तत्पुरुषात्।५।४।७१। समासान्तो न। अराजा। असखा। तत्पुरुषात्किं। अधुरं शकटं। प
थो विभाषा।५।४।७२। नञ्पूर्वात्पथो वा समासान्तः। अपथम्। अपन्थाः। तत्पुरुषादित्येव। अपथो देशः। अपथं वर्त्तते॥ इति समासान्ताः॥

मीना गौः। समांसमीना साऽर्थेव प्रतिवर्षं प्रसूयते। खप्रत्ययोऽनुत्पन्नो यलोपो वा वक्तव्यः। समांसमां विजायते। समायां समायाम्। अद्यश्वीनावष्टब्धे।
५। २। १३। अद्यश्वो वा विजायते अद्यश्वीना वडवा। आसन्नप्रसवेत्यर्थः। केचित्तु विजायत इति नानुवर्तयन्ति। अद्यश्वीनं मरणं आसन्नमित्यर्थः। आ
गवीनः। ५। २। १४। आङ्पूर्वाद्गोः कर्मकरे खप्रत्ययो निपात्यते। गोः प्रत्यर्पणपर्यन्तं यः कर्म करोति स आगवीनः॥ साधां हि वचनं सुयं न समुदायः

विजायत इत्येतद्यावच्छेषप्रसूयत इति। विपूर्वको जनिर्गर्भविमोचने वर्तत इति भावः। गर्भविमोचने कृत्स्नायाः समायाः व्याप्त्यभावादत्यन्तसंयोगे चेति द्वितीया
न्यायेनाह। समायामित्यादि। खप्रत्ययानुत्पत्ताविति वार्तिकेन समांसमामिति सौत्रमपि योगरूपमिति भावः। अद्यश्वीनाद्यविभक्तिको निर्देशः। ननु स्त्रीलिङ्गनि
र्देशाद्यश्वीना गौः समूहः। अद्यश्वीनं गोमण्डलमित्यादावपि स्यात्। अद्यश्वीनेति निपातनात्तु वार्थे समासोऽपि मिति भावः। अथवा चान्तेवनेति सूत्रेण द्विपूर्वे स्तम्भे
धानादयश्वशब्दः आसन्नपरः। विजायत इति हि वर्तते सञ्चगर्भविमोचनार्थकत्वादाह। आसन्नप्रसवेत्यर्थ इति। कर्मकर इति। प्रसूमानः गां गृहीत्वा गच्छ
ता सिञ्चेत्यर्थः। प्रत्यर्पणपर्यन्तमिति। गोशब्दस्य दाशप्रामगोः अनिदानेव वर्तन इति भावः। आगवीन इति॥ आङ्ममयोर्वापि विभ्यत्यव्ययीभावेनास्य पा

॥ स्वरूत्यनुवर्तते। अनुगुशब्दादलंगामीत्यस्मिन्नर्थे खः स्यात्। गोः पश्चादिति॥ पश्चादर्थे ऽव्ययीभावः। पर्याप्तमिति क्रियाविशेषणं। अत्र हेतुः। अ
स्य क्रियाविशेषणत्वात् द्वितीयानादिहमत्वपः। न चालंगामीत्येस्य अनुगुप्ताना विति खिनिप्रत्ययान्तेन क्रियाकर्मत्वाद्य षष्ठी स्यादिति वाच्यं। क्रियावि
नद्रवृत्तेः शोभनं पाचक इत्यादिवदायारथेनादित्याह। अत्र केचित् धात्वर्थो व्यापारजन्यफलाश्रयत्वं यत्र तत्कर्मेत्यत्र तु व्यापारजन्यमात्रं न तदीयत्वाविकं
तं इत्तानां पाचक इत्यत्र मुख्ये कर्मणि कृद्योगलक्षणा षष्ठी भवति। मृदु पाचकः शोभनं पाचक इत्यत्र तु समानभवति। फलव्यापारयोः क्रियाकर्मभावव्यवहारे
न्न स्वौपचारिककर्मत्वान्नतद्विशेषणात्वाच्च मध्ये द्वितीयेति तस्याशयस्त्वाहुः अन्ये त्वेवं न हि नुत्वन्यायेन क्रियाविशेषणात् द्वितीयायाप्राप्य प्रवृत्तिः स्या

अनुग्वलङ्गामी। ५।२।१५। अनुगु। गोः पश्चादलमर्थं यथा गच्छति स अनुगवीनो गोपालः। अध्वनो यत्खौ। ५।२।१६। अध्वान।
मलङ्गच्छतिअध्वन्यः। अध्वनीनः। ये चाभावकर्मणोः आत्माध्वानौ खे इति प्रकृतिभावः। अभ्यमित्राच्छ च। ५।२।१७। चाद्यत्खौ। अभ्यमित्री
यः। अभ्यमित्र्यः। अभ्यमित्रीणः। अमित्राऽभिमुखं सुष्ठु गच्छतीत्यर्थः। गोष्ठात् खञ्भूतपूर्वे। ५।२।१८। गोष्ठो भूतपूर्वः गौष्ठीनो देशः।
अश्वस्यैकाहगमः। ५।२।१९। एकाहेन गम्यत इत्येकाहगमः। आश्वीनोऽध्वा॥ ११. तस्मात्तत्र हमिति निर्देशादनित्यः कृद्योगषष्ठीति क्रियाविशेषणात्
क्रियत इति हरदत्ताशयः कथं विग्रहणीयमित्याहुः। वस्तुतस्तु पश्चादर्थे ऽव्ययीभावोपमितिनिर्विवादं। पश्चादिति चाऽस्मान्नर्थे निपातितं। तच्च यद्यपि वि
ग्यसाधारणेन तथापीह योग्यतावशात् समर्थ्य इति तत्र सकर्मत्वायोगान्यथमोगादिविह पञ्चम्य इति च कुंडपिनं। कृद्योगलक्षणाय षष्ठीशंकाप्यत्र एवं ने
॥ अभ्यमित्रात्। अभ्यमित्र शब्दो लक्षणेनाभिप्रती आभिमुख्ये इत्यव्ययीभावः क्रियाविशेषणत्वाद् द्वितीयासमर्थविभक्तिः। गोष्ठात्खञ्। गावस्तिष्ठन्त्यस्मि
न्गोष्ठः। घञर्थे कविधानमित्यधिकरणे कः। अंबाम्बगोभूमीति षत्वं पूर्वं भूतो भूतपूर्वः सुप्सुपेति समासः। अश्वस्य। कर्तरि च षष्ठ्यर्थं॥ निर्देशादेव समर्थविभक्ति
हगम इति। कर्तृकरणे कृतेति समासः। ननु इह ग्रहवृदृनिश्चिगमश्चेत्यप्वाधित्वा परिमाणाख्यायां सर्वेभ्य इति घञ् प्राप्नोति न प्रसिततात्र परिमाणाख्या। एका
हेन गम्यत इति परिच्छेदापगमात्॥ भवाहुः॥ अस्मादेव निपातनादप् इत्यन्य इति॥ ॥ ॥

न कौपीने। इतीसमस्तपदांतत्वेन निपात्येते। रूढिशब्दावेतौ कथं विग्रहस्यायाविति नात्रायथार्थाभिनिवेशः कार्यः। शालाप्रवेशमिति। अप्राग
दन्यत्र गंतुमशक्तः। शालामेव प्रवेष्टुमर्हतीत्यर्थः। कूपपतनमिति। यदकार्यं तत्प्रच्छादनीयत्वात् कूपावतरणमर्हतीत्यर्थः। तदाच्छादनमिति। वासःखंड
। पुरुषेनाङ्गं। प्रकार्यशब्दोयं करोतिसक्रियासामान्यवचनस्त्रेनलक्षणाहेतुत्वेन अन्यदृष्टत्वात् पुंल्लिंगं कौपीनं। अस्तु रसनानस्त्राच्छादनमिति।
श्यासेनेति। भारवहनादिनेत्यर्थः। यद्यपि व्रातशब्दो नोकसे घातवचनस्तथाप्यत्र भाष्यादिग्रंथपर्यालोचनया प्रथमे वार्थे इहतत्रोचितदुर्भावः। सा
नं। योग्यतया समर्थविभक्तिर्नीयेति दर्शयति। सप्तभिः पदैरिति। पदमिह संभाषणपादविशेषो वा। नहि मार्थे द्विगुः। अथवाप्येतद त्यर्थे खञ्। हैयं

शालीनकौपीने अधृष्टाकार्ययोः। ५।२।२०। शालाप्रवेशमर्हति शालीनः। अधृष्टः। कूपपतनमर्हति कौपीनं पापं। तत्साधनत्वान्नग्न
त्वाद्धापुरुषलिङ्गमपि तत्सम्बन्धात्तदाच्छादनमपि। व्रातेन जीवति। ५।२।२१। व्रातेन शरीरायासेन जीवतीति न तु बुद्धिवैभवेन स व्रातीनः। साप्त
पदीनं सख्यं। ५।२।२२। सप्तभिः पदैरवाप्यते सप्तपदीनं। हैयंगवीनं संज्ञायाम्। ५।२।२३। ह्योगोदोहस्य ह्रियंगुरादेशः विकारार्थे खञ् च निपा
त्यते। दुह्यत इति दोहः क्षीरं ह्योगोदोहस्य विकारः हैयंगवीनं नवनीतं। तस्य पाकमूले पील्वादिकर्णादिभ्यः कुणब्जाहचौ। ५।२।२४। पी
ल्वादीनां पाकः पीलुकुणः। कर्णस्य मूलं कर्णजाहं। पक्षात्तिः। ५।२।२५। मूलग्रहणमात्रमनुवर्तते। पक्षस्य मूलं पक्षतिः॥ ८। ॐ। ८॥

ह्योगोदोहस्येति। गोर्दोहो गोदोहः षष्ठीसमासः तेन सह ह्यस्शब्दस्य सुप्सुपेति समासः। ततो विकारे अनुदात्तत्वलक्षणस्याञोऽपवादः खञ्। अत्र ह्यस्शब्देन कालत्र
यं विवक्षितम्। नवनीतमिति। यद्यपि दधि घृतमित्युक्तं तथैव चामरेणापि। ननु हैयंगवीनं यत् ह्योगोदोहोद्भवं घृतं तदित्युक्तं। तथापि घृतशब्देन नवनीतमेव विव
क्षितमिति हरदत्तग्रंथानुरोधेनेदमुक्तं। तस्य पाकेति। पाकः परिणामः। मूलमुपक्रमः। तस्येदमित्यण्विषये अयमारंभः। जाहचो जकारस्य प्रयोजनाभावान्नेत्त्वम्। पं
गामी। करीरकुणः। ककर्र चम्पा खदिर। पील्वादिः। कर्ण। अक्षि। नख। मुख। केश। पाद। गुल्फ। भ्रू। शृंग। दंत। ओष्ठ। पृष्ठ। कर्णादिः। मूलग्रहणमात्रमिति। एकदे
शे स्वरितत्वप्रतिज्ञानादिति भावः। पक्षतिरिति। प्रतिपत्। पक्षिणां पक्षमूलं च॥ ॥ ॥

नः। वित्तः प्रतीतः। विनोभे गप्रत्ययद्वयोरिति निपातनादुराभ्यां निपातो न रतीनलंनानुप्रनिर्दिष्ट इति। नुड्वः प्रत्ययस्येति च तत्र्येव प्रयोगकरणान्तुड्चुञ्चले
मिति समाधानांतरमप्याहुः। नानाञाविति। नानोञ्जकारेणाप्यर्थः स्वरार्थस्थानन्त इति प्रकृतिविशेषणेन प्रत्ययार्थ इत्याद्ययेनाह। असहार्थ इत्यादि। न
नार्थः स्यात्त्रत्रो दो प्रतिषेधोपक्रतनमर्थगमयतश्चतिसहार्थो गम्येतनुसहस्त्रापितु सहेवेति। तस्मात्प्रकृतिविशेषणमेतच्चव्याख्यानात्कम्पेति यद्येवं स
प्रत्ययार्थो गुविनञोः प्रतिषेधार्थत्वादित्यसिद्धेर्विंगारभरत्यकरत्पादीविगम्यस्यापि प्रतिषेधप्रवत्तिरपि चेति। सत्यं। क्रियावाचिनो विशब्दात्स्वार्थे प्रत्ययो वि

तेन वित्तश्चुञ्चुप्चणपौ। ५।२।२६। पकारः प्रत्यययोरादेशे नुप्रनिर्दिष्टः। तेन च सनेस्संज्ञाविषया विद्यो विद्याचुञ्चुः। विद्याचणः। विनञ्भ्यां नानाञौ न
सह। ५।२।२७। असहार्थे पृथग्भावे वर्तमानाभ्यां स्वार्थे प्रत्ययौ। विना। नाना। वेः शालच्छङ्कटचौ। ५।२।२८। क्रियाविशिष्टसाधनवाचकात्स्वार्थे वि।
शालं। विशङ्कटं। सम्प्रोदश्च कटच्। ५।२।२९। सङ्कटं। प्रकटं। उत्कटं। वा। विकटं। अलाबूतिलोमाभङ्गाभ्यो रजस्युपसंख्यानं। अलाबूनां
रजः। अलाबूकटं। गोष्ठजादयः स्थानादिषु पशुनामभ्यः। गवां स्थानं गोगोष्ठं। सङ्घाते कटच्। अवीनां सङ्घातः। अविकटः। विस्तारे पटच्। अविपटः।
द्वित्वे गोयुगच्। उष्ट्रगोयुगं। षट्त्वे षड्गवच्। अश्वषड्गवं। स्नेहे तैलच्। तिलतैलं। सर्षपतैलं। भवने क्षेत्रे शाकटशाकिनौ। इक्षुशाकटम्॥
इक्षुशाकिनं। अवात्कुटारच्च। ५।२।३०। चात्कटच्। अवाचीनः अवकुटारः। अवकटः। नते नासिकायाः संज्ञायां टीटञ्नाटज्भ्रटचः॥
५।२।३१॥ अवादित्येव। नतं नमनम्। नासिकायानतं। अवटीटं। अवनाटं। अवभ्रटम्। तद्योगान्नासिका अवटीटा। पुरुषोऽप्यवटीटः॥ सापेन। विगा

तत्रोऽनेन सहेति। तस्मात्प्रयोक्तमेव न्याय्यमेतच्चहृदयत्र प्रयोक्तव्यं। स्वार्थ इति। अनिर्दिष्टार्थत्वादिति भावः। संप्रोदश्च। क्रियाविशिष्टसाधनवाचकात्स्वार्थे प्रत्ययः। संक
ते संवाधः रत्यर्थः। प्रकटं प्रख्यातं प्रकाशनमित्यर्थः। उत्कटं उद्भूतं विकटं। विकृतं। रूढशब्दास्त्वेतेनेकार्थं चित्प्रयुज्यन्ते। अलाबूतिलोमादिशब्दभ्यः पंचभ्यः रजस्यभिधेये क
टप्रत्ययो भवति। रजसो विकारत्वाद्विकारे प्रत्ययो नामप्राप्तः। अलाबूकटमिति। योरजमयत्तूनपोरिति मयड्प्राप्तः। तिलकटमिति। असंज्ञार्थानित्यवाप्यमि
द्धमात्रः। क्रमात्शब्दात्परतोऽदिनादेनोदात्ताद्धरातारेवोत्पन्नः। उमोर्णयोर्वेति तु च्छमात्रं भेगाशब्दात्रशधान्यानां चेत्यायमित्यायुदात्तत्वादयमयङ्माधरत्वेन

पूर्वादित्यादिनौ दानन्वमंगीकृत्य न गोष्ठशानादेश्यत्र। अपसंख्यायांशितिस्तपवाम्भामिति मपदुष्मास इत्याह। तच्चातिन्नशब्दस्य प्रनादिनकृत्स्य नेवीजनं चिन्त्यं। तृणस
प्रमाणमितिकिट सूत्रेणायुरात्रसैव न्याप्यनात। तिजाश्च मेरत्यत्रानयैव पचेदे पाशच। गोष्ठ नारस्यरति संपाते कुट जित्याशीन्यसैव प्रपंचनरुदीभयत्रादिश
शरेपशुनामभ्युदति। पशुनो मादिस्यदतिभाष्ये प्रचुरः पाठः। गवांस्थानमिति। तस्थेदमित्यत्रार्थे सर्वत्र गोरजादिप्रसंग इति पूर्तिमासे गोष्ठच। संघातरति।
वयवः समूहः संघातः प्रमृतावयवप्रविस्तारः कटच्यटचौ द्यावपिमामृष्किकानामपचारो। दिन्नैरति। प्रकृत्यर्थेस्यदिन्नैयोमिरत्यर्थः। उष्ट्रगोयुगमिति। इषंगुण
नत्वपचप्रसंघातप्राधान्यादेकवचनं। एवमग्रेपि। नतमिति नपुंसके भावे क्तः। नमनमिति। नी चैस्त्वमित्यर्थः। अवटीटमिति। नासिकासाधनके नमने वर्त
शब्दान्स्वार्थे प्रत्ययः। कथंतर्हि नासिकायां पुरुषे चावटीटशब्दस्य प्रयोग इत्यत आह। तद्योगादिति॥ ७॥ नेर्बिडच्। नतेनासिकायाः संज्ञायामितिवर्त्तते

र्बिडज्बिरीसचौ। ५।२।३२। निबिडं। निबिरीसम्। इनच्पिटच्चिकचि च। ५।२।३३। नेर्बिल्येव। नासिकाया नतेऽभिधेये इनच्पिटचौ प्र-
त्ययौ प्रकृतेश्चिकचिदित्यादेशौ च। कप्रत्ययचिकादेशौ च वक्तव्यौ। चिकिनं। चिपिटं। चिक्कं। क्लिन्नस्य चिल्पिल् लश्चास्य चक्षुषी। क्लिन्नेच
क्षुषी अस्य चिल्लः। पिल्लः। चुल् च। चुल्लः। उपाधिभ्यां त्यकन्नासन्नारूढयोः। ५।२।३४। संज्ञायामित्यनुवर्तते। पर्वतस्यासन्नं स्थलमुपत्य-
नासिकाया नतेऽभिधेये बिडज्बिरीसचौ स्तः। निबिडमिति। तद्योगाच्चिविडा नासिका निबिरीसा। कथंतर्हि नि [का। आरूढं स्थलमधित्यका॥ १८]
केशाः निबिडं वस्त्रमिति। उपमानाद्भविष्यति। एतच्च कासिकायां स्पष्टं। केचित्तु उक्तप्रयोगानुरोधेनेह सूत्रे नतेनासिकायारिति नानुवर्तनीयमित्याचक्ष
तेरिति। निशब्दस्येत्यर्थः। अत्यादेशौ चेति। प्रत्ययोः तत्संनियोगेन यथासंख्यमिमावादेशौ च स्त इत्यर्थः। चिकिनमिति। इनच् प्रत्ययसंनियोगेन चिकादेश
टमिति। पिटच्प्रत्ययसंनियोगेन चिकादेशः। क्लिन्नस्येति। चिल्पिल् इत्येतावादेशौ भवतः। लश्च प्रत्ययः। अस्य चक्षुषी इत्येतस्मिन्नर्थे चुल् च चेति। चा
नुवर्तते क्लिन्नस्य चक्षुषी इति पूर्वोक्तएव विग्रहः। कथंतर्हि सुः क्लिन्नाक्षे चिल्लस्तु ल्लपिल्लोः क्लिन्नेक्षिणि चाप्यमी इत्यमर इति चेदत्राहुः। पुरुषे अत्यादिता
यवेलक्षणया वा ध्वनि अन्येनाहुरस्य चक्षुषी इत्यत्र भस्येति नपदं वक्तव्ये क्लिन्नेच क्षुषी चिल्लपिल्लपुरुषत्वनुमन्तव्यं च। अयं शब्दः प्रसंगादिनेति। उपि

५२८

कारादिह नियतविषयमासनारूढं गृह्यते इत्याशयेनाह। पर्यन्तस्येति। आसन्नं समीपं। आरूढमुच्चस्थानं। उपत्यकेति। अन्यत्रस्यादि तीत्येतु।
त्यकनन्य निषेधस्यानुकृत्वात्॥ ३४॥ कर्मणि घटो सप्तम्यन्तात् कर्मन् शब्दात् घटन इत्यर्थे च प्रत्ययात्। कर्मठ इति। ... सम्प्रत्ययस्य पर
निमित्तत्वाभावात्। नारकितमिति। एवं पुष्पिते। फलितं पुलकितं रोमाञ्चितमित्याद्युदाहार्यं। प्रमाणे द्वयसच्। प्रमाणे विद्यमानात् प्रथमान्तादस्येति नि।
येथं त्रयः प्रत्ययाः स्युः। प्रमाणमिह परिच्छेदकमात्रमतत्रमात्रचा द्वयसच् दघ्नचौ तु ऊर्ध्वमान एव भवतः। प्रथमस्य द्वितीयस्य ऊर्ध्वमाने मतौ ममेति
। ऊर्ध्वावस्थितेन येन मीयते तदूर्ध्वमानं ऊर्ध्वादि। तेनाति पर्वतानारोदृढ द्वयसंदघ्नमित्यादि न प्रयुज्यते। एषां तत्र मुनीनां प्रामाण्यात्। अन्यत्रादि।

मीणि घटोऽठच्। ५।२।३५। घटत इति घटः। पचाद्यच्। कर्मणि घटते कर्मठः पुरुषः। तदस्य सञ्जातं तारकादिभ्य इतच्। ५।२।३६।
कः सञ्जाता अस्य तारकितं नभः। आकृतिगणोऽयं। प्रमाणे द्वयसज्दघ्नञ्मात्रचः। ५।२।३७। तदस्येत्यनुवर्तते। ऊरू प्रमाणमस्य ऊ
द्वयसम्। ऊरुदघ्नम्। ऊरुमात्रं। प्रमाणे लः। समः। दिष्टिः। वितस्तिः। द्विगोर्नित्यम्॥ द्वौ शमौ प्रमाणमस्य द्विशमम्। प्रमाणपरिमा
भ्यां संख्यायाश्च संशये मात्रज्वक्तव्यः। शममात्रम्। प्रस्थमात्रम्। पञ्चमात्राः। वत्वन्तात्स्वार्थे द्वयसज्मात्रचौ। तावदेव तावद्वयसम्।
तावन्मात्रम्॥

त्रमतिदिष्टमत्र द्वयसचोलुगिति प्राचोक्तंनादर्तव्यमित्यवोचाम। प्रमाणे ल इति। लुकः एषा पूर्वाचार्यसंज्ञा। प्रमाणत्वेन येऽत्र
तः परस्यैवायं लुगित्युदाहरति। शमो दिष्टिः वितस्तिरिति। शमः प्रमाणमस्येत्यादि विग्रहः। एवमात्र चोलुक् द्वयोरयोः सम्भवात् शमादीनामनूर्ध्वमानत्वात
त्यमिति द्विगोः प्रमाणत्वात् तेर्वतविध्यभावात् पूर्वेणाप्राप्तो लुग्विधीयते। ननु विकल्प्यस्यास्य कस्य नित्यग्रहणमिह निरर्थकमिति चेदत्राहुः। अनुपदं संशये
मात्रच्। शममात्रमित्यादौ यथा न लुप्यते प्रमाणे लः इत्यस्य प्रमाणे द्वयसजिति यः पूर्वविधिस्तद्विषयत्वादेवं द्विगोरपि न लुप्येत इष्यते च लुक्। द्वौ शमौ स्यातां न
इति। तथा चापि कसंग्रहार्थे नित्यग्रहणमिति। अत्र केचित् द्विगोर्नित्यमित्युक्तेऽपि पुनर्नित्यग्रहणं नित्यार्थमपि कसंग्रहार्थमिति नित्या स्यात्तु शक्यतद्दति वेचि।
त्यार्थं नित्यग्रहणमित्याहुः। शममात्रमित्यादि। शमः स्यादित्येवमादिविग्रहः॥

५३०

हस्तिभ्यामण् च इत्यण्यनपत्य इति प्रकृतिभावः। हस्ती प्रमाणमस्य हास्तिनं। अत्र काशिकायामुक्तं द्विगोर्नित्यं तु कद्विपुरुषमुदकमित्यादि व्याख्यातं च हृ
ष्यपि प्रमाणे द्विगोर्नित्यमित्यस्य नायमनुवादः पुरुषहस्तिनोः प्रमाणादिवत् प्रमाणत्वेनाप्रसिद्धत्वात् तत एव द्विपुरुषद्वयसमित्यादौ प्रमाणे लुगिति तु न भव
स्य पूर्वेण तु विधीयत इति। अत्र व्याख्यातं द्विगोर्नित्यं तु इति पूर्ववचनस्य मुनित्रयानुक्तत्वात् वस्तुतस्तु विधीयमानदृष्टस्यानुमीयत इत्यर्थः। अयं भावः। द्विगोः हस्तिनस्तु
माने पुरुषात् प्रमाणेऽन्यतरस्यामिति ङीब्विकल्पस्य तेनादेवलुक मनुष्यापपनीति। अत्र देतेभ्यः। यावानित्यादि। अत्र सर्वत्राप्यद्वत्ताने डामिश्चाभिति तु मा। अत्र मानस्य वेति
कृत्वादिसंयोगेन त्याणे। प्रमाणदृष्टानुवर्तमाने परिमाणग्रहणं प्रमाणपरिमाणयोर्भेदात् कृतं। तथा च वार्तिकं डावतावर्थवैशेष्यान्निर्देशः पृथक्कृत इति। मानाप
नायभावः सिद्धं स्वतावतोरिति। अस्यार्थः। इह हरात्येवतुपं विधायतस्मिन् परं चानन्तं विहितं। पूर्वं वा योस्तु डावतुं विदधिरेत द्वौ न्यायानिर्देशः पृथक् डावतावितिः। विशे

रुषहस्तिभ्यामण् च। ५। २। ३८। पुरुषः प्रमाणमस्य पौरुषम्। पुरुषद्वयसम्। हास्तिनं॥ हस्तिद्वयसं। यत्तदेतेभ्यः परिमाणे वतुप्। ५।
२। ३९। यत् परिमाणमस्य यावान्। तावान्। एतावान्। किमिदंभ्यां वो घः। ५। २। ४०। आभ्यां वतुप् स्याद्वस्य च घः। कियान्। इयान्। किमः
संख्यापरिमाणे डति च। ५। २। ४१। चाद्वतुप्। तस्य वस्य घः स्यात्। कां संख्या येषां ते कति। कियन्तः॥ ऽऽ यत्तदिति विशेषणस्य भावो वैशेष्यं त

अर्थभेदादित्यर्थः। अर्थभेदस्तु परिमाणं तु सर्वतः। आयाम एव प्रमाणं स्यादिति प्रागेवोक्तमिति भावः। ननु नयोरर्थभेदे सति यावान् प्रायावती रज्जुरित्यादिना
त्र आयामप्रमाणं गम्यते। पशुप्रमानाद् विष्यतीति श्रुतेः तद्दिप्रमाणप्रहणमेवानुवर्त्येतां यावान् धेन्वादिप्रयोगाश्च मुख्याः संतु ये तु परिमाणे प्रयोगाः यावान् धान्यरा
शिरित्यादयस्ते वोपमानाद् भवंतु तत्राह। मात्रादीनि। एतदेतेभ्य इति विशेषविहितो हि वतुप् सामान्यविहितान् मात्रजादीन् बाधेत तेन तन्मात्रमित्यादि न स्यात्। परिमा
णे सति तु भिन्नौपाधिकत्वान्न वतुपः प्रमाणे विहितमात्रजादिभिस्सह बाध्यबाधकभावो नेति भावः। नन्वेवमपि बाधः स्यादेव प्रमाणे द्वयसज्जित्यत्र प्रस्थमात्
रसिद्धये प्रमाणग्रहणस्य परिच्छेदकमात्रपरतया आश्रयणीयत्वात् तेन वतुपो यत्तदेतेभ्यो विहितत्वेन विशेषविहितत्वात् बाधात् तस्माद् यत्तदेतेभ्यो वतुप् एवैव स्यात्
मात्तु परिमाणग्रहणमस्तु च प्रमाणे द्वयसज्जित्यत्र परत्वान्मात्रजादयः सर्वे यावान् धान्यराशिरित्यादिप्रयोगास्तु वैशेष्यपचारविनैव निर्वहनीया परमत्र कुल्लमतश्च

पंचम्यंतं। अर्थभेदे सति यत्वं तान्मात्रजादीनामुत्पत्तिः सिध्यति। तत्परिमाणमस्य तावद्धान्यं राशीकृतं। तावत्परिमाणमस्य कुडुपादेः तावन्मात्रं। यावद्धा
ऽत्या द्रंशं पञ्चेता इह कुडुपादेः पौस्त्यर्थः एकविषयत्वे तु वतुप्यविशिष्टस्य प्रमाणस्यात्काङ्क्षा इह तु तावन्मात्रं तावदेतावत्स्युः। परिमाणविना तत्परिमाणमस्य तदपि प्रमाणं। ज
णाकं जल्पादिपरस्य प्रमाणे तदपि ज्ञानुप्रमाणकमिति यत्तु शाकपत्वात्। एवं च मावत् शब्द एव प्रयुज्येत न तु तावन्मात्रमित्यादि। अन्यथा तत्परिमाणमस्य
तन्मात्रं प्रमाणमस्य तन्मात्रमात्रमित्येवं मात्रजादिभ्यां प्रत्ययमालाप्रसंगात्। किमिदंभ्यां। वतुप्स्यादिति। वकारस्य घविधिसामर्थ्याद्यत्तु घमनुवर्त्य सोऽपि
यत इति भावः। आदेः परस्येत्येव सिद्धे वचनमादेशप्रतिपत्त्यर्थमितरथा घं प्रत्ययान्तरं विज्ञायेत। कियानिति। इदंकिमोरीश्की। यस्येति चेति लोपः
ति। ईशादेशस्य यस्येति लोपे प्रत्ययमात्रमवशिष्यते पदं ति चा उदितवति परस्मिन् प्रत्यये ऽस्यापीनां गतवति चित्ति पंच प्राकृतेऽपि प्रपंचे। स पदि परस्मु

॥ संख्याया अवयवे तयप्।५।२।४२। पञ्चावयवा अस्य पञ्चतयं दारु। द्वित्रिभ्यां तयस्यायज्वा।५।२।४३। द्वयं। द्वितयं। त्रयम्। त्रितयम्॥

नः प्रत्ययोऽयं न तद्विधिरिति मिमीते कोऽयं हरदत्तं पंडितोऽपि। वैयाकरणानामौपनिषदानां च प्रक्रियामात्रमपि प्रपञ्चोऽयमर्थोऽयं श्लोकः। किमः संख्यापरिमाणे डति चेत्यनुवर्तनमेव। सं
ःपरिमाणं परिच्छेदस्तस्मिन् कर्तव्ये प्रत्ययस्तस्मिन्वर्तमानात् किमः प्रथमासमर्थादस्येति षष्ठ्यर्थे डतिः स्यात्। संख्यापरिमाणे किं। ये येमाभूत् का संख्येषामेषां दृश्य
नानां मन्त्राणां नातिमात्रोपजीविनां। सहस्रशः समेतानां परिपठनं न विपश्यतेः स्वैवं संख्येयद्वारेणात्र संख्यायाः कृत्याद्यावा॥४१॥ संख्याया अवयवे। अवयवेन
ऽसंख्यानद्वाचिनः प्रथमान्तात्समर्थादस्येति षष्ठ्यर्थे तयप् स्यात्। यं प्रत्ययं तयपः सोऽवयवोऽवयवी प्रत्ययार्थः। अस्य स्थाने स्यादिकारान्ता। पथ्यादयमजादिषु प्रमाणे प्रकृत्यर्थे प्रमेयं प्रत्ययार्थे
चयमिति। ननु च यथा द्वयपदा नेतत्त्रयं स्यात् त्रमिति प्रयोगे संभवत्यपि ऋनिवर्णानि प्रयोगेन संगच्छते। अन्यपदार्थस्यावयविनो भावादिति चेत् ऽस्यादु
येनत्र समुदायपरवस्तावानिरिक्तो वा न तिरिक्तोऽयमिति विचारणीयं एवं च समुदायस्यातिरिक्तस्य पदार्थोऽपि समुदायपरकत्वेन मुनीनां प्रत्यभिज्ञानानां नित्रयनम

दात्तो नित्यं। एवं चितरत्ननेनैवांतोदात्तत्वं सिद्धं सर्वोदात्तत्वं तु यदनुदात्तं पदमेकवर्जमिति वचनाद्बाधितं नच उभयेति संबुध्यंते आमंत्रिताद्युदात्तत्वं बाधितुं वचनमि
दं परस्वादपवादन्यायेन चित्स्वरस्यैव बाध्यता नत्वामंत्रिताद्युदात्तत्वस्येति सूत्र चनात्। तस्माद्युदात्तवचनसामर्थ्यादादेरेवायं प्रयुज्यते न तत्र उभयं शृगाय्वबन्य
तत्वस्य च स्वमभिधेयत्वाह सूत्रेति। तदस्मिन्। पुनरुक्तदृढगामस्येति यच्छंतसंबध्यत दुरणनिरासार्थं। प्रत्ययविधौ नतदंतविध्यभावादाहार्दशांतादिति। अंत ग्रहणा
दधिका व्यस्मिन्शते। ननेहृत्यपदेशिवद्भावेन दशांतत्वमस्तीति वाच्यं। व्यपदेशिवद्भावो प्रातिपदिकेनेत्यभ्युपगमात्। यदंतग्रहणं प्रत्ययग्रहणपरिभाषया नैवसिद्धैति
त्ययविधिषु तदादेरेव तदंत तस्येति परिभाषया न तदादिनियमः स्यात्। तंवारयितुमंतग्रहणं। तेनैकत्रिंशमेकचत्वारिंशमित्यादि सिद्धं नेन्वेवं गोविंशत्युक्तं अधि
भादुदात्तो नित्यम्।५।२।४४। उभशब्दात्तयपोऽयच् स्यात्। सचाद्युदात्तः। उभयम्। तदस्मिन्नधिकमिति दशांताड्डः।५।२।४५। एकादश अधिका अ
स्मिन्नेकादशं शतं सहस्रं योरेव ध्यते। नेह। एकादश अधिका अस्यां विंशतौ प्रकृतिप्रत्ययार्थयोः समानजातीयत्वमेवेष्यते। नेह। एकादश माषा
अधिका अस्मिन्सुवर्णशते। शदंतविंशतेश्च।५।२।४६। डः स्यादुक्तेऽर्थे त्रिंशदधिकायस्मिन्त्रिंशं शतम्। विंशं। संख्याया गुणस्य निमाने मयट्।५।
२।४७। भागस्य मूल्ये वर्तमानायाः प्रथमान्तायाः संख्याया वाचिनः षष्ठ्यर्थे मयट् स्यात्। यवानां द्वौ भागौ निमानमस्योदश्विद्भागस्य द्विमयमुदश्विद्यवानां
गुणस्येति किं। द्वौ व्रीहियवौ निमानमस्योदश्वितः। निमाने किम्। द्वौ गुणौ क्षीरस्य एकस्तैलस्य द्विगुणं क्षीरं पच्यते तैलेन॥ गोयशतेदृत्नादातिप्रसंग
संख्यायाः अवयवे तयप्। इत्यतः संख्याग्रहणमनुवर्तते। अंतग्रहणमिह विंशतिशब्दानंतरं कर्तव्यं। शदिंशत्यंताच्चेति तेनैकविंशं शतमित्यादि सिद्ध्यत्यन्यथा प
रिनिरदंतविधिप्रतिषेधादिह न स्यात्। संख्याया गुणस्य। गुणो भागः निमीयते क्रीयते नेनेति निमानं मूल्यं मिङ् प्रक्षेपणादानं इत्यस्मात्पूर्वान्तर गोल्युट्। तदाह भागस्य
तिथकर्थे इति। यद्यपि तदस्मिन्नधिकमित्यत इत्यनुवृत्तौ प्रथमांतादित्ययमेवार्थो लभ्यते तथापि डुरुजु स्यात् तदस्य संजातमित्यत्र तदस्येत्यनुवर्तते ना
र्थेन तदपि चलभ्यन्तदृति भावः। द्विमयमिति। द्विशब्दस्य संबंधिशब्दत्वेन नित्यसापेक्षत्वाद्यवानामिति परेणापि न द्वित्वेन त्रिविद्या विरुद्धेति चेन्न नेवमपि मन्य
षि च्चद्देन सामानाधिकरण्यं दुर्लभं यावतोदश्विद्भागे प्रत्ययो विहितो नोदश्विति। अत्राहुः। भागेऽपि विधीयमानः प्रत्ययः अभिधानस्वाभाव्यात् भागवंतमाच

णारणादेकत्वं गुणाशेत्वत्र विवक्षितं। तेनेह न भवति। यवानां द्वौ भागौ निमानमेषामुदश्वितस्तु यवाणां भागानामिति। भूयसस्तु वाचिकायाः संख्यायाः प्रत्य
हून भवति। एको भागो निमानमस्येति। भूयस इति। भूयसस्तिचप्रत्ययार्थोराधिक्यमानेन कत्वं यस्य विवक्षितं ननु यद्भूर्त्वेन द्विराव्यादपि भवत्येव। एकभागस्य पूरणो।
हुत्वानुकरणमेकत्वं त्वविवक्षितं। एकस्य पूरणासंभवात्। पूर्यतेऽनेनेति पूरणः। एवं तान्तरयोस्तु द्व एकादशानामिति। डटुनाऽवयवभेदः समुदायः प्रकृत्यर्थ
स्य चः प्रत्ययार्थः। इह यस्मात्संख्यावाचिनः प्रत्ययविधिस्तदीयप्रवृत्तिनिमित्तस्य एकादशत्वादेः पूरणे प्रत्ययः। यथाऽतिशायने यान्ये इत्यादिषु प्रवृत्तिनिमित्तस्य वाति
शयः पूर्यते चान्तरंगत्वात्तत्प्रत्ययः। तेन एकादशानां पदानां पूरणो जलादिरित्यत्र नातिप्रसंगशंका नेयोपीति भावः। ननु प्रवृत्तिनिमित्तस्य पूरणे प्रत्ययश्चेत्तर्हि
स्य पूरणाद इति विग्रहो वक्तुं युक्त इति चेदत्राहुः। वैयाकरणपाश इत्यत्र यथा पाश्यो वैयाकरणादिति विग्रहः। नतु यावच्चैयाकरणत्वमिति न यथाऽपि वोध्यमिति

तस्य पूरणे डट्। ५।२।४८। एकादशानां पूरण एकादशः। नान्तादसंख्यादेर्मट्। ५।२।४९। डटो मडागमः स्यात्। पञ्चानां पूरणः पञ्चमः।
नान्तात्किं। विंशः। असंख्यादेः किं। एकादशः। षट्कतिकतिपयचतुरां थुक्। ५।२।५१। एषां थुगागमः स्याड्डटि। षण्णां पूरणः षष्ठः। कतिथः। कतिपयशब्दस्या
संख्यात्वेऽप्यत एव ज्ञापकाड्डट्। कतिपयथः। चतुर्थः। चतुरश्छयतावाद्यक्षरलोपश्च। तुरीयः। तुर्यः। बहुपूगगणसंघस्य तिथुक्। ५।२।५२। डटीत्येव।
पूगसंघयोरसंख्यात्वेऽप्यत एव डट्। बहुतिथः। इत्यादि। वतोरिथुक्। ५।२।५३। डटीत्येव। यावतिथः॥ ॥ वचनक्रमेणाप्याद्येषु गम्यमानेपूरणे द्विरादेर्नित्यम्बा
संगणस्य तेन त्रयाणामप्यष्टमो भवत्येव। नान्तादसंख्यादेरुदाहरणमिति। डडिति प्रथमान्तस्यानुवृत्तस्य नान्तादिति पंचम्या षष्ठी कल्प्यत इत्यभिप्रायः। पंचमीह मटः प्रत्ययत्वेऽपि न ष
प्युत तत्र मडागमत्वमेवाभ्युपगन्तव्यं। अनुदात्तत्वार्थत्वात्प्रत्ययत्वे त्वेषा श्रुतात्स्यात्तन्नाथ चैकरूप्ये गौरव संदर्भव्याख्यानमुचितं। अन्येषां तु मटः प्रत्ययत्वे न च
तो मकारो विधेयः। आगमत्वे तु मकारमात्रमिति लाघवमस्तीति। विंश इति। विंशतेः पूरणः। ति विंशतेर्डितीति लोपः। षट्कतिरहस्यत्री निर्देशत्वात् पञ्चानामागमि
नामिति तदनुकूल्येनानुवृत्तो डट् सप्तम्या विपरिणम्यते तदाह। डटीति। इद्दयवयुद्धन कृतः। षष्ठेष्वकारस्य जश्त्वप्रसंगात्। चतुर्थे रेफस्य विसर्गप्रसंगाच्च। नन्वे
दितिक्रतेऽपि दृश्यपरमुगेव विधीयतामिति वाच्यं। पंचमः सप्तम इत्यादौ नलोपाभावापत्तेः। चतुरश्छयताविति। विशेषविहिताभ्यामपि कश्यश्यां डट् प्रत्ययो न बाध्यते

…रेति। अचसहितं व्यंजनमसारशब्देनोच्यते। अच्सहितस्यादेर्व्यंजनस्येत्यर्थः। व्यंजनसहितस्यांदस्य इति व्याख्याने तु द्विर्वचनन्यायेन नकारस्यापि लोपः
…हस्तः। आदेर्व्यंजनस्येति व्याख्याने प्रमाणं तु द्वितीयतृतीयेति सूत्रे तु यांगीतिनिर्देशो बोध्यः॥ ॥ द्वेस्तीयः। डटोऽपवाद इति। डटः स्थाने एस्तु न भवति द्वितिटि
… प्रसज्यादिति याश्विनेतिनिर्देशानुपपत्तेः। अत एव निर्देशाद्द्विशब्दस्याप्यादेशो न भवति। तृतीय इति। रेफस्य ऋकारः संप्रसारणं। हल इति दीर्घस्तु न
…लोप इति सूत्रात् दृशादृल्यनुवृत्ते नेत्युक्तं तिनोक्तं प्रत्ययो माभिद्यपीति। विंशत्यादिभ्यः। इह प्रत्यासत्त्या पंक्त्यादिसूत्रे निपातितानां विंशत्यादीनां ग्रहणेन लोकप्र
…विप्रसिद्धानामिति भाष्यमतं। इति कृतानु विंशत्यादयो लौकिका एव संख्याशब्दा गृह्यंते न पंक्त्यादिसूत्रनिर्दिष्टा इत्यतः द्वेद एकविंशतिप्रभृतिभ्यो न स्यात्
…तामा प्रातिपदिकेन तदंतविधिप्रतिषेधात्। एवं च सति षष्ट्यादेश्चासंख्यादेरिति निषेधो व्यर्थः स्यात् एवं तु कोऽस्येकविंशतितम इति। यद्यपि भाष्यमतेन तदं

…तीयः। ५।२।५४। डटोऽपवादः। द्वयोः पूरणो द्वितीयः। त्रेः संप्रसारणं च। ५।२।५५। तृतीयः। विंशत्यादिभ्यस्तमडन्यतरस्याम्। ५।२।५६।
…णो डट् तस्य तमडागमो वा स्यात्। विंशतितमः। विंशः। एकविंशतितमः। एकविंशः। नित्यं शतादिमासार्धमाससंवत्सराच्च। ५।२।५७। शतस्य पू
…रणः शततमः। एकशततमः। मासादेरत एव डट्। मासतमः। षष्ट्यादेश्चासंख्यादेः। ५।२।५८। षष्टितमः। संख्यादेस्तु विंशत्यादिभ्य इति विकल्प ए
व। एकषष्टः एकषष्टितमः॥

…नैभयत्र यद्यपि षष्ट्यादेश्चेति सूत्रे संख्यादिपर्युदासो ज्ञापयति इह प्रकरणे तदंतानामपि ग्रहणमिति एवं च सति एकान्नवि
…ंशाः एकान्नविंशतितम इत्यपि सिध्यति लौकिकानां ग्रहणमिति पक्षे तु नैतत्सिध्येत् विंशतिसंख्यातः प्राग्भावित्वादस्याः संख्यायाः एतन्नवैकपदं द्वंद्वतत्पुरुषं
…] नन्वनारंभो वा प्रातिपदिकविज्ञानाय यथा सहस्रादिष्विति वक्तव्यं नैतत्कात्यायनेन पंक्त्यादिसूत्रस्य प्रत्याख्यातत्वात् तत्र निपातिताः विंशत्यादयो गृह्यंत इति भा
…ष्ययुक्तमिति वेदितव्यम् आहुः यद्यपि प्रत्याख्यातं तथापीहार्थमावश्यकं तत्। अत एव तत्र भाष्यकृता नासूया कर्तव्या यत्नानुगमः क्रियते इत्युक्तम् अतः कात्यायनोक्तप्र
…त्याख्यानं कर्तव्यमिति। शततम इति। यद्यपीदं षष्ट्यादेश्चेत्युत्तरसूत्रेणैव सिध्यति तथापि संख्यापूर्वे नित्यं शतादीनामावश्यकमिति ध्वनयन्नुदाहरति एकशततम इति।
…ति। संख्यावाचिनाभावेपीति भावः षष्ट्यादेश्चेति। विंशत्यादिभ्य इति विकल्पे प्राप्ते नित्यार्थोऽयमारंभः। संख्यादेस्त्विति एतच्च व्याख्यानादेव ध्यं नित्यं शतादीत्युक्त्वानन्त

मत्वर्थ इति। मतोर्विषय इत्यर्थः। तेनेति प्रथमासमर्थविभक्तिरस्यास्मिन्निति पञ्चम्यार्थे चेह लभ्यते। विधानसामर्थ्यादिति। मतुप्प्रकरणाच्चास्मिन्न
पदत्वास्य लुग्विधानं तन्त्र्यादिकल्लुकमनुमापयतीति केचित्। तत्र कुशलः सप्तमीसमर्थात्पथिन् शब्दात्कुशल इत्यर्थे वुन् स्यात्। आकर्षादिभ्यः कन्। वुना।

ोच्छः सूक्तसाम्नोः। पा। ५। २। ५९। मत्वर्थे छः स्यात्। अच्छावाकशब्दोऽस्मिन्नस्ति। अच्छावाकीयं सूक्तं। वारवन्तीयं साम। अध्यायानुवा
कयोर्लुक्। पा। ५। २। ६०। मत्वर्थे यश्छस्तस्य लुक् स्यात्। अत एव ज्ञापकान्तत्रच्छः। विधानसामर्थ्याच्च विकल्पेन लुक्। गर्दभाण्डः। गर्दभाण्डीयः। विमुक्तादिभ्योऽण्। पा। ५। २। ६१। म
त्वर्थेऽध्यायानुवाकयोः। विमुक्तशब्दोऽस्मिन्नस्ति वैमुक्तः। दैवासुरः। गोषदादिभ्यो वुन्। पा। ५। २। ६२। मत्वर्थेऽध्यायानुवाकयोः। गोषदकः।
इषेत्वकः। तत्र कुशलः पथः। पा। ५। २। ६३। वुन् स्यात्। पथि कुशलः पथिकः। आकर्षादिभ्यः कन्। पा। ५। २। ६४। आकर्षे कुशल आकर्षकः। आक
र्षादिभ्य इति रेफरहितो मुख्यः पाठः। आकर्षो निकषः। धनहिरण्यात्कामे। पा। ५। २। ६५। कामः इच्छा। धने कामो धनको देवदत्तस्य। हिरण्यकः। स्वाङ्गेभ्यः प्रसि
ते। पा। ५। २। ६६। केशेषु प्रसितः केशकः। तद्रचनायां तत्पर इत्यर्थः। उदराट्ठगाद्यूने। पा। ५। २। ६७। अविजिगीषोऽष्ठक् स्यान्नोपचारः। बुभुक्षया
ऽन्नपीडित उदरे प्रसित औदरिकः। आद्यूने किम्। उदरकः। उदरपरिमार्जनादौ प्रसक्त इत्यर्थः। सस्येन परिजातः। पा। ५। २। ६८। कन् स्यात्।
गुरुकः। सस्यशब्दो गुणवाची न तु धान्यवाची शस्येनेति पाठान्तरं। सस्येन गुणेन परिजातः सम्बद्धः सस्यकः साधुः॥ अंशं हारी। पा। ५। २।
६९। हारीत्यावश्यके णिनिः। अत एव तद्योगे षष्ठी न। अंशको दायादः। तन्त्रादचिरापहृते। पा। ५। २। ७०। तन्त्रकः पटः। प्रत्यग्र इत्यर्थः। ब्राह्मणकोष्णिके
संज्ञायाम्। पा। ५। २। ७१। आयुधजीविनो ब्राह्मणा यस्मिन्देशे स ब्राह्मणकः॥ अल्पमन्नं यस्यां सा उष्णिका यवागूः। अन्नशब्दस्य उष्णादेशो निपात्यते॥ ४॥

अहर्गांसम्भृतिं तार्थे च शानिकः शाकुनिकः सारुकः मुख्यः पाठ इति। आकर्षत्यस्मिन् सुवर्णादिकमित्याकषः। पुंसि संज्ञायामिति घः। आकर्षादिभ्य
र्कं पठन्ति नेषा आकर्षदिति॥ धनिरूपमिति हरदत्तेनोक्तत्वादिति भावः॥ धने काम इति॥ तत्रेत्यनुवर्तनात्सप्तम्यन्तात्प्रत्यय इति भावः॥

५३६

। थापूनगन्त्वार्थमाह· अविजिगीषाविति। द्वियोर्विजिगीषावामिति नत्रैव निद्वानतन्त्वविधानात्। सस्येन। कर्त्तरि तृतीयेयं। परितोऽस्यातः परिजा
माह। सेवक इति जनएवेति। श्रके नो विति निषेधादिति भावः। तेनत्रान्। नन्नूंतं तयोः श्लिवितित्युपस्यान्तं तं तंतु वायशब्दाक्य अचिरः कान्तो अपल
चिरापततस्मिन्। कान्ताः परिमाणिनेतिसमासः। प्रत्यग्र इति। नूतनइत्यर्थः। ब्राह्मणकोणिकं। ब्राह्मण शब्दापृषजीविनोपाधिकाव्यवमानान
कन् प्रत्ययोनिपात्यते। अन्त शब्दानुपपन्नत्वोपाधिकान्। नशाह्न आयुधेत्यादि॥ ॥ शीतोष्णाभ्यांशीतनुमिव शीतंमंद मित्यर्थः। शीतेसतिकार्यं कर
णाभावात्। उष्णमिवोष्णं शीघ्रमित्यर्थः। क्रियाविशेषणाभ्यांद्वितीयान्ताभ्यांप्रत्ययः। कर्योगलक्षणाषष्ठीतुक्रियाविशेषणान्नेत्युक्तं। मुख्यार्थेतु इति
नोष्णाभ्यांकुर्वित्ति। ५।२।७२। शीतकरोतीतिशीतकः अलसः। उष्णंकरोतीति उष्णकः शीघ्रकारी। अधिकम्। ५।२।७३। अध्यारूढ
शब्दात्कन् उत्तरपदलोपश्च अनुकाभिकाभीकः कमिता। ५।२।७४। अन्वभिभ्यांकन्। अभेःपाक्षिकोदीर्घश्च। अनुकामयते। अनुकः। अभि
कामयते। अभिकः अभीकः। पार्श्वेनान्विच्छति। ५।२।७५। अनृजुरुपायः पार्श्वंतेनान्विच्छतिपार्श्विकः। अयः शूलदण्डाजिनाभ्यांठक्
ठञौ। ५।२।७६॥ तीक्ष्णउपायोःयः शूलंतेनान्विच्छति आयः शूलिकः साहसिकः। दण्डाजिनंदम्भः। तेनान्विच्छतिदाण्डाजिनिकः॥ ८॥
त्ययोनभवत्यनभिधानात्। अधिकं। अध्यारूढशब्दादिति। गमधर्थाकर्मकेत्यादिनारुहेः कर्त्तरिकर्मणिवाक्तोविहितः। यथेतप्रत्ययेनकर्मणोऽनभिहि
अध्यारूढशब्दयोगेद्वितीया। अध्यारूढोद्रोणःखार्यामिति। ग्रामंगतइतिवत्। तथाप्यधिकशब्देनापियोगेद्वितीयापाप्राप्तायस्मादधिकंतदस्मिन्नधिकमि
त्याहस्यानपंचमीसप्तमीभवतः। अधिकोद्रोणःखार्याः अधिकोद्रोणःखार्यामिति। द्वितीयंतुक्तेनकर्मणोऽभिहितत्वान्नभवति। अधिकशब्दस्तुसंयोगेनकर्मणोऽभिहि
सप्तमीसप्तम्याविहतएकनीये। अनुकः। समाहारद्वंद्वेसौत्रंपुंस्त्वं। कमितेति। गन्तृत्यय्पुरिति फलितोऽर्थः। अन्वभिभ्यांकनिति। क्रियाविशिष्टसाधनवाचिभ्यांस्वार्थेनि
त्यर्थः। पार्श्वेनान्विच्छति। आर्जवादिच्छःकश्चिदयतः कनुवर्तते। अनृजुरितितिर्यगवस्थानात्पार्श्वमनृजुत्वाधर्म्याद्उपायोऽपि इह शीतोष्णपार्श्वेऽयःशूल
दण्डाजिनशब्दाः गौणाएव गृह्यन्ते मुख्यार्थेभ्यस्तुप्रत्ययोनभवत्यनभिधानात्॥ ॥

यं ग्रहणमिति लुग्वा। तावतां पूरणानां वृत्तिर्यं। षष्ठो भिक्षुकस्य यानस्य पञ्चमित्यत्र तस्येति षष्ठ्यन्तं मानानां सामान्यनिर्देशस्य व्याख्यानार्थमिति। पूरण
नां सामान्यनिर्देशः। यत्नं तरां वृपिटकठकौ नानुवर्तेते अत एव तिलाद्विवित्यमिमित्याह कन्स्यादिति पूरणप्रत्ययस्येति। ननु कनः लुग्वा ग्रहणानर्थक्यप्रसङ्गा
त्रमकमिलादिरूपं हि तेन साध्यात एवं विभाषा पिकार त्रिकस्तेन कन उत्पत्ता। सिद्धमेव तस्मात्पूरणप्रत्ययस्येव तु स्वरूपं कारस्याभिमतमिति व्याचष्टे
ति। वार्त्तिककारस्तु कन एव लुगिति व्याख्यामभिप्रेत्य तावतिथं ग्रहणमिति लुग्वा वचनानर्थक्यं विभाषा ग्रहणादित्याह। तन्मते द्वितीयकं द्वितीयमित्येव

वतिथं ग्रहणमिति लुग्वा। ५।२।७७। कन्स्यात्पूरणप्रत्ययस्य च लुग्वा। द्वितीयकम् द्विकं वा ग्रहणं देवदत्तस्य द्वितीयेन रूपेण ग्रहणमित्यर्थः। ता
ति येन रूपेण गृह्णाति तिकन्कन्योर्नित्य त्वलुक्। पञ्चकेन रूपेण गृह्णाति पञ्चकं देवदत्तः। षष्ठकः। स एषां ग्रामणीः। ५।२।७८। देवदत्तो मुख्यो येषां ते देवदत्त
काः। नरकाः। मत्काः। शृङ्खलमस्य बन्धनं करभे। ५।२।७९। शृङ्खलकः करभः। उत्क उन्मनाः। ५।२।८०। उद्गतमनस्क उद्गतमनस्को वा अस्मादेव निपातनात्
त्र क्षणिकतः। कालप्रयोजनाद्रोगे। ५।२।८१। कालवाचिनः प्रयोजनवाचिनाच्च कन्स्याद्रोगे। द्वितीयेऽहनि भवो द्वितीयको ज्वरः। प्रयोजनं कारणं
स्य फलं वा। विषपुष्पैर्जनितो विषपुष्पकः। उष्णं कार्यमस्य उष्णकः। रोगे किम्। द्वितीयो दिवसोऽस्य। तदस्मिन्नन्नं प्राये संज्ञायाम्। ५।२।८२। प्रथमान्तात् च
मर्थे कन्स्यात्। यत्प्रथमान्तं चेत्प्रायविषयमन्नं। गुडापूपाः प्रायेणान्नमस्यां गुडापूपिका पौर्णमासी। वटकेभ्य इनिर्वाच्यः। वटकिनी। कुल्माषादञ्
५।२।८३। कुल्माषाः प्रायेणान्नमस्यां कौल्माषी। श्रोत्रियश्छन्दोऽधीते। ५।२।८४। श्रोत्रियः। वेत्यनुवृत्तेश्छान्दसः। श्राद्धमनेन भुक्तमिनिठनौ। ५।२।८५॥

दिकमिति वाच्यं। तावतिथं नेति। पूरणप्रत्ययान्ताद्ग्रहणोपाधिकात्स्वार्थे विधीयमानो ग्रहीतस्मिन्प्राप्नोतीति वचनमिति किं पदं समर्थं श्राद्धी। श्राद्धिकः॥ ६॥
ग्रामणीनीति पुंसि स्त्रियां च ग्रामाधिपे त्रिष्विति अमरः। करभ इति। उष्ट्रबालकः। द्वितीयेऽह्नीति। यद्यपि द्वितीयशब्दः कालवाचीन भवति तथाप्यर्थप्रकरणादिना ह्नि
वर्तेन दिनभावः। ननु मासादाजां वा त्रिभ्यो मासादिभ्यो न भवति द्वितीयादिभ्यस्तु भवतीत्यत्र किं मानमिति चेदत्राहुः। उत्तरसूत्रस्य संज्ञाप्रकर्षेणाच्छन्दस्समाचारात्
ति वटकेभ्य इति। किनिप्रत्यासेवचनं। ननु संज्ञाग्रहणाल्लाभविष्यतीति चेन्न। इनेः प्राप्त्यानर्थक्यं वचनमेतोपेक्ष्यं मेना न्यायतः इनिः कृता विनिर्गत्य कथं विहितिः सिध्यतां

ऽधीते सः श्रोत्रियो भवति। अत्र भाष्ये छंदोधीत इत्यस्य वाक्यस्यार्थे श्रोत्रियन्निपात्यते तत्परं निपात्यते इति वाक्यार्थे पदवचनेन पक्षः। छंदसो वा श्रोत्रभावो निपात्यं न
न्तेन सिद्ध्यर्थं पक्षप्रत्यय इति पक्षांतरं च स्थितं। व्याख्यातं च कैयटेन वाक्यार्थस्य संबंधरूपस्य क्रियारूपस्य वाच्यस्याननुरूपत्वात्। श्रोत्रियशब्दस्य च सत्त्वरूपार्था।
नाद्वाक्यार्थग्रहणेन तदा अयमसुंदरो व्याख्यानमभिधीयत इति निरुक्तं शास्त्रमर्थः यः श्रोत्रियो भवति निपुणं शास्त्रं वेदं त्वनुरुगो विति। तावता छंदोग्रहणमिति तु मं
ग्रहमनेन। अद्यास्मिन्नस्तीति श्राद्धं। मत्वार्थश्चात्र तद्भोजनं। यद्यपि श्राद्धं कर्म श्राद्धशब्देनोच्यते। तथापीह तत्साधनद्रव्यमुच्यते मुख्यस्य श्राद्धस्य भोक्तुमशक्यत्वात
ठिक इति। अथ केनैव अयं प्रत्ययः कस्मिन्नर्थे आह्निक इति भाष्यम्॥ पूर्वादिनिः। पूर्वमिति क्रियाविशेषणात्तद्धितो यांतात्प्रत्ययः। अनेनेति कर्तृवाचकमनुव
क्रियायोगेन रेणाकर्ता संभवतीति कांचित् क्रियामध्याहृत्य तस्य योविधेयत्वात् आह पूर्वं कृतमनेनेति। सपूर्वाच्च। अनेनेति पूर्वं सूत्रमनुवर्तते। विद्यमानपूर्वा।
पूर्वादिनिः। ५।२।८६। पूर्वं कृतमनेन पूर्वी। सपूर्वाच्च। ५।२।८७। कृतपूर्वी। इष्टादिभ्यश्च। ५।२।८८। इष्टमनेन इष्टी। अधीती। छन्दसि परि
पन्थिपरिपरिणौ पर्यवस्थातरि। ५।२।८९। लोके तु परिपन्थिशब्दो न न्याय्यः। अनुपद्यन्वेष्टा। ५।२।९०। अनुपदमन्वेष्टा। अनुपदी। साक्षाद्द्रष्टरि
संज्ञायाम्। ५।२।९१। साक्षाद्द्रष्टा साक्षी। क्षेत्रियच्परक्षेत्रे चिकित्स्यः। ५।२।९२। क्षेत्रियो व्याधिः शरीरान्तरे चिकित्स्यः। अप्रतीकार्य इत्य
शब्दादनेनेत्यस्मिन्नर्थे इनिः स्यात्। पूर्वं तावदनेनेत्येतत्फलितम्। कृतपूर्वीति। कृतपूर्वशब्दयोः सुप्सुपेति समासः। इह प्रातिपदिकाधिकारात्पूर्वादिनिरित्य
त्र शब्दात्तथा निपरिकात् तत्कृतपूर्वशब्दाद्विनो सिद्धे सपूर्वाच्चेत्येतत् ग्रहणान्नाप्रातिपदिकेन तदन्तविधिर्नेति परिभाषां ज्ञापयति। कृतपूर्वीत्येन सिद्धे पूर्वान
केनेतेनेत्यपदेशिवद्भावेन पूर्वीत्यपि रूपे सिद्धे पूर्वादिनिरित्येतत् व्यपदेशिवद्भावोऽप्रातिपदिकेनेति परिभाषां ज्ञापयति। छंदसि। पर्यवस्थातृशब्दान्म
त्वार्थे इनिः प्रत्ययः। अवस्थातृशब्दस्य पंथपरणतादेशो निपात्यते। अपपंथं परिपंथिनं मान्यपरिपरिणो वृकेरन्। उभयत्रापि परिशब्दस्य चग्रहः। लोके
तु परिस्थिन परिपंथिभिः पार्थिवैर्विमार्गो अनुपद्यन्वेष्टा। अन्वेष्टरि इनिप्रत्ययो निपात्यते। अनुपदमिति पदस्य पश्चात्। पश्चादर्थेऽव्ययीभावः। अनुपदी।
परापेक्षया पश्यी। गोपदान्यादायान्वेष्टा गवामेव। तेन न हिरण्यादान्वेष्यं न भवतीति हरदत्तः। साक्षाद्द्रष्टरि। साक्षाद्द्रष्टर्यर्थे इनिः स्यात्। साक्षाच्छब्दोऽव्ययं तेन प्र

स्यैवैपं च स्यात्तु कुरस्यासंभोः अथवा चानं च नेत्याशी तु प्रकृतिवदित्यतिदेशस्य चैकस्मिं कार्ये नाथ्यपत्याभावात पंचम्यात्तु ङ् न भवतीति बोध्यं । मार्वीति ॥
नीन मार्न्यदीति दिन्नोपः यद्यपि सास्य द्वन्द्वस्य यो भवति दानाग्रहीतात् उपदृष्टान्तः। तथापीह संज्ञाग्रहणान्न सामिशब्देनोपद्रष्टैवोच्यते इत्याहुः श्रोत्रियश्चापर
न्यसमन्नाहृत्य परशब्दस्य लोपश्च निपात्यत इति मनोरमा। अन्ये तु परक्षेत्रे चिकित्स्य इत्यर्थे क्षेत्रियजिति निपात्यते वाक्यार्थे परवचने श्रोत्रियवदित्यपा
न्यत्रा पूर्याणि त्रियो व्याधिरिति। किंच क्षेत्रियं विषं यत्परशरीरं संक्रम्य चिकित्स्यते। अपिच क्षेत्रियाणि तृणानि। यानि सस्यानि सस्यार्थं क्षेत्रे जातानि चि
विनाश्यानि स्यानि। किंच क्षेत्रियः पारदारिकः परदाराः परक्षेत्रं तत्र चिकित्स्यो निग्रहीतव्य इत्यर्थः इत्यन्ये पदाव्याकारेस्थिताः ॥ ॥ इंद्रियमिंद्रलिं। इंद्रशब्दात्

इयमिन्द्रलिङ्गमिन्द्रदृष्टमिन्द्रसृष्टमिन्द्रजुष्टमिन्द्रदत्तमिति वा। ५।२।९३॥ इन्द्र आत्मा तस्य लिङ्गं करणेन कर्तुरनुमानात् इति करणाः अक्षा
णि। इन्द्रेण दुर्ज्जयमिन्द्रियम्। तदस्यास्त्यस्मिन्निति मतुप्। ५।२।९४। गावो स्यास्मिन्नासन्ति गोमान्। भूमनिन्दाप्रशंसासु नित्ययोगेतिशायने सं
बंधे ऽस्तिविवक्षायाम्भवन्ति मतुबादयः। १। रसादिभ्यश्च। ५।२।९५। मतुप्। रसवान्। रूपवान्। अन्यमत्वर्थीयनिवृत्त्यर्थं वचनम्। र
सपर्णगन्धस्पर्शशब्दस्नेह गुणात् सकाचः। स्वावान्। गुणग्रहणं रसादीनां विशेषणम्। तसौ मत्वर्थे। १।४।१९। नानसानो भसंज्ञौ।
त्वर्थं प्रत्यये परे। वसो रसस्य सारणो विदुष्मान्। गुणावचनेभ्यो मतुपो लुगिष्टः। शुक्लो गुणोस्यास्ति शुक्लः पटः। कृष्णः॥ ११ च इंद्रेण दृष्टं ज्ञातंमम

मोत्र मिष्या दिक्रमेण समरूपमरण्डव्याणात्तुरं भीमितं तं से वितं चार तं प य या यथं विषयेभ्यः रूढिशब्दोयं कथं चिन्न स्यात्तारितः। तदस्यास्त्यस्मिन्निति मतुप्। तदिति प्र
थमान्त यः। अस्तीति पुरुषवचनेऽस्य विवक्षितं कालस्तु विवक्षितः। धनेगते भाविनि वा धनवानयमिति प्रतीत्यभावात्। इतिशब्दो विषयविशेषनार्थंस्त चाह॥
भूमनिंदाप्रशंसासु नित्ययोगेतिशायने। संसर्गेऽस्तिविवक्षायां भवन्ति मतुबादयः। अस्तिविवक्षायामेव मतुबादयो विधीयंते ते च भूमादिषु विषयेषु भवंतीति वार्तिकार्थः भू
म्नाचापेक्षिकं पश्वादिकं बहुत्वं तेनाल्पं च बहुत्वबोधकं बहुशब्देनापि प्रतीयते। यथा पंचषाभिरपि गोभिर्ईश्वरत्वस्य दृष्ट्या गावः सन्तीति व्यवहारः। राज्ञस्तु सहस्र
गोः स्यादिति व्यवहारः। गोमान्। यवमान् यस्य सार्थोविभिः परिच्छिन्नाः यवाः संति सयवमुच्यते। ननु सहस्रेणापि यवैर्यवमानिति। कथं नाहि यवमतीभिर॥ ३॥

मोषातीति। प्यत्र ऽकुः। जातिमात्र संबंधस्य विवक्षितत्वात् भूमाभावेऽप्यत्र मतुप्। भूमादिषूदाहरणेषु प्रायेण भूमादयः प्रतीयंत इत्येवंपरमिति। निंदायां ककुदावर्ती
ला। प्रशंसायां रूपवान्। नित्ययोगे क्षीरिणो वृक्षाः। अतिशायने उदरिणी कन्या। संसर्गे दंडी। संसर्गः संयोगः तेन संयुक्तदंड इवोच्यते। ननु गृहाद्यस्मिन्नस्तीति। प्रकृ
त्योः संयोगे सत्यपि दंडी पुरुष इत्यादिवत् पुरुषी दंडः पुरुषवान् दंड इति न प्रयुज्यते। इति नियामकस्य विवक्षासंबंधस्याभावात् संयोगे समानेऽपि मतौ
इत्यस्य एव कल्प्यत इत्याहुः। एवं च यत्र संयोगमात्रं तत्र मत्वर्थाः आपीन भवंति किंतु यत्र मत्वर्थत्वं च पात्रमेयेत्याशयेन कथं यवमतीभिरद्भिरित्यादि
दुपधायाश्च मतोर्वोऽयवादिभ्यः।८।२।९। मवर्णाद्वर्णाच्च मवर्णावर्णोपधाच्च यवादिवर्जितात्परस्य मतोर्मस्य वः स्यात्। किंवान्। ज्ञानवान्
विद्यावान्। लक्ष्मीवान्। यशस्वान्। भास्वान्। यवादेस्तु यवमान्। भूमिमान्। झयः।८।२।१०। झयन्तान्मतोर्मस्य वः स्यात्। अग्निचित्वान्। विद्यु
त्वान्। संज्ञायाम्।८।२।११। मतोर्मस्य वः स्यात्। अहीवती। मुनीवती। शरादीनां चेति दीर्घः। आसन्दीवदष्ठीवच्चक्रीवत्कक्षीवद्रुमण्वच्चर्मण्व
ती।८।२।१२। एते षट् संज्ञायां निपात्यन्ते। आसनशब्दस्यासन्दीभावः। आसन्दीवान्ग्रामः। अन्यत्रासनवान्। अस्थिशब्दस्या
भावः अष्ठीवान्। अस्थिमानन्यत्र। चक्रशब्दस्य चक्रीभावः। चक्रीवान्नाम राजा। चक्रवानन्यत्र। कक्ष्यायाः संप्रसारणं च कक्षीवान्नाम
ऋषिः। कक्ष्यावानन्यत्र। लवणशब्दस्य रुमण्भावः। रुमण्वान्नाम पर्वतः। लवणवानन्यत्र। चर्मणो नलोपाभावो णत्वं च। चर्मण्वती ना
दी। चर्मवत्यन्यत्र। उदन्वानुदधौ च।८।२।१३। उदकस्य उदन्भावो मतौ। उदधौ संज्ञायां च। उदन्वान् समुद्रः। ऋषिश्च। राजन्वान्सौराज्ये।८।२।
दिग्रहणं प्रातिपदिकमित्याद्यनंतरं च संगच्छत एव। अस्य मत्वर्थीयेति। कथं तर्हि रूपिणी कन्या रसिको नट इति। अत्र। १४। राजन्वती भूः। राजवानन्यत्र।
मादिगणे गुणादिति पठ्यते। तेन गुणवाचिभ्य एवाऽयं मत्वर्थीयस्य निषेधः। रूपिणीत्यत्र तु रूपशब्देन सौंदर्यं गम्यते तेन च न गुणः रसिक इत्यत्र तु रसशब्दे
गृह्यते न तु रसना ग्राह्यो गुण इति। गुणवचनेभ्य इति। गुणोऽजहदिति च प्रसिद्ध्या ये शुक्लादयस्त एव गृह्यंते न तु रूपादयोऽपि तेन रूपं च रूपमित्यादिविषयो गो
चरः॥ मादुपधायाम् चश्च मं समाहारे द्वंद्वः तेन मतुप्प्रत्ययाश्रितमेव परिकं विरोध्यते तदाह। मवर्णावर्णादिति। उपधायाश्चेति व्याख्यानं। उपधाभूता

नोत्यान्ध्यवद्धितेपि भवति। एवमशरार्थे स्थिते फलितमाह। मत्वर्थो वर्णोपधादिति। इदमपि मतुबादिप्रत्ययप्रातिपदिकस्य विशेषणं। तदाह। स्वंत
पुनातीति। गतेनेव चन्द्रमसानिति निर्व्यापि कश्रयोगो निरस्तः। उकारोत्याजस्यस्या प्रवृत्तेः। मत्वं तान नमतुपोनिपधाव। ननु गोधुग्वानमधुलिण्मानित्यत्र हस्य पा
कृतेरूप द्विति घनमश्रेष्य। नुनासिकपरत्वाभावान्नत्वे भावो निमित्यमिन्धने नघकारढकारयोरनुनासिकाप्रवृत्ते गोधुग्वान्। मधुलिड्वानि
सज्येत। मैवं। पदत्वढत्वयोरसिद्धत्वेन नप्रवृत्तित्वात्प्रवृत्तेः॥ ॥ प्राणिस्थान्। शिखावान्दीप इति। प्रत्युदाहरणादिगिप दर्शितः। शिखाशब्द
दिपादेनत्वचीप्रसंगात्। चूडावान्दृश्यत इति। प्रत्युदाहार्यमिति हृदयं। ननु वृक्षस्य प्राणिस्थमस्तीति शंक्य। मुखनासासंचारी वायुः प्राणस्तद्वानेव
तितदाश्रयात्। मारभ्य गादेवेति। एतच्चेति करणान्तर्गतस्थान्। भ्यते। चूडालोसीति। स्त्रीत्यस्य निङ्‌तिङ इति निघातः। चूडालशब्दो रूढेनस्थानो रोच[illegible]

प्राणिस्थादातो लजन्यतरस्याम्। ५। २। ९६। चूडालः। चूडावान्। प्राणिस्थात्किं। शिखावान्दीपः। आतः किम्। हस्तवान्। प्राणपङ्क्ष
वनेह। मेधावान्। प्रत्ययस्वरेणैव सिद्धेऽत्यन्तोदात्तत्वे चूडालो सीत्यादौ स्वरितो वानुदात्ते पदादाविति स्वरितबाधनार्थश्चकारः। सिध्मादिभ्यश्च। ५।
२। ९७। लच्स्यात्। सिध्मलः। सिध्मवान्। अन्यतरस्यांग्रहणं मतुपः समुच्चयार्थं न तु प्रत्ययविकल्पार्थं। तेनाकाराणेभ्य इन्निठनौ न। वातदन्तबलल

ललाटानामूङ् च। वातूलः॥
कारे कृते हलोलस्य समनपधर्मत्वात्तत्स्यानिकत्वकारोनुदात्तः। सुपत्स्यानिकस्यापि सूत्रादरनुरागो सुप्तितान्विन्यनुदात्तरम्भे। पूर्वेणसह
नेकारे शब्दरानेनोदात्तरत्वोकार उदात्तः। एतन्नगर अप्रत्ययान्तारमीति पूर्वे रूपमेकारेणकारस्य सवितोवानुदात्तरू मादिनास्वरितेमा मेतवाधनायचकारः इत्यर्थः। सिध्मादि
सिध्म। गडु। मणि। विजप। निष्पाव। पांसु। हनु। पार्ष्णि। रथ। सिध्मादरयः समुच्चयार्थमिति। निपातानामनेकार्थत्वादिति भावः। न च द्वितीयनाव्यप्यन्यतरस्यां ग्रहणेन स
मिति निर्देशस्य माभूत्। तयोरप्रकृतत्वान्मतुप एव प्रत्ययस्य समुच्चीयते। तस्य प्रकृतत्वादिति चेदिहलिंगं केशाद्वत्यन्यत्रान्यतरस्यांग्रहणं। नहि तत्र इनिठनोः प्रावृत्तिं क्रियते। प्रकृतम
स्यांग्रहणस्य विकल्पार्थत्वेन तदनुवृत्त्यैव सिद्धेः किं तेन क्रियमाणेन। पूर्वस्यान्यतरस्यांग्रहणस्य समुच्चयार्थत्वेतु ज्ञापकं न पश्यामेव न याच्चवानिकेलजन्यतरस्या
मुच्चयवदिति चार्थं भावः प्राणिस्थादिति सूत्रेणालचि विकल्पितेपक्षेमतुवितिचूडालश्चूडावानिति रूपद्वयं यथापि सिध्यति तथापि सिध्मादिषु पेठ्यन्तांपेष्णु

त्तिरप्यं च लच्स्यादिति। इतो वा शब्दः समुच्चये बोध्यः। वात्सादिकल्पो यमयोरेवार्थे पि समुच्चयपदत्वमरः। वा न तदंते न्यादि विशिष्यापंतर्गणसूत्रं। ऊङ्क्ते।
नादृगादेशः। ऊकारमात्रोच्चारणार्थं तादेशो। न सिद्धावपि प्रत्ययत्वशंकानिवारणाय कृतानुबंधः कृतः। न च पक्षे नादिहितस्य प्रत्ययत्वे नेति वाच्यं। अहंशुभमोर्यु
प्यसो यदि स्यादौ भसप्रत्वाभ्युपगमात्। वातूल इति। ज्ञेतौ दानमिदं। वातात्समूहाद्‌ लः। वातानां वेति पठित्वा वातूल इत्युक्तं न दुपेक्षं प्रत्ययस्वरेण मध्योदात्तत्वप्र
गणसूत्र वक्तेनान्तोदात्तमेवेष्यत इत्याहुः। पार्श्वप मन्योरीर्यश्च। सुद्रजेवपता पार्श्वस्योपगणिपठ्यते। पार्श्वीनः। पमनीनः। सुद्रजंतुः। सूकाः नः मसीकान्नः
रोगः विपादिका नः॥ ७ ॥ वत्सांसाभ्यां कामबले इति। कामबलशब्दौ स्वस्वार्थे युक्ते तावितिभावः। वत्सल इति। स्नेहवानित्यर्थः। ननु वत्सांसशब्दौ
पुष्प्रारण्यं गवि शेषे च रूढौ न कामबलयोः। तत्कथं ताभ्यां लच्‌ ताभ्यां कामवान् बलवानित्यर्थ इति चेत्‌ आहुः। इति विपर्यये वत्सांसशब्दौ स्नेहवन योर्नेनि।

वत्सांसाभ्यां कामबले। ५।२।९८। आभ्यां लच् स्याद्यथासंख्यं कामवति बलवति चार्थे। वत्सलः। अंसलः। फेनादिलच्च। ५।२।९९। चा
त्॥ अन्यतरस्यांग्रहणं मतुप्समुच्चयार्थमनुवर्तते। फेनिलः। फेनलः। फेनवान्। लोमादिपामादिपिच्छादिभ्यः शनेलचः। ५।२।१००॥
लोमादिभ्यः शः। लोमशः। लोमवान्। रोमशः। रोमवान्। पामादिभ्यो नः। पामनः॥ अङ्गात्कल्याणे। अङ्गना। लक्ष्म्या अच्च। लक्ष्मणः॥
विष्वगित्युत्तरपदलोपश्चाकृतसन्धेः। विषुणः। पिच्छादिभ्य इलच्। पिच्छिलः। पिच्छवान्। उरसिलः। उरस्वान्॥ ,, इति मत्वर्थीयप्रकरणम्।

स्नेहवानेवेति विमतुविहतेष्यते। मतुवर्तेनेनोत्तार्थस्य प्रतीतिः। किं त्वर्थान्तरमेव तेन प्रतीयत इति। वत्सपर्यायौ गौः। अंसवान् दुर्बल इति। लोमादिरिवह नेति स्पृहिपना।
ति न लोमपामपिच्छादिभ्य इति सुपठं। अङ्गकल्याण इति गणसूत्रमर्थतः पठति। अङ्गादिति। शार्कीपनालीरङ्गीहस्वनं ना। चान्नप्रत्ययः। महत्वाकं गणे की।
णकिनं। महत्यस्तासंपल्याद्यौ न दुत्पत्तान्निनं दरिद्रा नेयपीत्लोपश्चेत्सुणादिसत्रेण इकारकाकारयोर्लोपश्चाद् प्रत्ययः द ई स्वयोगविशेषः न तथा नदई णः। विष
मर्थानामित्यस्यापवादोयं। अकृतसंधे रुक्तनयणादेशस्यांच नेलौ पश्चकाराच्च प्रत्यय इत्यर्थः। यदि तत्कृते यणादेशे उत्तरपदलोपः स्यात्तदा वैलिको प
त्र इति स्यात्। विषुण इति। विषु नाना अञ्चतीति विष्वचि नान्यस्य सेति विषुणः विषवतो स्यः कालः। तस्य हि नानागता नि दिना नि सति दिनां न गणां न्तुला।

…वस्तमन्यूनत्वात्। अयं भावः। विप्रुषति दिनानां समतापां ज्ञानापामपेन्यूनान्यधिकानि च दिना। निमेषे पुरिति दिनानागत दिनबन्धं यथापि विप्रुषति ना…
…पानानागत दिनम्मूलभूतादि नानां सन्धान तयो व्यत्यय इति। तथानानागमनयस्यान्यूनस्त्र्यापूरणवस्थित विनश्च विप्रुण शब्दे नोच्यते ॥ ॥ प्रज्ञाश्रद्धा। मा…
…करणमिति। गुणाभूतयास्क्रियया कर्मत्वेन संबंधः कृद्वृद्गणान्तद्धितप्रयोगे षष्ठीन। कृत्पूर्वीकटमिति वत्तनं नुपकर्षेण ज्ञानातीति प्रवृत्तः। सत्यव…
…न। तथा च प्रवृत्तपवधात्त इत्यणि कृते सिद्धमिष्टं किमन्त्र प्रज्ञाप्रहणेनेत्याशंक्य निराकुर्वन्नाह प्रज्ञेति। स्त्रियांटाप्। प्रज्ञादिभ्यश्चेत्यणि तु ज्ञी प्रज्ञा…
…ः। इत्येवेति। ज्ञानिकमिदं कार्शिकाकृता तु इति शब्दः सूत्रे प्रक्षिप्तः। विच्छिन्नस्य प्रतिविधानेऽशक्तिः। तपस्वी सहस्त्रीति। असंतनात्ररं तन्त्राश्च सिद्धे पुन…
…ज्ञाश्रद्धार्चाभ्यो णः। ५।२।१०१। प्राज्ञो व्याकरणम्। प्राज्ञा। श्राद्धः। आर्चः। वृत्तेश्च णार्तः तपस्सहस्राभ्यां विनीनी। ५।२।१०२। विनीन्यौ रिका…
…नकारपरित्राणार्थः। तपस्वी। सहस्त्री। असन्तत्वादत्वान्तत्वाच्च सिद्धे पुनर्वचनमणा बाधा माभूदिति। सहस्रात्तु ठनो विधाधनार्थम्। अण्।
।५।२। १०३। योगविभाग उत्तरार्थः। तापसः। साहस्त्रः। ज्योत्स्नादिभ्य उपसंख्यानम्। ज्यौत्स्नः। तामिस्त्रः। सिकताशर्कराभ्यां च। ५।२।
…४। सैकतो घटः। शार्करः। देशे लुबिलचौ च। ५।२। १०५। चादण्। मतुप् च। सिकताः सन्त्यस्मिन्देशे सिकताः सिकतिलः। सैकतः॥
…कतावान्। एवं शर्करेत्यादि। दन्त उन्नत उरच्। ५।२।१०६। उन्नता दन्ताः सन्त्यस्य दन्तुरः॥
…र्थः। एतच्च समाधानं मूलपुस्तकेष्वपि क्वचिद्दृश्यते। उत्तरार्थ इति। विनीन्योर्यथासंख्यप्रवृत्त्यर्थश्चेत्यपि बोध्यम्। ११ चत्र मृगणा बाधा मा भूदिति। सहस्रात्तु ठनो वि…
…ः नरकविशेषस्य। तमः समूहस्तमिस्त्रं ज्योत्स्नातमिस्त्रेति निपातनात्। अन्तर्यो रत्नत्र्यस्य चपचभूतानि तमांसि विद्यन्ते तदस्मिन्नस्तीति विग्रहे। गांता…
…मिस्त्रा तामसी रात्रिर्ज्योत्स्नी चन्द्रिका। निती त्यमरः। कौतुतमिस्त्रेत्यत्र ह्रां ने नत्वयांतमिति न विरोधः। सर्वं च तमिस्त्रा रात्रपोऽस्मिन् सन्तीति ता…
…हृत्य पिण्याख्यात्तु राक्यं। सिकता शर्क। देशविशेषस्य च स्यमाणत्वादाह। घट इति। मतुब्वेति। अन्यतरस्यां ग्रहणेन सर्वत्र मतुपः समुच्चयादिति भावः॥
…रति। तु पितृमच्चादावः। अत्र सूत्रे ह्युपसर्गादाहरणान्यमरः संजग्राह स्त्री शर्करा शर्करिलः शार्करः शर्करावति। देश एवादिमावेवमुन्नेपांसिकतावती निर्दं…

वा। समाहारद्वंद्वे सौत्रं पुंस्त्वं। स्यादूषः क्षारमृत्तिका। ऊषवानूषर इत्यमरः सुषिरच्छिद्रं। रन्ध्र इति। महत्कं ठविवरं यस्य तद्ध्वानित्यर्थः। गर्दभे रूढोऽयं सुस्वरो वा
र इत्नः। नगरमिति। नगाः इवाः पर्वताश्च। जातिशब्दोऽयं। नयाचनगः शैल्यवृक्षोऽपि भवति। नगशब्दोऽयमस्मादिषु पद्यते इति वृन्दगणादिसूत्रेणास्यसि।
मा ङ्गेयं न वक्तव्यमिति हरदत्तः। पांसुर इति। पांडुः शुक्ले वर्णे स्याद्वान्। अस्यापि तस्यवेति। गुणमात्रे गुणिनि न वर्तते। इति विश्वः पांडुरः पांडुरित्यमरः गुणेषु
पुंसि स्यात् गुणिलिंगास्तु तद्वतीति च। कच्छुः। कच्छूरस्यस्तु रोगविशेषः। द्युद्रुभ्यां। द्युम इति। दीव्यस्मात्क्लिदिव्यत्रैरित्युक्तं। द्रुहेशः सोऽस्यास्ति नन कतयेतिद्रुमो

ऊषसुषिमुष्कमधो रः। ५।२।१०७। ऊषरः। सुषिरः। मुष्कोऽण्डः। मुष्करः। मधुमाधुर्यं। मधुरः। रप्रकरणे खमुखकुञ्जेभ्य उपसंख्यानम्। खरः। मु
खरः। कुञ्जो हस्तिहनुः। कुञ्जरः। नगपांसुपाण्डुभ्यश्च। नगरं। पांसुरः। पाण्डुरः। पाण्डुरशब्दस्तु श्वेतवाचकत्वाच्छब्द एव। कच्छ्वा ह्रस्वत्वं च। कच्छुरः। द्युद्रुभ्यां मः
५।२।१०८॥ द्युमः। द्रुमः। केशाद्वोऽन्यतरस्याम्। ५।२।१०९। प्रकृतेनान्यतरस्यां ग्रहणेन मतुपि सिद्धे पुनर्ग्रहणमिनिठनोः समावे
शार्थं। केशवः। केशी। केशिकः। केशवान्। अन्येभ्योऽपि दृश्यते। मणिवो नागविशेषः। हिरण्यवो निधिविशेषः। अर्णसो लोपश्च। अर्णवः। गा
ण्ड्यजगात्संज्ञायाम्। ५।२।११०। ह्रस्वदीर्घयोर्यणा तन्त्रेण निर्देशः। गाण्डिवं। गाण्डीवं। अर्जुनस्य धनुः। अजगवम्। पिनाकः। काण्डाण्डादीर
न्नीचौ। ५।२।१११। काण्डीरः। आण्डीरः। रजःकृष्यासुतिपरिषदो वलच्। ५।२।११२। रजस्वला स्त्री। कृषीवलः। वले इति दीर्घः। आसुतीवलः।
शौण्डिकः। परिषद्वलः। पर्षदिति पाठान्तरम्। पर्षद्वलः। अन्येभ्योऽपि दृश्यते॥ ११ पितृवलः पुत्रवलः। शीद्रुमागमा इत्यमरः॥ इदं सर्वं च समर्थीयमानोऽपि मनु
देषु नेष्यते तदर्थस्य मतुपा चाभिधानं मन्यमानात् इत्यन्ये इति। उदलेति वर्तते। अर्णव इति अर्णस् शब्दान्तः अर्णः जलं तत्र दानं। संज्ञायामिति। नदस्यापि
तिशब्दस्यैवायं प्रपंचः। यथाति रथ्यत्वादिति वाक्यं न पाणादेशानुकरणं भवति। लक्ष्ये पदणो भावात्किंतु सूत्रे सांहितिको यं पाणितिभाकः। प्रयुज्यते चोभय
पि रोहति गांडिवं महद्वो। गांडीवी कनकशिलानिभं भुजाभ्यामिति च। आसुतीवल इति। सुञ् अभिषवे क्तिन्। आसुतिरभिषवः। परिषद्वल इति। परित
परिषत् सत्सद्विषेत्यादिना किप्सदिरप्रतेरिति षत्वं। पार्षद इति। नृदृमसो दिवित्यादिना अस्य पार्षत्वं अपि भवति। जगच्च भाष्ये पार्षदकृति

वाहणपर्यन्तस्यान्यतरा चरेरिशद नैकटि काध्यमानिति। पर्यन्देयादशा वरेतिमनुः॥ ॥ भ्रातृवत्स इति वत्से इत्यत्राणग्रहणानुवृत्तेर्नेह दीर्घः पुत्रवत्सा॥
तत्राहुः संज्ञायामित्यनुवृत्तेरिति नियमकिर्यो रितिमक्त्रादिति भावः ज्योत्स्ना चन्द्रप्रभा नन्वा वषवी भूतं ज्योतिरस्त्वीति मत्वर्थीयोपपत्तिः। एतेन नमसा मरेत
ज्योत्स्योरव्याख्यातः। निघण्टुषु नमः पर्यायत्वमिस्वशब्दः पठितस्तत्र समूहसमूहिनोरभेदोपचार इति हरदत्तः स्त्रीत्वमतन्त्रमिति निष्व्याख्यानमपि शरणम्॥

तृवत्सः। पुत्रवत्सः। शत्रुवत्सः। वत्स इत्यत्र संज्ञायामित्यनुवृत्तेर्नेह दीर्घः। दन्तशिखात्संज्ञायाम। ५।२।११३। दन्तावलो हस्ती। शिखावल।
केकी। ज्योत्स्नातमिस्राशृङ्गिणोर्जस्विन्नूर्जस्वलगोमिन्मलिनमलीमसाः। ५।२।११४। मत्वर्थे निपात्यन्ते। ज्योतिष उपधालोपो नश्च प्रत्ययः। ज्यो।
तमस उपधाया इत्वं रश्च। तमिस्रा। स्त्रीत्वमतन्त्रम्। तमिस्रो। शृङ्गादिनच्। शृङ्गिणः। ऊर्जो विनिवलचौ। तेन वा घामाभ्युदितिविनिरपि। ऊर्ज
ऊर्जस्वलः। ऊर्जो। सुगागमश्चेति वृत्तिस्तु चिन्त्या। ऊर्जस्वती तिथरसुत्रन्तेनैवोपपत्तेः। गोशब्दान्मिनिः। गोमी। मलशब्दादिनच्।
नः। ईमसच्च। मलीमसः। अत इनिठनौ। ५।२।११५। दण्डी। दण्डिकः। व्रीह्यादिभ्यश्च। ५।२।११६। व्रीही। व्रीहिकः। न च सर्वेभ्यो व्रीह्यादिभ्य
ठनाविष्येते किं तर्हि शिखामालासंज्ञादिभ्य इनिः। यवखदादिभ्य इकन्। अन्येभ्य उभयम्। तुन्दादिभ्य इलच्च। ५।२।११७। तुन्दादिभ्य इनिठनौ मतुप्
तुन्दिलः। तुन्दी। तुन्दिकः। तुन्दवान्। उदरपिचण्डयववीहि स्वाङ्गविवृद्धौ। विवृद्धा पिचिका अस्त्यस्य पिचिण्डिलः। स्वाङ्गविवृद्धौ कर्णौ वस्य
कर्णिलः। कर्णी। कर्णिकः। कर्णवान्। एकगोपूर्वाट्ठञ् नित्यम्। ५।२।११८। एकशतमस्यास्तीति ऐकशतिकः। ऐकसहस्रिकः। गौशतिकः। गौ
सहस्रिकः। शतसहस्रान्ताच्च निष्कात्। ५।२।११९। निष्कात्परौ यौ शतसहस्रशब्दौ तदन्तात्प्रातिपदिकाट्ठञ् स्यान्मत्वर्थे। नैष्कशतिकः। नैष्कस।
(हस्रिकः॥ ५

नोपिविदिष्यन्तानां नाभिव्यक्त्येन गोपीनसतः। अत इनिठनौ। तपरकरणं किं। स्वद्यावान्। एकाक्षरात्कृतो जातेः सप्तम्यां च न तौ स्मृतौ।
न् कृतः कारकवान्। जातेः व्याघ्रवान्। सप्तम्यां दण्डाः सन्त्यस्यां शालायां दण्डवती शाला। नानारूपायां नीतिस्तत्रस्येति करणे विषयनियमार्थः सर्वत्रापि संबन्ध्यन्तरेति
कृतोपि भवति कार्यी कार्यिकः। क्वचित्तु जातेरपि। तण्डुलीनं तण्डुलिकः। एतद्वाक्यायिकारीस्यर्थे। तुन्दादिभ्य इलच्चाप्यन्यतरस्यामित्यनुवर्तनादाद्यमतुपश्चेति॥ अत्र

गवादिभ्य इनरस्तंजात्यर्थ्य। सुवर्ण्णहृदोःकर्णाचस्य कर्णिनः कर्णी कर्णिकः। कर्णवान्। एकगोपूर्वात्। ऐकशतिकः। एवं चनन्दनं चेति पूर्वकाभ्यामस्त्यर्थे नाल
म्यः। षष्ठीतत्पुरुषाद्बहुव्रीहेर्द्वन्द्वाच्च नभवत्यनभिधानादिति हरदत्तादयः। अनेन न्येयेनेह एकविंशतिरस्यास्तीति। नित्यग्रहणं मतुपो बाधनार्थं। अन्यथा
इति। तमिदमेवोपक्रमेत्यन्यतरस्यां ग्रहणानुवृत्त्या मतुप्स्यादेवेत्याहुः कथमेकद्रव्यवानिति। असाधुरेवायम्। केनद्रव्यवानिति वा विग्रहीतव्यम्। कथम
इति। एकदेशिनैकाधिकरणा इति निर्देशाद्बापपतिरनित्यपिक्वचिद्भवतीति॥ ॥ रूपादाहत। आहत प्रशंसाविशिष्टेऽर्थे वर्तमानाद्रूपशब्दान्मत्व
र्थे आहतप्रशंसयोर्यप्। ५।२।१२०। आहतं रूपमस्यास्तीति रूप्यः कार्षापणः। प्रशस्तं रूपमस्यास्तीति रूप्यो गौः। आहत इति किम्। रूपवा
न्। अन्येभ्योऽपि दृश्यते। हिम्याः पर्वताः। गुण्याः ब्राह्मणाः। अस्मायामेधास्रजो विनिः। ५।२।१२१। यशस्वी। यशस्वान्। मायावी। बीह्यादिपाठादिनिठनौ।
मायी। मायिकः। किं च नतत्वादकुः। स्रग्वी। आमयस्योपसंख्यानं दीर्घश्च। आमयावी। शृङ्गवृन्दाभ्यामारकन्। शृङ्गारकः। वृन्दारकः। फल
बर्हाभ्यामिनच्। फलिनः। बर्हिणः। हृदयाच्चालुरन्यतरस्याम्। इनठनौ मतुप्च। हृदयालुः। हृदयिकः। हृदयवान्। शीतोष्णतृप्रेभ्यस्तन्न
